
# महाकाव्यं गद्यकाव्यं च

## COURSE CODE: B21SN02LC

Sanskrit Language Core Course
For Undergraduate Programmes



SELF LEARNING MATERIAL

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# महाकाव्यं गद्यकाव्यं च

Course Code: B21SN02LC

Semester - IV

## Sanskrit Language Core Course
## Undergraduate Programmes
## Self Learning Material
**(With Model Question Paper Sets)**

SGOU

SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# महाकाव्यं गद्यकाव्यं च

**Course Code: B21SN02LC**

**Semester - IV**

**Sanksrit Language Core Course**

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-970303-3-8

## DOCUMENTATION

### Academic Committee

Dr. C.T. Francis
Dr. Smitha Sabu
Dr. Jeena George
Dr. Thara. K. V.
Dr. M. Harinarayanan Mankulathillath
Dr. Sreeja Priyadharshini
Dr. K. Ratheesh
Dr. R. Maniyappan
Dr. K. Retheesh
Dr. Susanth S.

### Development of the Content

Unnikrishnan Nair S., Dr. G. Sahadevan

### Review

Content : Dr. G. Sahadevan, Unnikrishnan Nair S.
Format : Dr. I. G. Shibi
Linguistics : Dr. G. Sahadevan

### Edit

Dr. G. Sahadevan, Unnikrishnan Nair S.

### Scrutiny

Dr. Jothilekshmi M.

### Co-ordination

Dr. I. G. Shibi and Team SLM

### Design Control

Azeem Babu T. A.

### Cover Design

Jobin J.

### Production

May 2024

### Copyright

© Sreenarayanaguru Open University 2024

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The core language course in Sanskrit for undergraduate programmes is regarded as important . As a subject with good prospects and a language with a rich tradition , learning Sanskrit requires a practical balance of studying both grammar rules and literary texts. The current Sanskrit course operates on this assumption , and the Self-Learning Material is designed to reflect this balanced approach..

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.

Warm regards.
Dr. Jagathy Raj V. P.

01-05-2024

# C O N T E N T S


| | |
|---|---|
| **Block - 1 महाकाव्यपरिचयः** | 1 |
| Unit - 1 लौकिकसाहित्यमधिकृत्य सामान्यपरिचयः | 2 |
| Unit - 2 महाकाव्यानि पञ्चमहाकाव्यानि च | 9 |
| Unit - 3 महाकाव्यलक्षणम् | 16 |
| Unit - 4 कुमारसम्भवस्य महाकाव्यलक्षणानुसारं अवलोकनम् | 21 |
| **Block - 2 कुमारसम्भवम्-पञ्चमः सर्गः** | 26 |
| Unit - 1 पार्वत्याः तपश्चर्योद्यमः – श्लोकाः 1 - 17 | 27 |
| Unit - 2 महत्तरस्तपश्चर्याविशेषः - श्लोकाः 18 - 29 | 41 |
| Unit - 3 ब्रह्मचारिप्रवेशः, सखीद्वारा पार्वत्याः इङ्गितनिवेदनञ्च श्लोकाः 30-61 | 51 |
| Unit - 4 ब्रह्मचारिकृता शिवनिन्दा, पार्वत्या तन्निरासः, फलोदयश्च श्लोकाः - 62 - 86 | 71 |
| **Block - 3 गद्यपरिचयः** | 88 |
| Unit - 1 गद्यकाव्यानां सामान्यपरिचयः | 89 |
| Unit - 2 इतरसाहित्यरूपेषु इतिहासपुराणानां स्वाधीनम् | 103 |
| Unit - 3 महाभारतं, महाभारतस्य रचनाकालः, सामान्यपरिचयश्च | 114 |
| Unit - 4 संस्कृतसाहित्ये लक्ष्मणसूरेः योगदानम् | 120 |
| **Block - 4 भारतसङ्ग्रहः - आदिपर्वणः समग्रमध्ययनम्** | 124 |
| Unit - 1 खण्डिकाः 1 - 11 | 125 |
| Unit - 2 खण्डिकाः 12 - 15 | 140 |
| Unit - 3 खण्डिकाः 16 - 27 | 147 |
| Unit - 4 खण्डिकाः 28 - 31 | 161 |
| Model Question Paper Set – 01 | 170 |
| Model Question Paper Set – 02 | 173 |

BLOCK-1

# महाकाव्यपरिचयः

SGOU

# Unit -1
# लौकिकसाहित्यमधिकृत्य सामान्यपरिचयः

## उद्देश्यानि (Learning Outcomes)

- लौकिकसाहित्यमधिकृत्य सामान्यावगमनाय।
- काव्यस्वरूपस्य काव्यसौन्दर्यतत्त्वस्य चावबोधाय।
- काव्यविभागपरिज्ञानाय।

## प्राग्व्यपेक्षाः (Prerequisites)

हे छात्राः, कविं काव्यञ्चाधिकृत्य श्रुतं खलु? काव्यं प्रधानतया दृश्यकाव्यं, श्रव्यकाव्यमिति द्विविधं किल। दृश्यकाव्ये नाटकादयः अन्तर्भवन्ति। श्रव्यकाव्यं च गद्यं, पद्यं, चम्पूकाव्यमिति त्रिविधम्। अधुना वयं लौकिकसाहित्यम् अधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

वाङ्मयः, शब्दार्थौ, लौकिकसाहित्यम्, ब्राह्मणम्, आरण्यकानि, उपनिषदः, दृश्यकाव्यम्, श्रव्यकाव्यम्, गद्यम्, पद्यम्, चम्पूः, कथा, आख्यायिका।

## Discussion

साहित्यो वाङ्मयः इति व्यवह्रियते। एतत् वैदेशिकैः Literature शब्देन व्यपदिश्यते। साहित्यशब्दस्य शब्दार्थौ इति व्यवहारः अस्ति। सहितयोः भावः साहित्यम्। कयोः सहितयोः? शब्दार्थयोः सहितयोः। शब्दार्थौ काव्यम्। साहित्यं तु काव्यशास्त्रे न तु अन्यशास्त्रे। अर्थः शब्दश्च मिलितं सदैवाह्लादं जनयति। न केवलः शब्दः न वा केवलः अर्थः इति। न च काव्ये शास्त्रादिवत् अर्थप्रतीत्यर्थं शब्दमात्रं प्रयुज्यते, सहितयोः शब्दार्थयोः तत्र प्रयोगात्।

संस्कृतसाहित्यम् अतिप्राचीनम्। प्रथमं वैदिकसाहित्यं ततो लौकिकसाहित्यं च। वेदानां रचनायां जातायां तद्व्याख्यानभूताः ब्राह्मणग्रन्थाः सम्भूताः। ब्राह्मणग्रन्थेभ्यः पश्चात् आरण्यकानि। ततः उपनिषदः



SGOU

विरच्यन्त। पुनः रामायणमहाभारतपुराणानि लिखितानि। ततः काव्य- नाटक- गद्य- चम्पू- कथा- स्मृति- तन्त्रादिनिर्माणविधया चिरमन्ववर्तन्त ।

संस्कृतसाहित्यमात्रस्य विवेचनाय सौकर्यं कालविभागेन सम्पाद्यते। प्रथमः श्रुतिकालः। यत्र संहिता-ब्राह्मणारण्यकोपनिषदः अरच्यन्त। द्वितीयः स्मृतिकालः। रामायणमहाभारतपुराणवेदाङ्गानि रचितानि। तृतीयः सूत्रकालः। लौकिककाव्योदयकालः इति व्यवहारः यत्र पाणिनिप्रणीतसूत्रसिद्धभाषाग्रथितानि काव्यानि जातानि। चतुर्थः कालः शास्त्रकालः। तानि तानि शास्त्राणि न्यायशास्त्राणि न्यायवेदान्तादीनि साहित्यशास्त्रञ्च ।

लौकिकसाहित्यमित्युक्ते लौकिकसाहित्यस्य प्राथम्यमस्ति। काव्यं तावत् द्विविधं खलु। दृश्यकाव्यं श्रव्यकाव्यञ्च। द्रष्टुं योग्यं दृश्यम्। तत्र रूपकादयः अन्तर्भवन्ति इति ज्ञातवन्तः भवन्तः। तत्र नाटकप्रकरणादीनि दशरूपकाणि।

**नाटकमथप्रकरणं भाणं प्रहसनं डिमः।**
**व्यायोगसमवकारवीथ्यङ्कोहामृगाः मताः ।। इति ।**

नाटकेषु कालिदासमहाकवेः अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं, मालविकाग्निमित्रं, भवभूतेः उत्तररामचरितं, महावीरचरितं, मालतीमाधवं  शूद्रकस्य मृच्छकटिकं, भासस्य स्वप्नवासवदत्तप्रभृतीनि त्रयोदशनाटकानि विशाखदत्तस्य मुद्राराक्षसं, भट्टनारायणस्य वेणीसंहारम् एवमादि अनेकानि नाटकानि प्रसिद्धानि।

तथा श्रव्यकाव्यमपि गद्यं, पद्यं, मिश्रं चेति त्रिप्रकारकं भवति। अपादः पदसंघातो गद्यम्। गद्यं कवीनां निकषं वदन्ति इति प्रथाप्यस्ति। संस्कृतभाषायां पद्यसाहित्यमिव गद्यसाहित्यस्यापि प्राधान्यमस्ति । यत्र भाषान्तरगद्यानि सरलभावेन अर्थप्रत्ययसमर्थानि विस्तृतरूपाणि च भवन्ति। तत्र संस्कृतगद्यं चमत्कारकारिवस्तुव्यञ्जनविधया भवन्ति इति।

**'ओजः समासभूयत्वमेतत् गद्यस्य जीवितम्' इति दण्डी।**

गद्यकाव्यकर्तृषु प्रथितः भवति सुबन्धुः। वासवदत्ता इति एक एव ग्रन्थः तेन लिखितः। वासवदत्तायाः प्रशंसायां कविः बाणभट्टः स्वकीये हर्षचरिते एव उल्लिखति -

**कवीनामगलद्दर्पो नूनं वासवदत्तया।**
**शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम्।। इति।**

तथा बाणभट्टस्य हर्षचरितं नाम ग्रन्थः। तस्मिन्नादौ बाणेन स्वीया कथा ततः हर्षस्य चरितं च वर्णितम्। तदनन्तरं तस्य कादम्बरी नाम कथाग्रन्थः अनितरसाधारणेन वर्णनावैचित्र्येण प्रसिद्धा भवति। एवं दण्डिनः दशकुमारचरितम्, धनपालस्य तिलकमञ्जरी इत्याद्याः गद्यग्रन्थाः अपि गद्यकाव्यमण्डले प्रसिद्धाः भवन्ति।

कथा, आख्यायिका चेति गद्यस्य द्वैविध्यमस्ति ।

तत्र कथा -

**कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।**
**क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापरवक्त्रके।**
**आदौ पद्यैर्नमस्कारः खलादेर्वृत्तिकीर्तनम्।।इति।**

यथा-कादम्बर्यादिः।

आख्यायिका-

**आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम्।**
**अस्यामन्यकवीनांच वृत्तं पद्यं क्वचित् क्वचित् ।।**

**कथांशानां व्यवच्छेद आश्वास इति कथ्यते ।**
**आर्यावक्त्रापवक्त्राणांछन्दसा येन केनचित् ।**

**अन्यापदेशेनाश्वासमुखेभाव्यर्थसूचनम्।। इति ।**

यथा - हर्षचरितम् ।

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा। गद्यकाव्यवत्पद्यकाव्यमपि अनेकं भवति। तत्र कालिदासस्य कुमारसम्भवं, रघुवंशः, मेघसन्देशः, ऋतुसंहारः, अश्वघोषस्य बुद्धचरितम्, सौन्दरानन्दं, कुमारदासस्य जानकीहरणं, भारवेः किरातार्जुनीयं, माघस्य शिशुपालवधं, श्रीहर्षस्य नैषधीयचरितं, रत्नाकरस्य हरविजयकाव्यं, श्रीबालरामपणिक्कर् महोदयस्य श्रीनारायणविजयम्। पि.सि. देवस्यामहोदयस्य क्रिस्तुभागवतं, मुतुकुलं श्रीधरमहाशयस्य नवभारतं, के. एन्. एषुत्तच्चन् महाभागस्य केरलोदयं, पि.के. नारायणपिल्लायाः विश्वभानुः इत्यादिकानि पद्यकाव्यानि।

पुनः मिश्रकाव्यं अथवा चम्पूकाव्यम्। गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। तत्र भोजराजस्य चम्पूरामायणं प्राधान्यमर्हति। त्रिविक्रमभट्टस्य नलचम्पू मदालसचम्पू, सोमदेवस्य यशस्तिलकचम्पू

अभिनवकालिदासस्य भागवतचम्पू अनन्तभट्टस्य भारतचम्पू एवमादीनि चम्पूकाव्यानि च साहित्येऽस्मिन् प्रथितानि।

लौकिकसाहित्ये न केवलं पूर्वोक्ताः काव्यविभागाः अपि च खण्डकाव्यानि, नीतिकाव्यानि सुभाषितानि नीतिकथाः च अन्तर्भवन्ति।

महाकाव्यस्य एकदेशानुवर्ति भवति खण्डकाव्यम्। खण्डकाव्ये प्रायेण एक एव नायकः। अपि च जीवनस्य एकपक्षः चित्रितः दृश्यते। खण्डकाव्यं लघुशरीरेण युक्तम्। अपि च अधिकतया लालित्यं माधुर्यं च वर्तते। सन्देशकाव्यानि प्रमुखतया खण्डकाव्यविभागे अन्तर्भवन्ति। अनेकानि सन्देशकाव्यानि सन्ति। कालिदासस्य मेघदूतम्, वेदान्तदेशिकस्य हंससन्देशः, रूपगोस्वामिनः हंसदूतम्, वासुदेवस्य भृङ्गसन्देशः च प्रसिद्धानि सन्देशकाव्यानि। कालिदासस्य ऋतुसंहारः, घटकर्पस्य घटकर्परकाव्यं च अकरुकस्य अमरुशतकम्, जयदेवस्य गीतागोविन्दम् प्रभृतीनि खण्डकाव्येषु अन्तर्भवन्ति

नीतिपरकाव्येषु चाणक्यशतकं, सुन्दरपाण्ड्यस्य सूत्रसमुच्चयः, भर्तृहरेः नीतिशतकं, वैराग्यशतकं, शङ्कराचार्यस्य मोहमुद्गरः, क्षेमेन्द्रस्य चारुचर्चा, जल्हणस्य मुग्धोपदेशः जगन्नाथस्य भामिनीविलासः, वेङ्कटाध्वरिणः सुभाषितकौस्तुभं च प्रधानानि भवन्ति।

संस्कृतकाव्यमणडले सुभाषितकाव्यानां बाहुल्यं वर्तते। सातवाहनस्य गाथास्पृशति, श्रीधरदासस्य सदुक्तिकर्णामृतम्, शाङ्र्गधरस्य शाङ्र्गधरपद्धतिः, वल्लभदेवस्य सुभाषितावलिः, हरिकवेः सुभाषितहारावलिः च प्रसिद्धानि सुभाषिकाव्यानि भवन्ति।

अनेकाः नीतिकथाः संस्कृतलौकिकसाहित्ये सन्ति। नीतिकथाः सामान्यतया द्विविधाः। पशुपक्ष्याश्रिताः मनुष्याश्रिताः च। पशुपक्षिमाध्यमेन सदाचार - राजनीति - व्यवहारादीनां ज्ञानमुपदिश्यते। यथा पञ्चतन्त्रं हितोपदेशस्य। मानवमाध्यमेन वर्तमानायाः नीतिकथायाः उदाहरणं भवति पुरुषपरीक्षा।

विष्णुशर्मणा रचितं भवति पञ्चतन्त्रम्। मित्रभेदः, मित्रसंप्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं चेति पञ्चतन्त्राणि अस्मिन् सन्ति। अत्रत्या भाषा सरसा सरला च भवति। कथाव्याजेन सदाचारनिष्ठाभिः कथाभिः न केवलं बालानां किन्तु सर्वेषाम् आदेशप्रदायकः भवत्ययं ग्रन्थः। प्रायेण सर्वासु विश्वभाषासु अस्य ग्रन्थस्य भाषान्तरीकरणं वर्तते। अस्मिन् ऊनसप्ततिः कथाः। अत्यस्याः कथाः प्रायो गद्ये, नीतिवाक्यानि तु पद्ये निबद्धानि भवन्ति।

नारायणेन विरचितं पञ्चतन्त्रस्य नवीनं संस्करणं भवति हितोपदेशः। अस्मिन् चत्वारि प्रकरणानि सन्ति। मित्रलाभ - मित्रभेद - विग्रह - सन्धिनामकानि तन्त्राणि। अस्मिन् त्रिचत्वारिंशत् (43) कथा: सन्ति। अस्मिन् पञ्चतन्त्रपेक्षया पद्यानां बाहुल्यं दृश्यते।

मानवं कथापात्रत्वेन स्वीकृत्य पञ्चतन्त्रशैल्या रचितः ग्रन्थः भवति पुरुषपरीक्षा। विद्यापतिरेव अस्य कर्ता। अस्मिन् ग्रन्थे चत्वारिंशत् (40) कथाः सन्ति। अत्रत्या भाषा क्लिष्टापि सरसा दृश्यते।

## पुनरावृत्तिः (Recap)

- साहित्यो वाङ्मयः।शब्दार्थयोः सहितयोः भावः साहित्यम्।
- संस्कृतसाहित्यं वैदिकसाहित्यं, लौकिकसाहित्यं चेति द्विविधम्।
- प्रथमं वेदानां रचना, ततः तद्व्याख्यानभूताः ब्राह्मणग्रन्थाः आरण्यकानि, उपनिषदः च।
- पुनः रामायणमहाभारतपुराणानि, काव्यनाटकादीनि च।
- रूपकाणि दश। नटकं प्रहसनमित्यादि ।
- अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रम्, उत्तररामचरितं, मृच्छकटिकं, स्वप्नवासवदत्तम् इत्यादीनि प्रसिद्धानि नाटकानि।
- श्रव्यकाव्यं तु गद्यं, पद्यं, मिश्रं चेति त्रिप्रकारकम्।
- कथा, आख्यायिका चेति गद्यस्य द्वैविध्यम्।
- अपादः पदसंघातो गद्यम्।
- पद्यं चतुष्पदी। तच्च वृत्तं जातिरिति द्विविधम्।
- गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।
- लौकिकसाहित्ये खण्डकाव्यानि, नीतिकाव्यानि सुभाषितानि नीतिकथाः च अन्तर्भवन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. को नाम वाङ्मयः?
2. संस्कृतसाहित्यं कति विधम्?
3. मालविकाग्निमित्रं केन विरचितम्?
4. श्रुतिकाले के अरच्यन्त?



SGOU

5. कस्मिन् काले पाणिनिप्रणीतसूत्रसिद्धभाषाग्रथितानि काव्यानि जातानि?
6. काव्यं कति विधम्?
7. किं नाम गद्यम्?
8. आख्यायिकायाः एकमुदाहरणम्?
9. क्रिस्तुभागवतं कस्य रचना?
10. कालिदासेन रचितानि पद्यकाव्यानि कानि?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. गद्यं कतिविधं ? ते च के?
2. रूपकाणि कति ? कानि च तानि?
3. महाकविकालिदासेन रचितानि नाटकानि कानि?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

1. गद्यकाव्यम्।
2. पञ्चतन्त्रम्।

## निर्दिष्टाभ्यासः (Assignments)

लौकिकसाहित्यमधिकृत्य निरुपयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. साहित्यम्।
2. द्विविधम्।
3. कालीदासेन।
4. संहिता ब्राह्मणारण्यकोपनिषदः।

5. सूत्रकाले।
6. त्रिप्रकारकम्।
7. अपादः पदसंघातो गद्यम्।
8. हर्षचरितम्।
9. पि सि देवस्स्या।
10. रघुवंशं, कुमारसम्भवम् ऋतुसंहारः इत्यदीनि।

## सूचनाग्रन्थौ (References)


1. T.K. Ramachandra Ayyar. A Short History of Sanskrit Literature, R.S Vadhyar & Sons Kalpathy Palakkad 678003
2. AcharyaLokamani Dahala. Samskruthasahityethihasah, Chowkhamba Krishnadas academy, Varanasi


## अधिकवाचनाग्रन्थाः(Suggested readings)


1. A Companion to Sanskrit Literature, Banergy S.C, Motilal Banarsidas Publishers, Delhi,1989
2. A History of Sanskrit Literature, Macdonell A .A, Motilal Banarsidas Publishers, Delhi,1990.
3. A History of Sanskrit Literature, A.B. Keith, Motilal Banarsidas Publishers, Delhi,1993
4. Samskritasahityacaritram (Malayalam), KunjunniRaja & M.S Menon (Ed.), Kerala Sahitya Academy, Trissur, 1991

# Unit - 2

# महाकाव्यानि पञ्चमहाकाव्यानि च

## उद्देश्यानि (Learning Outcomes)

- महाकाव्यमधिकृत्य उद्बोधनाय।
- महाकाव्यपरिज्ञानाय।
- पञ्चमहाकाव्यानां अवगमनाय।

## प्राग्व्यपेक्षाः (Prerequisites)

कवेः कर्म भवति काव्यम्। महाकाव्यं हि संस्कृत-साहित्य-जगतः सर्वोत्कृष्टरत्नम्। संस्कृतसाहित्यजगति महाकाव्यस्य विकासः कदा प्रभृत्यभूदिति तु न पार्यते निश्चयेन वक्तुम्। काव्यम्, चरित्रकाव्यम्, गद्यकाव्यम्, महाकाव्यम् इत्यादिभेदेन अनेकधा सन्ति।

संस्कृतमाहित्ये सर्वोत्कृष्टरत्नानि प्रसिद्धानि महाकाव्यानि अनेकानि सन्त्यपि पञ्चमहाकाव्यानि इति विख्यातानि पञ्च। अस्मिन् एकके महाकाव्य-पञ्चमहाकाव्यविषये सामान्यपरिचयं इदानीं अस्माभिः सम्पादनीयः।

## मुख्यपदानि (Keywords)

रामायणं, महाभारतम्, बुद्धचरितं, सौन्दरानन्दं, भट्टिकाव्यम्, जानकीहरणम्, मूषिकवंशः, श्रीकृष्णविजयं, श्रीनारायणविजयं, श्रीमन्नारायणीयम्।

## Discussion

### 1.2.1 महाकाव्यानि

सर्गबन्धो महाकाव्यम् इति। संस्कृतकाव्यस्योदयः प्रशान्तपावने तपोवने अजायत। तत्रादौ वाल्मीकिमहर्षिणा विरचितं रामायणम्। अतः स कविः आदिकविः इति प्रसिद्धः भवति। रामायणं

प्रथममहाकाव्यमिति श्रूयते। ततः व्यासस्य महाभारमपि। भारतस्य द्वितीयं राष्ट्रियमहाकाव्यं भवति महाभारतम्। काव्यं पुनः शास्त्रञ्च पाणिनेः जाम्बवतीपरिणयम्।

अश्वघोषस्य बुद्धचरितं, सौन्दरानन्दं नाम द्वे महाकाव्ये प्रसिद्धे भवतः। सप्तदशसर्गात्मकं महाकाव्यं भवति बुद्धचरितम्। श्रीबुद्धस्य जन्मतः प्रभृति महानिर्वाणपर्यन्तकथा अस्मिन् वर्णिता। सौन्दरानन्दञ्च अष्टादशसर्गात्मकं भवति। काव्येऽस्मिन् इक्ष्वाकुवंशस्य राज्ञो नन्दस्य धर्मपरिवर्तनं सुन्दर्या सह तस्य पाणिग्रहणञ्च वर्णयति कविः।

भट्टिकाव्यम् - व्याकरणस्य शब्दशास्त्रस्य च नियमान् तत्त्वानि च व्याख्यातुं रचितं महाकाव्यं भवति भट्टिकाव्यम्। विंशतिसर्गात्मकेऽस्मिन् काव्ये श्रीरामस्य पट्टाभिषेकं यावत् कथा वर्णिता। भट्टिकाव्यस्य रावणवधमिति च नाम अस्ति। कुमारदासेन विरचितमपरं काव्यं भवति जानकीहरणम्। श्रीरामस्य चरितम् आश्रित्य रचितस्य काव्यस्य विंशतिसर्गाः सन्ति।

वेदान्तदेशिको नाम कविः 'यादवाभ्युदयम्' नाम महाकाव्यं रचितवान्। चतुर्विंशतिः सर्गात्मकेऽस्मिन् श्रीकृष्णस्य कथाः वर्णिताः। विक्रमाङ्कदेवचरितं नाम महाकाव्यं बिल्हणेन रचितम्। महाकाव्येऽस्मिन् अष्टादशसर्गाः सन्ति।

मङ्खुकेन श्रीकण्ठचरितं नाम पञ्चविंशतिसर्गसम्पूर्णं महाकाव्यं लिखितम्। दशावतारचरितं नाम महाकाव्यं क्षेमेन्द्रस्य मधुरतमा कृतिः।

अथ केरलीयसंस्कृतमहाकव्यान्यधिकृत्य चिन्तयामः। तत्रादौ सुकुमारकविविरचितं श्रीकृष्णविलासं महाकाव्यम्। द्वादशसर्गात्मके अस्मिन् महाकाव्ये मनोहरवर्णनाः सन्ति। पश्य -

**अस्ति श्रियः सद्म सुमेरुनामा समस्तकल्याणनिधिर्गिरीन्द्रः।**

**तिष्ठन्निदं विश्वमनुप्रविश्य स्वेनात्मना विष्णुरिवोर्जितेन।।**

**मिथस्तिरोभावविलोकनाभ्यांसंक्रीडमानाविव बालकौ द्वौ ।**

**पार्श्वेषु यस्याशु परिभ्रमन्तौ चन्द्रांशुमन्तौ नयतो दिनानि ।। इति।**

पुनः अतुलकविनिर्मितं मूषिकवंशः इति महाकाव्यम्। अस्मिन् पञ्चदशसर्गाः। कोलत्तुनाट्टुराजवंशं तेषामपदानकीर्तनं च वर्णितमस्मिन्। पुनः शङ्करकवेः श्रीकृष्णविजयं, कोलत्तुनाट्टु रविवर्मणः उदयवर्मचरितं, मेल्पुत्तूर् नारायणभट्टतिरिमहोदयस्य श्रीमन्नारायणीयम् इत्यादीनि महाकाव्यानि अपि प्रसिद्धानि।

विंशतिशतकस्यारम्भे केरलपाणिनेः ए. आर्. राजराजवर्मणः आङ्गलसाम्राज्यं नाम महाकाव्यमपि

प्राधान्यमर्हति। आङ्ङ्गलेयाधिपत्यस्य उदयं विकासादिप्रतिपादकं महाकाव्यं भवतीदम्। त्रयोविंशतिसर्गाः अस्मिन् काव्ये। ततः जोर्जुदेवचरितं महाकाव्यम् इति अपरम्। ए. पद्मनाभशास्त्रिणा विरचितं भवति । इंग्लण्ड्राजस्य जोर्ज पञ्चमस्य जीवनचरितमाधारीकृत्य रचितं महाकाव्यं भवति जोर्जुदेवचरितम्। अस्मिन् पञ्चदशसर्गाः सन्ति।

ततः श्रीनारायणविजयं महाकाव्यम्। प्रोफ. के. बालरामप्पणिक्कर् - महोदयेन रचितं भवति श्रीनारायणगुरोः अपदानानि धर्मोपदेशान् च काव्येऽस्मिन् प्रतिपादयति। एकविंशतिसर्गात्मकं काव्यमिदम्। गुरुदेवः शिष्येभ्यो दत्तोपदेशेषु श्लोकमेकं पश्य

**किञ्चिन्मतं हैन्दवाख्यं न हिन्दुस्थाने वसन्तः स मे हिन्दवो हि।**

**महम्मदाः क्रैस्तवाः जैनबौद्धाः सर्वे त्वमी हिन्दवो भिन्नमार्गाः।। इति ।**

पुनः क्रिस्तुभागवतं नाम महाकाव्यम्। प्रोफसर् 'पि.सि. देवस्या' महाशयेन विरचितमिदम्। क्रिस्तुदेवस्य चरितप्रतिपादकोऽयं ग्रन्थः। महाकाव्येऽस्मिन् त्रयस्त्रिंशत् सर्गाः सन्ति।

केरलोदयं महाकाव्यम् के. एन्. एषुत्तच्चन् महोदयेन लिखितं भवति। केरलराज्यस्य राष्ट्रिय-सामूहिक-सांस्कारिकचरितप्रकाशकं काव्यं भवतीदम्। महाकाव्येऽस्मिन् एकविंशतिः सर्गाः सन्ति। हृदयहारिणः वर्णनाः काव्यस्यास्य चारुतां वर्धयन्ति। सप्तसप्तत्युत्तरनवशताधिकसहस्रतमे (१९७७) वर्षे अयं ग्रन्थः प्रकाशितः। नवसप्तत्युत्तरनवशताधिकसहस्रतमे (१९७९) माहाकाव्यमिदं केन्द्रसाहित्य-अक्कादमी संस्थया पुरस्कृतम्।

नवभारतं नाम महाकाव्यं मुतुकुलं श्रीधरमहोदयेन लिखितम्। अष्टादशसर्गात्मके अस्मिन् काव्ये भारतस्य स्वातन्त्र्यलब्धिः, तन्नेतॄणां अपदानकीर्तनमादिकं वर्णितं दृश्यते। हिमालयवर्णना -

**मुनिप्रौढैः समाश्लिष्टो मौनवेदान्तचिन्तकः।**

**सन्ध्ययोरुभयोःस्वर्णतालवृन्तप्रवीजितः।।इति।**

विश्वभानुः नाम महाकाव्यमन्यत्। डा. पि.के. नारायणपिल्लामहाशयेन लिखितमिदं महाकाव्यम् एकविंशतिः सर्गात्मकं भवति। स्वामिविवेकानन्दस्य चरितमस्य इतिवृत्तम्।

### 1.2.2 पञ्चमहाकाव्यानि

संस्कृतसाहित्ये पञ्च महाकाव्यानि प्रसिद्धानि। तत्रादौ कालिदासकविना विरचिते द्वे महाकाव्ये। ते च रघुवंशः, कुमारसम्भवं च।

**रघुवंशः -** नवदशसर्गात्मकं महाकाव्यं भवति रघुवंशः। सूर्यवंशराजानां चरित्रम् अत्र वर्ण्यते। दिलीपादारभ्य अग्निवर्णपर्यन्तानां राज्ञां चरितं प्रतिपादयति अस्मिन् काव्ये। इन्दुमतीस्वयंवरवर्णने राज्ञां पुरः सञ्चरन्तीम् इन्दुमतीं कविः वर्णयति -

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।। इति ।**

**कुमारसम्भवम् -** सप्तदशसर्गात्मकं महाकाव्यं भवति कुमारसम्भवम्। हिमालयवर्णनया आरभ्य तारकासुरवध - पर्यन्तकथा काव्येऽस्मिन् वर्णिता। अष्टमसर्गपर्यन्तमेव कुमारसम्भवं कालिदासेन कृतम् इति। नवमसर्गात् आरभ्य सप्तदशपर्यन्तं केनाप्यन्येन योजितमिति श्रूयते । काव्यस्यारम्भे नगाधिराजस्य हिमालयस्य वर्णना हृद्या एव।

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः।। इति ।**

प्रकृतिनिरीक्षणं,काव्यात्मकता, प्रसादात्मकता, अलङ्कारप्रयोगश्च अनितरसाधारणानि एव। मानवजीवनस्य सम्पूर्णं चरितमुपस्थापयितुं रघुवंशं, प्रेम्णः परं प्रकर्षं प्रकाशयितुं कुमारसम्भवं चासौ महाकविः प्रणीतवान्।

**किरातार्जुनीयम् -** शिवार्जुनयोः युद्धमवलम्ब्य निर्मितं महाकाव्यं भवति भारवेः किरातार्जुनीयम्। अष्टादशसर्गात्मकं भवति एतत्काव्यम्। 'भारवेरर्थगौरवं' प्रसिद्धं भवति। महाकवेरस्य कवित्वप्रतिभा, निरीक्षणपाटवं, कल्पनावैभवमादिकं महत्तरमेव । -

**शिशुपालवधम् -** पञ्चमहाकाव्येषु अन्यदेकं भवति माघस्य शिशुपालवधम्। महाकाव्यमेतत् माघम् इति नाम्ना च प्रथितम् अस्ति।

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

द्वाविंशतिसर्गात्मके अस्मिन् काव्ये शिशुपालवधे युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः मुख्यतया वर्णितः। 'नवसर्गगते माघे नवशब्दो न विद्यते' इति प्रथा।

**नैषधीयचरितम् -** श्रीहर्षस्य नैषधीयचरितम् अतिप्रसिद्धं विशालकायं महाकाव्यं भवति। महाकाव्ये अत्र निषधराजस्य नलस्य चरितं वर्ण्यते। अस्मिन् ग्रन्थे द्वाविंशतिः सर्गाः सन्ति। नलस्य वर्णनया ग्रन्थमारभ्यते।

**निपीय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधाः सुधामपि।**
**नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः।। इति।**

इति प्रसिद्धानि पञ्चमहाकाव्यानि ।

## पुनरावृत्तिः (Recap)

- सर्गबन्धो महाकाव्यम्।
- आदौ महर्षिण वाल्मीकिना विरचितं रामायणम्।
- ततः व्यासस्य महाभारतम्।
- पुनः शास्त्रमधिकृत्य रचितं पाणिनेः जाम्बवतीहरणम्।
- अश्वघोषस्य बुद्धचरितं सौन्दरानन्दं च।
- कुमारदासस्य भट्टिकाव्यं, जानकीहरणं च।
- बिल्हणस्य विक्रमाङ्कदेवचरितम्।
- मङ्खुकस्य श्रीकण्ठचरितम्।
- क्षेमेन्द्रस्य दशावतारचरितम्।
- केरलीय संस्कृतमहाकाव्यानि - सुकुमारकवेः श्रीकृष्णविलासकाव्यम्।
- अतुलकवेः मूषिकवंशम्।
- शङ्करकवेः श्रीकृष्णविजयम्
- कोलत्तुनाद्टुरविवर्मणः उदयवर्मचरितम्।
- मेल्पुत्तूर् नारायणमट्टतिरिमहोदयस्य श्रीमन्नारायणीयम्।
- ए. आर् राजवर्मणः आङ्गलसाम्राज्यम्।
- ए पद्मनाभशस्त्रिणः जोर्जुदेवचरितम्।
- प्रोफर् के बालरामपणिक्करमहोदयस्य श्रीनारायणविजयम्।
- प्रोफर् पी सि देवस्या महोदयस्य क्रिस्तुभागवतम्।
- के एन् एषुत्तच्चन् महोदयस्य केरलोदयम् ।
- मुतुकुलं श्रीधरमहोदयस्य नवभारतम्।
- महाकविकलिदासस्य रघुवंशं कुमारसम्भवं च।
- भारवेः किरातार्जुनीयम्।
- माघस्य शिशुपालवधम्।
- श्रीहर्षस्य नैषधीयचरितम्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. आदिकविः इति रूपेण मन्यामानः कः?
2. बुद्धचरिते कति सर्गाः सन्ति?
3. क्रिस्तुदेवस्य चरितप्रतिपादकः ग्रन्थः कः?
4. श्रीमन्नारायणीयं कस्य कृतिः?
5. पञ्चमहाकाव्येषु कालिदासस्य कति ग्रन्थाः?
6. शास्त्राधारितं महाकाव्यं किम्?
7. नैषधीयचरिते कति सर्गाः सन्ति?
8. जानकीहरणे कस्य चरितं वर्णितमस्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. संस्कृते पञ्चमहाकाव्यानि कानि?
2. मूषिकवंशमहाकाव्यस्य प्रतिपाद्यविषयः कः?
3. भट्टीकाव्यस्य सविशेषतां लिखत।

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

1. अश्वघोषस्य महाकाव्ये के? विवृणुत।
2. केरलोदयम्।

## निर्दिष्टाभ्यासः(Assignments)

1. संस्कृतपञ्चमहाकाव्यानि विशदयत।
2. केरलीय संस्कृतमहाकाव्यानि अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. महर्षिः वाल्मीकिः।
2. सप्तदशसर्गाः।
3. क्रिस्तुभागवतम्।
4. मेल्पुत्तूर् नारायणभट्टतिरिः।
5. द्वे।
6. जाम्बवतीहरणम्।
7. द्वाविंशतिः।
8. श्रीरामस्य।

## सूचनाग्रन्थौ (References)


1. T.K. Ramachandra Ayyar. A Short History of Sanskrit Literature, R.S Vadhyar & Sons Kalpathy Palakkad 678003
2. Acharya Lokamani Dahala. Samskruthasahityethihasah, Chowkhamba Krishnadas academy, Varanasi


## अधिकवाचनाग्रन्थाः (Suggested readings)


1. A Companion to Sanskrit Literature, Banergy S.C, Motilal Banarsidas Publishers, Delhi,1989
2. A History of Sanskrit Literature, Macdonell A .A, Motilal Banarsidas Publishers, Delhi,1990.
3. History of Classical Sanskrit Literature, M. Krishnamachariar, Motilal Banarsidas Publishers, Delhi,1990

# Unit - 3
# महाकाव्यलक्षणम्

## उद्देश्यानि (Learning Outcomes)

- महाकाव्यविषये परिचयं प्राप्नोति।
- महाकाव्यस्वरूपस्य काव्यसौन्दर्यतत्वस्य चावबोधनाय प्रभवति।
- महाकाव्यमधिकृत्य उद्बोधनाय क्षमता।

## प्राग्व्यपेक्षाः (Prerequisites)

प्रिय पठितारः

अस्मिन् खण्डे द्वितीये एकके महाकाव्यानि पञ्चमहाकाव्यानि च अधिकृत्य चर्चा कृता। इदानीं तृतीये एकके महाकाव्यलक्षणं किमिति पश्यामः।

## मुख्यपदानि (Keywords)

सर्गबन्धो, आशीर्नमस्क्रिया वस्तुनिर्देशो, इतिहासकथोद्भुतं, चतुर्वर्गफलायत्तं, चतुरोदात्तनायकम्, रसभावनिरन्तरम्, वंशवीर्यश्रुतादीनि।

## Discussion

सर्गबन्धो महाकाव्यम्। सर्गबन्धात्मिका रचना महाकाव्यमिति। सर्गस्तु अवान्तरार्थवर्णना। रसवत्पद्यकदम्बविन्यासः। आशीः - इष्टजनस्य शुभाशंसनम्, नमस्क्रिया - प्रणामः, वस्तुनिर्देशः तेष्वेकेन काव्यस्य प्रारम्भः स्यात्। महाकाव्यस्य प्रतिपाद्यं इतिहाससमुद्भूतं स्यात्। महाकाव्यस्य रचनया चतुर्वर्गस्य धर्मार्थकाममोक्षस्य फलप्राप्तिः सम्भवति। चतुरः, व्यवहारकुशलः, उदात्तः, धीरोदात्तः च नायकः स्यात्। महाकाव्ये नगरार्णवपर्वताः-ऋतुवर्णना-चन्द्रोदयः-सूर्योदयः, उद्यानं, सलिलक्रीडा, मधुपानं, रतोत्सवः, विप्रलम्भशृङ्गारः, विवाहः, सन्तानोत्पत्तिः, मन्त्रणादूतप्रेषणं, युद्धयात्रा, युद्धवर्णनं, नायकस्य विजयः इत्यादयः वर्णनीयविषयाः।

उक्तं च काव्यादर्शे -

**सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।**
**आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।।**

**इतिहासकथोद्भुतमितरद्वासदाश्रयम्।**
**चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्।।**

**नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनैः।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवैः।।**

**विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।**
**मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि।**

अपि च - नगरादारभ्य अभ्युदयपर्यन्तं सूचितानां वस्तूनां वर्णनाः विपुलतया वर्तितव्याः। श्रृङ्गरादीनां नवरसानां वर्णनाः भावैः निरन्तरं पूर्णम् अनतिविस्तृतैः छन्दोनिबन्धैः युक्तं मुखप्रतिमुखगर्भविमर्शनिर्वाणनामकैः सन्धिभिः सुघटितं च भवेत्।

**अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम्।**
**सर्गरनतिविस्तीर्णःश्रव्यवृत्तैः सुसन्धिभिः।।**

सर्वेषां सर्गाणां समाप्तौ विपरीतैः छान्दोभिरुपेतं यमकानुप्रासोपमोत्प्रेक्षादिभिरलङ्कारैः अलङ्कृतं लोकरञ्जकं काव्यं युगवसानपर्यन्तं शोभमानत्वेन स्थास्यति।

**सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।**
**काव्यं कल्पान्तरस्थायि जायते सदलङ्कृतिः।।**

पूर्वोक्तैः गुणैः यत्र कुत्रापि न्यूनता वर्तते चेदपि महाकाव्यं न दुष्यति। वर्णायितुमङ्गीकृतेषु शैलादिषु रसपोषः आवश्यकमिति काव्यविदः वदन्ति। पूर्वोक्ताः सर्वे अंशाः महाकाव्ये अवश्यं वर्तितव्यं इति नियमो न। यथा शैलर्तुवर्णनैव रस परिपोषः सम्पद्यते, तदा तत्र कुमारोदयमन्त्रदूतवर्णनाः नावश्यकाः।

**न्यूनमप्यत्र यः कैश्चिदङ्गः काव्यं न दुष्यति।**
**यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः।।**

महाकाव्ये नायकप्रतिनायकयोः उत्कर्षापकर्षौ वर्णानीयौ। तत्र प्राक् नायकस्य वर्णनं, ततः प्रतिनायकस्य। तदनन्तरं नायककृतः प्रतिनायकपराजयः इत्येका रीतिः प्रयोक्तव्या। अन्या रीतिरप्यस्ति। पूर्वं प्रतिनायकस्य वर्णनं, ततो नायकवर्णना, नायकेन प्रतिनायकस्य पराजयः सूचितव्यः।

**गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।**
**निराकरणमित्येष मार्गाः प्रकृतिसुन्दरः।।**

किन्तु प्रतिनायकस्यापि वंशवीर्यश्रुतादीनि वर्णयित्वा, प्रतिनायकस्य नायकस्योत्कर्षकथनम् अस्मान् प्रीणयति इति दण्डी अभिप्रैति। इयं रीतिः किरातार्जुनीये सूचयति। तत्र दुर्योधनस्य नीतिपूर्वकं प्रजाभरणं संसूच्य पाण्डवानामुत्कर्षप्रतिपादनं सूचितम्।

**वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।**
**तज्जयान्नायकोत्कर्षकथनं च धिनोति नः।।**

प्रायः सर्वासु भाषासु महाकाव्यानामेव प्राधान्यं दृश्यते। महाकाव्ये अष्टाधिकाः सर्गाः भवेयुः। रसप्रधानं भवेत् महाकाव्यम्। श्रृङ्गारवीरशान्तानामेको अङ्गीरसः, अन्ये रसाः अङ्गिनश्च। प्रतिसर्गं भाविसर्गकथासूचकः निर्देशः वर्तितव्यः। महाकाव्यस्य सर्वं लक्षणं संस्कृतमहाकाव्येषु सन्ति। कुमारसम्भवेऽपि एतादृशाः गुणाः सन्ति।

## पुनरावृत्तिः (Recap)

- सर्गबन्धो महाकाव्यम्।
- सर्गस्तु अवान्तरवर्णना।
- आशीः नमस्क्रिया वस्तुनिर्देशः तेष्वेकेन काव्यस्य प्रारम्भः स्यात्।
- महाकाव्यस्य प्रतिपाद्यम् इतिहासकथोद्भूतम् स्यात्।
- महाकाव्यस्य रचनया चतुर्वर्गस्य फलप्राप्तिः सम्भवति।
- अस्य नायकः चतुरः, व्यवहारकुशलः, उदात्तः, धीरोदात्तः च भवति।
- महाकाव्ये वर्णनीयविषयाः – नगरार्णवपर्वत-ऋतुचन्द्रोदयः-सूर्योदयः, उद्यानं, सलिलक्रीडा, मधुपानं,
- रतोत्सवः, विप्रलम्भश्रृङ्गारः, विवाहः, सन्तानोत्पत्तिः, मन्त्रणादूतप्रेषणं, युद्धयात्रा, युद्धवर्णनं, नायकस्य विजयः आदयः।
- छन्दोनिबन्धैः युक्तं मुखप्रतिमुखगर्भविमर्शनिर्वाणनामकैः सन्धिभिः सुघटितं भवेत्।

- यमकानुप्रासोपमोत्प्रेक्षादिभिरलङ्कारैः अलङ्कृतम्।
- पूर्वोक्तैः गुणैः यत्र कुत्रापि न्यूनता वर्तते चेदपि महाकाव्यं न दुष्यति।
- महाकाव्ये अष्टाधिकाः सर्गाः भवेयुः।
- रसप्रधानं भवेत् महाकाव्यम्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. महाकाव्यलक्षणं कस्मिन् ग्रन्थे उक्तमस्ति इति पाठभागे प्रतिपादितम्?
2. महाकाव्यस्य प्रारम्भः कथं स्यात्?
3. ……….. प्रतिपाद्यं इतिहासकथोद्भूतं स्यात्।
4. महाकाव्यस्य नायकः कीदृशः स्यात्?
5. चतुर्वर्गफलप्राप्तिः कथं भवेत्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
(Answer the following questions in one or two sentences)

1. महाकाव्ये वर्णनीयविषयाः के ?
2. महाकाव्ये प्रयुज्यमानाः रसाः के ?

## निर्दिष्टाभ्यासः (Assignments)

महाकाव्यलक्षणं निरुपयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. काव्यादर्शे।
2. आशीः, नमस्क्रिया, वस्तुनिर्देशः च।
3. महाकाव्यस्य।

4. अस्य नायकः चतुरः, व्यवहारकुशलः, उदात्तः, धीरोदात्तः च भवति।
5. महाकाव्यरचनया।

## सूचनाग्रन्थौ (References)


1. T.K. Ramachandra Ayyar. A Short History of Sanskrit Literature, R.S Vadhyar & Sons Kalpathy Palakkad 678003
2. Acharya Lokamani Dahala. Samskruthasahityethihasah, Chowkhamba Krishnadas academy, Varanasi


## अधिकवाचनाग्रन्थाः(Suggested readings)


1. A Companion to Sanskrit Literature, Banergy S.C, Motilal Banarsidas Publishers, Delhi,1989
2. A History of Sanskrit Literature, Macdonell A .A, Motilal Banarsidas Publishers, Delhi,1990.
3. Glimpses of Sanskrit literature, A.N.D Haksar, ICCR& New age International limited publishers.
4. History of Classical Sanskrit Literature, M. Krishnamachariar, Motilal Banarsidas Publishers, Delhi,1990

# Unit - 4
# कुमारसम्भवस्य महाकाव्यलक्षणानुसारं अवलोकनम्

## उद्देश्यानि (Learning Outcomes)

- महाकाव्यस्वरूपस्य काव्यसौन्दर्यतत्वस्य चावबोधनम्।
- महाकाव्यमधिकृत्य उद्बोधनम्।
- कुमारसम्भवस्य सविशेषाध्यायनम्।
- काव्यास्वादने प्रावीण्यसम्पादनाय, सौन्दर्यानुभूतये, मूल्यानामवगमनं च।

## प्राग्व्यपेक्षाः (Prerequisites)

प्रियपठितारः

अस्माभिः तृतीये खण्डे महाकाव्यलक्षणं अधीतवन्तः। अधुना चतुर्थे एकके कुमारसम्भवस्य महाकाव्यस्य लक्षणानुसारं अवलोकनं कुर्मः।

## मुख्यपदानि (Keywords)

वस्तुनिर्देशं, हिमालयपर्वतवर्णना, कठिनं तपः, रतिविलापम् , पार्वत्याः परिणयम्, कुमारस्य उत्पत्तिः

## Discussion

लोकपितॄणां पावनचरितप्रतिपादकं महाकाव्यं भवति कुमारसम्भवम्। प्रतिपादनसौकुमार्यतया प्रतिपाद्यवैशिष्ट्यतया आलोचनामृतवर्णविलासेन च प्रथमगणनीयं भवति एतन्महाकाव्यम्। लक्षणयुक्तं महाकाव्यं भवति कुमारसम्भवम्। काव्यमिदं सप्तदशसर्गात्मकं अस्ति। आशीर्नमस्क्रियावस्तुनिर्देश इति वस्तुनिर्देशेनेदं काव्यम् आरभते।

यथा-

**अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधी वगाह्य**

**स्थितः पृथिव्या इव मानदण्डः।। इति।**

पुनः पर्वतादिवर्णना। काव्येऽस्मिन् प्रथमे सर्गे हिमालयपर्वतवर्णना नितरां शोभमाना भवति। स हिमवान् मेघमण्डलादपि ऊर्ध्वस्थः अस्ति। स स्थावरराजः सिद्धानां वर्षाकालस्य तथा आतपकालस्य चानुभवे महासौध इव तिष्ठति।

पश्य -

**आमेखलं सञ्चरतां घनानां**
**छायामधः सानुगतां निषेव्य।**
**उद्वेजिता वृष्टिभिराश्रयन्ते**
**श्रृङ्गाणि यस्यातपवन्ति सिद्धाः।। इति।**

वनगजाः कपोलकण्डूः विनेतुं सरलवृक्षेषु विघट्टयन्ति। तदा तस्माद् वृक्षात् प्रस्नुतक्षीरस्य गन्धेन पर्वतस्य सानूनि सदा सुरभीकरोति।

यथा

**कपोलकण्डूः करिभिर्विनेतुं**
**विघट्टितानां सरलद्रुमाणाम्।**
**यत्र स्नुतक्षीरतया प्रसूतः**
**सानूनि गन्धः सुरभीकरोति ।। इति।**

चामरवीजनं राजचिह्नं भवति खलु। अत्र पर्वतराजं चमर्यः बालव्यजनैः वीजयन्तीव।

पश्य-

**लाङ्गूलविक्षेपविसर्पिशोभै**
**रितस्ततश्चन्द्रमरीचिगौरैः।**
**यस्यार्थयुक्तं गिरिराजशब्दं**
**कुर्वन्ति वालव्यजनैश्चमर्यः।।इति।**

महाकाव्यलक्षणानुसारं प्रशोभमाने अस्मिन् काव्ये जीवनसम्बद्धाः अनुभवाः चित्रिताः सन्ति। पार्वति नगधिराजात् मेनकायां जाता भवति। यौवनमुपगता सा शिवं भर्त्तारं प्राप्तुमभिलषति। शिवप्राप्तिः अनायासेन न भविष्यति इति ज्ञात्वा सा पितुः अनुवादेन तपश्चरणाय आरेभे। कठिनं तपसि प्राप्तां तां परीक्षितुं ब्रह्मचारिवेषेण शिवः प्रत्यक्षो भवति। ततः पूर्वमेव कामदेवस्य बाणेन तपश्चरणात् चालितः शिवः तस्य पुरतः पूजापुष्पैः पूजयन्तीं पार्वतीं दृष्ट्वा चञ्चलचितः बभूव। श्रृङ्गररसस्य परां काष्ठां प्राप्तः सः 'व्यापारयामास विलोचनानि' उमामुखे। तस्य कारणभूतं कामदेवं शिवः तृतीयनेत्रेण भस्मसाञ्चकार। तदानीं

कामदेववधूः रतीदेवी विलपति। तद्विलापं चतुर्थे सर्गे कविः वर्णयति। विप्रलम्भे तु चतुर्थसर्गे रतिविलापम्। कामदेवस्य दहनानन्तरं विलपन्त्याः रतीदेव्याः वियोगदुःखं कस्य वा सहृदयस्य मनः न दूयते। न

पश्य तस्याः विलापम् -

**उपमानमभूद्विलासिनांकरणं यत्तव कान्तिमत्तया।**

**तदिदं गतमीदृशीं दशां न च दीर्यः कठिनाः खलु स्त्रियः।।**

एवमादि। पार्वत्याः पुरतः शिवेन कामदेवदहनम्। पार्वती स्वस्य सौन्दर्यनिन्दा। प्रियेषु सौभाग्यफला हि चारुता इति तस्याः चिन्ता। पुनः शिवं भर्तारमाप्तुं गौर्य्याः कठिनं तपः। तपसः अनन्तरफलत्वेनेव महेश्वरेण सह पार्वत्याः समागमः। महाकाव्येऽस्मिन् नायिकानायकयोः चित्रणं मनोहररीत्या कविना कृतम्। वर्णानापाटवे कालिदासः अद्वितीयः भवति। पार्वत्याः तपश्चरणवेलायामपि तस्याः सौन्दर्यं नितरां प्राशोभत।

**यथा प्रसिद्धैर्मधुरं शिरोरूहैर्जटाभिरप्येवमभूत्तादाननम्।**

**न षड्पदेश्रेणिभिरेव पङ्कजं सशैवालसङ्गमपि प्रकाशते॥**

अपि च पार्वती अधररागात् स्तनाङ्करागात् कन्दुकक्रीडायाः च निवृत्ता। दर्भाङ्कुरग्रहणेनैव परिक्षताङ्गुलिः तस्याः करः जपमालप्रियः आसीत्।

प्रकृतिचित्रणेऽपि महाकाव्यलक्षणमनुसरति कुमारसम्भवम्। प्रकृतिं मातरमिव मन्यते कालिदासः।लताः हरिणाङ्गनाः च कथापात्राणि इव वर्तन्ते। अतः पार्वत्याः विलासचेष्ठितं लतासु विलोलदृष्टं हरिणाङ्गनासु चार्पितम्।

पार्वती स्वहस्ताभ्यां पादपान् कलशकुचजलैरवर्धयत्। प्रथमम् आप्तजन्मसु तेषु वृक्षेषु यः पुत्रस्नेहः संजातः सः स्नेहः कुमारोत्पत्तावपि न दूरीचकार।

**अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणवर्धयत्।**

**गुहेऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति।इति।**

अतः एव वक्तुं शक्यते कुमारसम्भवम् उत्तममेकं महाकाव्यमिति।

## पुनरावृत्तिः (Recap)

- लक्षणयुक्तं महाकाव्यं भवति कुमारसम्भवम्।
- वस्तुनिर्देशेनेदं काव्यम् आरभते।
- काव्येऽस्मिन् प्रथमे सर्गे हिमालयपर्वतवर्णना नितरां शोभमाना भवति।
- विप्रलम्भं तु चतुर्थसर्गे रतिविलापम्।
- पार्वत्याः पुरतः शिवेन कामदेवदहनम्।
- भर्तारमाप्तुं गौर्य्याः कठिनं तपः।
- तपसः अनन्तरफलत्वेनेव महेश्वरेण सह पार्वत्याः परिणयः।
- कुमारस्य उत्पत्तिः।
- नायिकानायकयोः चित्रणम्।
- पार्वत्याः तपश्चरणवेलायां सौन्दर्यवर्णना।
- प्रकृतिचित्रणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. कस्मिन् सर्गे हिमालयपर्वतादिवर्णना अन्तर्भवति?
2. पार्वती कस्य अनुवादेन तपश्चरणाय आरेभे?
3. रतिविलापं कस्मिन् सर्गे वर्णयति?
4. कालिदासः प्रकृतिं काम् इव मन्यते?

## निर्दिष्टाभ्यासः (Assignments)

1. कुमारसम्भवे कालिदासस्य प्रकृतिचित्रणम्।
2. चतुर्थे सर्गे रतिविलापः।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. प्रथमे
2. पितुः
3. चतुर्थे
4. मातरमिव

## सूचनाग्रन्थौ (References)


1. दण्डी, काव्यादर्शः, व्याख्याकारः आचार्य श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवनं, वारणासि 19981
2. काव्यप्रकाशः. मम्मटाचार्यः (नागेश्वरीटीकासहितः) चौखम्बाप्रकाशन् वारणासि 2019
3. कुमारसम्भवम्. कालिदासः, (पञ्चमसर्गः) (सुधासंस्कृत-हिन्दीव्याख्योपेतं) परमेश्वरदीनपाण्डेयः चौखम्बकृष्णदास अकादमी, वारणसी।


## अधिकवाचनाग्रन्थाः(Suggested readings)


1. संस्कृतसाहित्येतिहासः.आचार्य, श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवनं, वारणासि 221001
2. भामहः, काव्यालङ्कारः, मोद्दिलाल् बनारसीदास् 1970
3. T K Ramachandra Ayyar. A Short History of Sanskrit Literature published by R S Vadhyar &sons Kalpathy Palakad 678003

BLOCK-2

# कुमारसम्भवम् - पञ्चमः सर्गः

SGOU

# Unit - 1
# पार्वत्याः तपश्चर्योद्यमः – श्लोकाः 1 - 17

## उद्देश्यानि (Learning Outcomes)

- महाकाव्यानि पठित्वा तेषां सविशेषावगमनाय ।
- कुमारसम्भवस्य सविशेषाध्ययनाय।
- काव्यास्वादने प्रावीण्यसम्पादनाय, सौन्दर्यानुभूतये, मूल्यानामवगमनाय च।
- काव्यार्थस्य भावस्य चावबोधाय ।
- पार्वत्याः तपश्चर्योद्यमोऽवगनाय।

## प्राग्व्यपेक्षाः (Prerequisites)

प्रियपठितारः,

लौकिकसाहित्यमधिकृत्य चर्चा कृता। पुनः महाकाव्यानि, प्रसिद्धपञ्चमहाकाव्यानि इत्यादिकं चाधिकृत्य पठितम्। महाकविकालिदासेन विरचितस्य कुमारसम्भवस्य पञ्चमसर्गः अस्माकं पाठ्यविषयः। अस्मिन् खण्डे प्रथमे एकके पार्वत्याः तपश्चर्योद्यमं विशदीकरोति। तान् विषयान् पश्यामः।

## मुख्यपदानि (Keywords)

महाकविः कालिदासः, कविकुलगुरुः, कवेः प्रतिभा, समञ्जससम्मेलनम्, वैदर्भी, उपमा, उत्प्रेक्षा, उपमा कालिदासस्य, कविरेकः प्रजापतिः, नवरत्नानि, अनामिका, बाणभट्टः, रघुवंशः, कुमारसम्भवम्, लघुत्रयी, बृहत्रयी, पिनाकिना भग्नमनोरथा, तपःसमाधये, चारुता सौभाग्यफला।

## Discussion

### 2.1.1 महाकविः कालिदासः

विश्वप्रसिद्धो भवति कविकुलगुरुः इति प्रथितः महाकविः कालिदासः। खण्डकाव्यरचनायां, महाकाव्ये, नाटकरचनायां, सन्देशकाव्यनिर्माणे च तस्य कवेः प्रतिभा अनितरसाधारणी एव। ये गुणाः

काव्यस्य रचनायामावश्यकाः तेषां समञ्जसमेलनं कालिदासकृतिषु द्रष्टुं शक्यते। वैदर्भीरीतिप्रियः आसीत् सः। प्रसादगुणगुम्भने नितरां तत्परः सः उपमायाम्, उत्प्रेक्षादिप्रयोगेऽपि अनितरसाधारणः आसीत्। 'उपमा कालिदासस्य' इत्यस्ति प्रथा। 'अपारे काव्यसंसारे कविरेकः प्रजापतिः' इति कथनं कालिदासः अन्वर्थं चकार। काव्यप्रपञ्चे सः प्रजापतिरेव ।

उक्तं च -

**पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।**

**अद्यापि तत्तुल्यकवेरभावादनामिकासार्थवती बभूव ।। इति।**

कालिदासस्य जीवनकालमधिकृत्य मतभेदाः दृश्यन्ते। सर्-विल्यं-जौण्स् महोदयः क्रिस्तोः पूर्व कस्यापि विक्रमादित्यस्य राज्ञः सभायां अलङ्कृतवानिति मत्वा तस्य कालः ई. पू. प्रथमशतकम् इति मन्यते। तस्य सभायामलङ्कृतेषु नवरत्नेषु अन्यतमो इति।

**धन्वन्तरिक्षपणकामरसिंहशंकुवेतालभट्टघटकर्परकालिदासाः।**

**ख्यातो वराहमिहिरो नृपतेर्सभायां रत्नानि वे वररुचिर्नवविक्रमस्य ।। इति ।।**

डा. वेबर् लोसन्, याक्कोबी इत्यदीनां महानुभावानां सम्मतिषु ई. द्वितीयशतकमध्यमकालिकत्वं कालिदासस्य स्वीक्रियते। ए. वि. कीत्, विन्सन्ट् महोदयौ ई. चतुर्थशतकं, प्रोफ, माक्स्मुल्लर् महोदयः ई. षट् शतकं च कालिदासस्य जीवनकालत्वेन निश्चितवन्तः।

बाणभट्टः स्वकीयग्रन्थस्य हर्षचरितस्य प्रारम्भे कालिदासमधिकृत्य एवं परामृशति।

**'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।**

**प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते।।' इति।**

अनेन कालिदासस्य समयः ई. सप्तमशतकमिति गण्यते। महाकविः स्वस्य नाटके मालविकाग्निमित्रे 'प्रथियशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः?' इति सन्देहवाक्यात् 'भासस्य कालानन्तरमेव कालिदासस्य समयः इति वक्तुं शक्यते। एवं कालिदासस्य जीवनकालविषये मतभेदाः दृश्यन्ते।

**कालिदासस्य कृतयः -** रघुवंशः, कुमारसम्भवं चेति महाकाव्ये, मेघदूतम् इति सन्देशकाव्यम्, ऋतुसंहारम् इति लघुकाव्यं, पुनः अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं, मालविकाग्निमित्रम् इति नाटकत्रयं च महाकवेरस्य

प्रधानकृतयः। श्रृङ्गारतिलकं, पुष्पबाणविलासं, मङ्गलाष्टकं, सरस्वतीस्तोत्रं, श्यामलादण्डकमित्यादिकमपि कालिदासस्य रचनाः इति गण्यन्ते किल।

### 2.1.2 कुमारसम्भवम्।

पञ्चमहाकाव्येष्वन्यतमं भवति महाकवेः कालिदासस्य कुमारसम्भवम्। काव्येऽस्मिन् सप्तदश सर्गाः सन्ति। कुमारसम्भवं कल्पनावैचित्र्येण वर्णनाविलासेन प्रतिपादनशैल्या च प्रथमगणनीयं भवति। यद्यपि कुमारस्य जन्मना कुमारसम्भव इति नाम तथापि पार्वत्याः तपः, शिवेन सह तस्याः परिणयं एवमादिकमपि अस्मिन् प्राधान्येन वर्ण्यते। कुमारस्य जननादारभ्य तारकासुरवधपर्यन्तं कथा अत्र चित्रीकृता। कुमारसम्भवस्य पञ्चमसर्गः अस्माकं पठनविषयत्वेन स्वीकृतः।

संस्कृतसाहित्ये कुमारसम्भवं, रघुवंशः, मेघदूतम् च, लघुत्रयी। एवं किरातार्जुनीयं, शिशुपालवधं, नैषधीयचरितं बृहत्त्रयी इति च प्रसिद्धं भवति।

**तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।**

**निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ।।१।।**

**व्याख्या -** पार्वती - हिमालयपुत्री पार्वती, तथा - तेन प्रकारेण, समक्षं - पुरतः, मनोभवं - कामदेवं, दहता - भस्मीकुर्वता, पिनाकिना - शिवेन, भग्नमनोरथा सती - निन्दिताभिलाषा सती, हृदयेन - मनसा, रूपं - स्वस्य सौन्दर्यं, निनिन्द - निन्दितवती। हि - यतः, चारुता - रमणीयता, प्रियेषु - वल्लभेषु, सौभाग्यफला - सन्तोषफला (भवति)।

**सारः -** हरकोपानलेन कामदेवं स्वसमक्षं भस्मीकुर्वता शिवेन नष्टमनोरथा पार्वती हृदयेन स्वस्य सौन्दर्यं निन्दितवती। यतः चारुता वल्लभेषु सौभाग्यफला भवति।

**विग्रहः -** पार्वती - पर्वतस्यापत्यं स्त्री पार्वती।

समक्षम् - अक्ष्णोः समक्षं समक्षम्।

पिनाकिना - पिनाकमस्यास्तीति पिनाकी। तेन पिनाकिना।

सौभाग्यफला - सौभाग्यं फलं यस्याः सा सोभाग्यफला।

**क्रियाः** - निनिन्द - णिदि (कुत्सायां) धातु लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।**

**अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ।।२।।**

**व्याख्या** - सा - पार्वती, समाधिम् - एकाग्रताम्, आस्थाय - स्थित्वा, तपोभिः - तपश्चरणैः, आत्मनः- स्वस्य, अवन्ध्यरूपतां - सफलसौन्दर्य, कर्तुं - विधातुं, इयेष - इच्छितवती। अन्यथा - अन्यप्रकारेण, तथाविधं - तादृशं, प्रेम- अनुरागः। तादृशः - तथाविधः, पतिः - भर्ता च, तद् द्वयं - तदुभयं, कथं - केन प्रकारेण वा, अवाप्यते - लभ्यते।

**सारः** - पार्वती एकाग्रतां प्राप्य तपश्चरणैः आत्मनः सौन्दर्यं सफलं कर्तुमभिलषितवती। तदभावे उत्कृष्टं प्रेम शिवसदृशः स्वामी, उभयञ्च केन प्रकारेण प्राप्यते? अर्थात् एतदसम्भवमिति ।

**विग्रहः** - अवन्ध्यरूपत्ताम् - अवन्ध्यं रूपं यस्याः सा अवन्ध्यरूपत्ता, ताम् अवन्ध्यरूपताम्।

**क्रियाः** - इयेष इष् (इच्छायां) धातु लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम्।**

**उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात् ।।३।।**

**व्याख्या** - मेना - हिमालयपत्नी मेना, गिरीशप्रतिसक्तमानसां - हरासक्तचित्तां, तपसे - तपश्चर्याय, कृतोद्यमां - विहितप्रयत्नां, सुतां - पुत्रीं पार्वतीं, निशम्य - श्रुत्वा, एनां - एतां पार्वतीं, वक्षसा - उरसा, परिरभ्य - आलिङ्ग्य, महतः - बृहतः, मुनिव्रतात् - तपोऽनुष्ठानात्, निवारयन्ती - निषेधयन्ती सती, उवाच - अवोचत्।

**सारः** - पार्वतीमाता मेना शिवासक्तचित्तां तपसे विहितप्रयत्नां स्वपुत्रीं पार्वतीं श्रुत्वा एनां वक्षसा आलिङ्ग्य कठिनतपश्चर्यात् निवारयन्ती अवोचत्।

**विग्रहः** - कृतोद्यमाम् - कृतः उद्यमः यया सा कृतोद्यमा, तां कृतोद्यमाम्।

**क्रियाः** - उवाच - ब्रूञ् (व्यक्तायां वाचि) धातु लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्। .

**मनीषिताः सन्ति गृहेषु देवताः तपः क्व वत्से क्व च तावकं वपुः।**

**पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ।।४।।**

**व्याख्या** - हे वत्से - हे सुते! मनीषिताः - अभीष्टाः, देवताः - देवाः, गृहेषु - भवनेषु, सन्ति - वर्तन्ते, तपः - तपस्या, क्व - कुत्र, तावकं - त्वदीयं, वपुः - शरीरं, क्व - - - - कुत्र ? पेलवं - कोमलं, शिरीषपुष्पं - शिरीषकुसुमं, भ्रमरस्य - मधुपस्य, पदं - चरणस्थितिं, सहेत - सोढुं शक्नुयात्। पुनः - भूयः, पतत्रिणः - पक्षिणः, न सोढुं - न शक्नुयुः।

**सारः -** हे पुत्रि! अभीष्टाः देवताः गृहेषु सन्ति, ताः यथेष्टम् आराधय। कठिनतपः तव कोमलशरीरेण कर्तुमसाध्यम् अस्ति। कोमलं शिरीषपुष्पं मधुपस्य पदं सोढुं समर्थम्। किन्तु पक्षिणः पदस्थितिं सोढुं कदापि न सहते।

**विग्रहः -** मनीषिताः - मनसा ईषिताः मनीषिताः।

**क्रियाः -** सन्ति - अस् (अस भुवि) धातु लट् परस्मैपदि प्रथमपुरुषः बहुवचनम्।

**इति ध्रुवेच्छामनुशासतीसुतां शशाक मेना न नियन्तुमुद्यमात्।**

**क ईप्सितार्थस्थिरनिश्चयंमनः पयश्च निम्नाभिमुखं प्रतीपयेत्।।५।।**

**व्याख्या -** इति - एवं, अनुशासती - उपदिशन्ती, मेना - पार्वतीमाता मेना, ध्रुवेच्छां - स्थिरचित्तां, सुतां - पुत्रीं, उद्यमात् - तपश्चरणोद्योगात्, नियन्तुं - निवारयितुं न शशाक - समर्था नाभूत्। ईप्सितार्थस्थिरनिश्चयं - अभीष्टवस्तुनि स्थिरनिश्चयं, मनः - चेतः, निम्नाभिमुखम् - अधोमुखं, पयः - जलं च, कः प्रतीपयेत् - कः प्रतिकूलयेत्, न कश्चित् इति भावः।

**सारः -** एवमुपदिशन्ती पार्वतीजननी मेना दृढनिश्चयां पुत्रीं पार्वतीं तस्मान्निवारयितुं न शशाक। अभीष्टार्थस्थिरं मनः निम्नगतिकं जलं च कः प्रतिकूलयेत् ? न कोऽपि इति।

**क्रियाः -** शशाक - शक् (शक्लृ शक्तौ) लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**कदाचिदासन्नसखीमुखेनसा मनोरथज्ञं पितरं मनस्विनी।**

**अयाचताऽरण्यनिवासमात्मनःफलोदयान्ताय तपः समाधये।।६।।**

**व्याख्या -** कदाचित् - कदापि, मनस्विनी -स्थिरचित्ता, सा - असौ पार्वती, मनोरथज्ञं - अभिलाषज्ञं, पितरं - जनकं हिमालयं, आसन्नसखीमुखेन - समीपस्थसख्या, फलोदयान्ताय - फलप्राप्तये, तपः समाधये - तपश्चरणाय, आत्मनः - स्वस्य, अरण्यनिवासं - वनवासं, अयाचत - याचितवती।

**सारः** - स्थिरचित्ता सा पार्वती यथावसरं सखीमुखेन स्वपितरं हिमालयं फलप्राप्तिपर्यन्तं तपसे वनवासं याचितवती।

**विग्रहः -** मनस्विनी - मनः अस्यास्तीति मनस्विनी।

मनोरथज्ञम् - मनोरथं जानातीति मनोरथज्ञः, तम्।

फलोदयान्ताय - फलस्य उदयः फलोदयः, सः अन्तः यस्य सः फलोदयान्तः, तस्मै।

**क्रियाः -** अयाचत - याच् ( डुयाचृ यञ्चायाम्) धातु लङ् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

**अथानुरूपाभिनिवेशितोषिणाकृतभ्यनुज्ञा गुरुणा गरीयसा।**

**प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरीशिखरं शिखण्डिमत्। । ७ ।।**

**व्याख्या -** अथ - अनन्तरं, गौरी - पार्वती, अनुरूपाभिनिवेशितोषिणा - अनुकूलाग्रहसन्तुष्टेन, गरीयसा - पूज्यतमेन, गुरुणा - पित्रा, कृतभ्यनुज्ञा - कृतानुवादा, पश्चात् - अनन्तरं, प्रजासु - जनेषु, तदाख्यया - गौरीनाम्ना, प्रथितं - प्रख्यातं, शिखण्डिमत् शिखरं - मयूरमण्डितश्रुङ्गं, जगाम - गतवती।

**सारः -** अनन्तरं पार्वती योग्याग्रहसन्तुष्टेन पूज्येन गुरुणा हिमवता प्राप्तानुदेशा सती गौरी जनेषु पश्चात् गौरीशिखरम् इति नाम्ना प्रसिद्धं पर्वतश्रृङ्गं ययौ।

**विग्रहः** - कृताभ्यनुज्ञा - कृता अभ्यनुज्ञा यस्मै सा कृताभ्यनुज्ञा।

तदाख्यया - तस्याः आख्या तदाख्या, तया तदाख्यया।

**क्रियाः -** जगाम - गम् (गम्लृ-गतौ) धातु परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।

**विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम्।**

**बबन्ध बालारुणबभ्रुवल्कलंपयोधरोत्सेघविशीर्णसंहतिः।।८।।**

**व्याख्या** – अहार्यनिश्चया - अनिवार्यनिर्णया, सा - पार्वती, विलोलयष्टिप्रविलुप्तचन्दनं - चपलप्रतिसरप्रमृष्टचन्दनं, हारं मुक्तावलिं, विमुच्य - विहाय, बालारुणबभ्रु - उदयसूर्यपिङ्गलं, पयोधरोत्सेर्घाविशीर्णसंहतिः - स्तनोच्छ्रायविघटितावयवसंश्लेषं, वल्कलं - स्तनावरणं वल्कलं, बबन्ध अधारयत् ।

**सारः**- दृढनिश्चया पार्वती, स्वहरिचन्दनाङ्कितं मुक्ताहारं विमुच्य प्रभातसूर्यारुणं वल्कलम्, अधारयत्।

विग्रहः - अहार्यनिश्चया - अहार्यः निश्चयः यस्याः सा।

बालारुणबभ्रु - बालश्चासौ अरुणः बालारुणः तथा बभ्रुः तत्।

**क्रियाः -** बबन्ध - बन्ध् (बन्ध् बन्धने) धातु लिट् परस्मैपदी लिट् प्रथमपुरुषः एकवचनम् ।

**यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।**

**न षड्पदश्रेणिभिरेव पङ्कजं सशैवालसङ्गमपिप्रकाशते ।।९।।**

**व्याख्या -** तदाननं- पार्वतीमुखं, प्रसिद्धैः भूषितैः, शिरोरुहैः - केशैः, यथा - येन प्रकारेण, मधुरं - प्रियम्, अभूत् - वभूव, नटाभिः - जटाभिः अपि, एवं - तथा, मधुरं बभूव। पङ्कजं - कमलं, षड्पदश्रेणिभिः - अलिपङ्क्तिभिः, एवं न - न (प्रकाशते)। किन्तु - परन्तु, सशैवालसङ्गम् - शैवालसम्पर्कयुक्तं, सदापि प्रकाशते - प्रकाशितं भवति।

**सारः -** पार्वत्याः मुखं विभूषितैः केशैर्येन प्रकारेण प्रियं अभूत् तथा जटाभिरपि। कमलं षड्पदश्रेणिभिरेव न प्रकाशते। अपि तु शैवालसम्पर्कयुक्तं सदपि प्रकाशते।

**विग्रहः -** षड्पदश्रेणिभिः - षट् पदानि येषां ते षड्पदाः, तेषां श्रेणिभिः।

**क्रियाः -** अभूत् - भू (सत्तायाम्) धातु लुङ् परस्मैपदि प्रथपुरुषः एकवचनम्।

प्रकाशते - प्र इत्युपसर्गपूर्वक काश् ( काशृ दीप्तौ) लट् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

**प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम्।**

**अकारि तत्पूर्वनिबद्धया तया सरागमस्याः रशनागुणास्पदम्। ।१०।।**

**व्याख्या -** सा- पार्वती, प्रतिक्षणं - क्षणे क्षणे, कृतरोमविक्रियां - विहितरोमाञ्चां, त्रिगुणां - त्रिरावृतां, यां मौञ्जीं - मुञ्जमेखलां, व्रताय - तपश्चरणाय, बभार धारयामास। तत्पूर्वनिबद्धया - तत्प्रथमनिबद्धया, तया - मौञ्ज्या, अस्याः - पार्वत्याः, रशनागुणास्पदं - मेखलासूत्रस्थानं जघनं, सरागं - रागवर्णतां, अकारि - कृतम्।

**सारः -** पार्वती प्रतिक्षणं कृतरोमाञ्चां त्रिरावृतां यां मौञ्जीं तपश्चरणाय धारयामास तत्प्रथमनिबद्धया तया मौञ्ज्या पार्वत्याः जघनं अरुणमकारि।

**विग्रहः -** त्रिगुणाम् - त्रयः गुणाः यस्याः सा त्रिगुणा, ताम्।

रशनागुणास्पदम् - रशनायाः गुणः रशनागुणः, तस्यास्पदं रशनागुणास्पदम् ।

सरागम् - रागेण सहितम्

**क्रियाः -** अकारि - कृञ् (डुकृञ् करणे) धातु कर्मणि लुङ् प्रथपुरुषः एकवचनम्।

**विसृष्टरागादधरान्निवर्तितःस्तनाङ्गरागारुणिताश्चकन्दुकात्।**

**कुशाङ्कुरादानपरिक्षताङ्गुलिःकृतोऽक्षसूत्रप्रणयी तया करः ।।११।।**

**व्याख्या -** तया - पार्वत्या, विसृष्टरागात् - त्यक्तरागात्, अधरात् - ओष्ठात्, निवर्तितः - निवारितः, स्तनाङ्गरागारुणितात् - पयोधराङ्गरक्तात्, कन्दुकात् - गेन्दुकात्, च (निवर्तितः) कुशाङ्कुरादानपरिक्षताङ्गुलिः - दर्भाङ्गुरग्रहणेन विक्षताङ्गुलिः, करः - हस्तः, अक्षसूत्रप्रणयी - जपमालासहितः, कृतः - विहितः।

**सारः -** पार्वती अधररागात् स्तनाङ्करागात् कन्दुकक्रीडायाः च निवृत्ता। दर्भाङ्कुरग्रहणेन परिक्षताङ्गुलिः तस्याः करः जपमालाप्रियः आसीत्।

**विग्रहः -** विसृष्टरागात् - विसृष्टः रागः यस्मात् सः विसृष्टरागः, तस्मात् विसृष्टरागात्।

अक्षसूत्रप्रणयी - अक्षाणां सूत्रं अक्षसूत्रं, प्रणयः यस्य अस्तीति प्रणयी, अक्षसूत्रस्य प्रणयी अक्षसूत्रप्रणयी।

**महार्हशय्यापरिवर्तनच्युतैःस्वकेशपुष्पैरपि या स्म दूयते ।**

**अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ।।१२।।**

**व्याख्या -** महार्हशय्यापरिवर्तनच्युतैः - बहुमूल्यतल्पलुण्ठनपतितैः, स्वकेशपुष्पैः - आत्मकचकुसुमैः, अपि सा - पार्वती, दूयते स्म - दुःखिता भवति स्म, सा - सा पार्वती, बाहुलतोपधायिनी - भुजलतोपबर्हधारिणी सती, केवले स्थण्डिले एव - केवले भूमौ एव, निषेदुषी - निषण्णा सती, अशेत - शेते स्म।

**सारः -** सा पार्वती पूर्वं बहुमूल्यतल्पपरिवर्तनपतितैः स्वकेशकुसुमैः दुःखिता भवति स्म। सैव अधुना तपोनुष्ठाने भूजलतोपबर्हधारिणी केवलं भूमौ एवोपविष्टा शयितवती।

**विग्रहः -** स्वकेशपुष्पैः - स्वकेशानां पुष्पाणि स्वकेशपुष्पाणि, तैः।

बाहुलतोपधायिनी - बाहुरेव लता बाहुलता, तामुपधत्ते तच्छीला सा।

**क्रियाः -** दूयते - दूङ् ( दूङ् उपतापे) धातु कर्मणि लट् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

अशेत - शीङ् (शीङ् शयने) धातु लङ् आत्मने प्रथमपुरुषः एकवचनम्।

**पुनर्ग्रहीतुं नियमस्थया तया द्वयेऽपि निक्षेप इवार्पितं द्वयम्।**

**लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च। ।१३।।**

**व्यख्या** - नियमस्थया - गृहीतव्रतया, तया - पार्वत्या, तन्वीषु - कृशासु, लतासु - वल्लीषु, विलासचेष्टितं - विभ्रमचेष्टितं, हरिणाङ्गनासु - मृगीषु, विलोलदृष्टं - चञ्चलदृष्टं च, द्वयेऽपि - उभयेऽपि, पुनः - भूयः, गृहीतुं - आदातुं, निक्षेपः - न्यासः, अर्पितं दत्तम् इव।

**सारः -** नियमस्था पार्वती स्वविलासचेष्टितं कृशलतासु चञ्चलावलोकनं मृगीषु च निचिक्षेप। द्वयेऽपि पुनर्ग्रहीतुं निक्षेप इवासीत्।

**विग्रहः -** नियमस्थया - नियमे तिष्ठतीति नियमस्था, तया।

विलासचेष्टितम् - विलास इव चेष्टितम्।

हरिणाङ्गनासु - हरिणानाम् अङ्गनाः हरिणाङ्गनाः, तासु।

**अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत्।**

**गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति। ।१४।।**

**व्याख्या -** सा - पार्वती, स्वयमेव - आत्मनैव, अतन्द्रिता - अनलसा सती, वृक्षकान् - पादपान्, घटस्तनप्रस्रवणैः - कलशकुचप्रसृतैर्जलैः, व्यवर्धयत् – वर्धितवती। गुहः अपि - कार्तिकेयः अपि, प्रथमाप्तजन्मनां - प्रथमजातानां, येषां - वृक्षाणां, पुत्रवात्सल्यं - सुतस्नेहं, न अपाकरिष्यति - न दूरीकरिष्यति।

**सारः -** आलस्यरहिता सा पार्वती स्वहस्ताभ्यां पादपान् कलशकुचजलैः अवर्धयत्। प्रथमाप्तजन्मसु येषु वृक्षेषु संजातपुत्रस्नेहः पश्चात् जातकुमारस्नेहेन सा न दूरीचकार ।

**विग्रहः -** अतन्द्रिता - नास्ति तन्द्रा यस्याः सा।

प्रथमाप्तजन्मनाम् - प्रथमे आप्तं प्रथमाप्तं, तत् जन्म येषां ते प्रथमाप्तजन्मानः, तेषाम्।

**क्रियाः -** अपाकरिष्यति - अप +आङ् पूर्वक कृञ् धातु लृट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

व्यवर्धयत् - वि इत्युपसर्गपूर्वक वृध् (वृधु वृद्धौ) धातु णिजन्तात् लङ् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**अरण्यबीजाञ्जलिदानलालितास्तथाच तस्यां हरिणाः विशश्वसुः।**

**यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीतलोचने। ।१५।।**

**व्याख्या -** अरण्यबीजाञ्जलिदानलालिताः - नीवाराञ्जलिदानपालिताः, हरिणाः - मृगाः, च तस्यां - पार्वत्यां, तथा - तेन प्रकारेण, विशश्वसुः - विश्वासं प्रापुः, यथा - येन प्रकारेण, कुतूहलात् - औत्सुक्यात्, तदीयैः नयनैः - हरिणाक्षिभिः, लोचने - नेत्रे, सखीनां - आलीनां, पुरः - समक्षं, अमिमीत - मानं चकार ।

**सारः** - नीवारकणप्रदानपालिताः मृगाश्च पार्वत्यां तथा विशश्वसुः यथा औत्सुक्यात् हरिणनयनैः स्वनेत्रे सखीनां समक्षं मानं चकार ।

**क्रियाः -** विशश्वसुः - वि पूर्वक श्वस् (श्वस् प्राणने) धातु लिट् परस्मैपदि प्रथमपुरुषः बहुवचनम्।

अमिमीत - माङ् (माङ् माने शब्दे च) धातु लङ् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

**कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनाम्।**

**दिदृक्षवस्तामृषयोऽभ्युपागमन्नधर्मवृद्धेषु वयः समीक्ष्यते।।१६।।**

**व्याख्या -** कृताभिषेकां - विहितस्नानां, हुतजातवेदसं - हुताग्निकां, त्वगुत्तरासङ्गवतीं - वल्कलोत्तरीयवतीं, अधीतिनीं - स्तुतिपाठादि कुर्वाणां, तां - पार्वतीं, दिदृक्षवः - द्रष्टुमिच्छवः, ऋषयः - मुनयः, अभ्युपागमन् - समागताः। धर्मवृद्धेषु - तपश्चर्येण श्रेष्ठेषु, वयः - अवस्था, न समीक्ष्यते - न प्रमाणोक्रियते ।

**सारः** - तपसा पूताः महर्षयः कृतस्नानां होमाग्निकां वल्कलोत्तरीयवतीं स्तुतिपाठादीन् कृतवतीं पार्वतीं द्रष्टुमिच्छन्तः तस्याः समीपमुपगताः। यतः धर्मवृद्धेषु वयोवृद्धत्वं न प्रधानं भवति।

**विग्रहः -** कृताभिषेकाम् –कृतः अभिषेकः यया सा कृताभिषेका, ताम्।

हुतजातवेदसम् - हुतः जातवेदाः यया सा, ताम्।

त्वगुत्तरासङ्गवतीम् - उत्तरे आसज्यते इति उत्तरासङ्गः। उत्तरासङ्गः अस्य अस्तीति उत्तरासङ्गव - वती, त्वचा उत्तरासङ्गवती त्वगुत्तरासङ्गवती, ताम्।

**क्रियाः -** अभ्युपागमन् - अभि उप उपसर्गद्वयपूर्वक गम् धातु लुङ् परस्मैपदि प्रथमपुरुषः बहुवचनम्।

समीक्ष्यते - सम् इत्युपसर्गपूर्वक ईक्ष् ( ईक्ष् दर्शने) धातु कर्मणि लट् प्रथमपुरुषः एकवचनम्।

**विरोधिसत्वोज्झितपूर्वमत्सरंद्रुमैरभीष्टप्रसवार्चितातिथि।**

**नवोटजाभ्यन्तरसंभृतानलंतपोवनं तच्च बभूव पावनम्। ।१७।।**

**व्याख्या -** विरोधिसत्वोज्झितपूर्वमत्सरं – सिंहव्याघ्रादिवैरजन्तुभिः त्यक्तवैरं, द्रुमैः - वृक्षैः, अभीष्टप्रसवार्चितातिथि - इष्टफलपूजिताभ्यागतम्, नवोटजाभ्यन्तरसंभृतानलम् - नूतनपर्णशालान्तर प्रज्वलितवह्निं, तत् - उक्तं च, तपोवनं - आश्रमं, पावनं - पूतं, बभूव - अभूत्।

**सारः** - पार्वत्याः आश्रमे क्रूराः हिंस्रपशवः स्वाभाविकवैरम् उपेक्षितवन्तः। वृक्षाः मधुरफलैरातिथ्यमकुर्वन्। नूतनपर्णशालासु सदा होमाग्निः ज्वलितो बभूव। एवं तपोवनं परिपावनम् अभूत्।

**विग्रहः** - अभीष्टप्रसवार्चितातिथि - अभीष्टैः प्रसवैः अर्चिताः अतिथयः यस्मिन् तत्।

**क्रियाः** - बभूव - भू धातु लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

## पार्वत्याः तपश्चर्योद्यमः।

पार्वत्याः समक्षमेव कामदेवं भस्मीकुर्वता शिवेन निन्दिताभिलाषा पार्वती हृदयेन स्वकीयं सौन्दर्यं निन्दितवती। यतः चारुता वल्लभेषु सौभाग्यफला भवति। सा पार्वती एकाग्रतामास्थाय तपोभिः आत्मनः सफलसौन्दर्यं कर्तुं इच्छितवती। अन्यथा तथाविधं प्रेम तादृशः पतिः च कथं लभ्यते। तदा पार्वत्याः माता मेना स्वपुत्रीं महतो मुनिव्रतात् निवारयितुं तामवोचत्। हे पुत्रि! अभीष्टाः देवताः गृहेषु सन्ति। तान् आराधय। कठिनं तपः तव कोमलशरीरेण कर्तुम् अशक्यम्। यतः कोमलं शिरीषकुसुमं भ्रमरस्य पदं सहेत। किन्तु पक्षिणः पदं न सहेत। एवमुपदिशन्ती मेना तां पार्वतीं तस्याः दृढनिश्चयात् निवारयितुं न शशाक। अभीष्टार्थस्थिरनिश्चयं मनः निम्नगतिकं जलं च न कोऽपि प्रतिकूलयितुं शक्तः। मनस्विनी सा पार्वती अभिलाषज्ञं पितरं हिमालयं स्वसखीमुखेन फललाभावधये तपस्यायै आत्मनः अरण्यनिवासम् अयाचत। ततः सा पितुः अनुज्ञया पश्चात् गौरीशिखरम् इति प्रथितं शिखण्डिमत् शिखरं जगाम। दृढनिश्चया सा पार्वती हरिचन्दनाङ्कितं मुक्तहारं विमुच्य प्रभातसूर्यारुणं वल्कलं धारयामास। तस्याः आननं प्रसिद्धैः केशैः यथा मधुरम् अभूत् तथा जटाभिः अपि। पङ्कजं षड्पदश्रेणिभिरेव न प्रकाशते किन्तु सशैवालसंगमपि प्रकाशते। पार्वती प्रतिक्षणं कृतरोमाञ्चां त्रिरावृतां मौञ्जीं तपश्चरणाय बभार। तया मोञ्ज्या पार्वत्याः रशनागुणास्पदमरुणं कृतम्। नियमस्था पार्वती स्वविलासचेष्टितं कृशलतासु चञ्चलावलोकनञ्च मृगीषु अनिक्षिपत्। यथा सा ते द्वयोऽपि भूयः उभयमादातुं निक्षेपः कृतः स्यात्। अनलसा सा पार्वती स्वहस्ताभ्यां पादपान् कुचकलशजलैः अवर्धयत्। येषु वृक्षेषु संजाते पुत्रस्नेहे पश्चादुत्पन्नः स्कन्दोऽपि न दूरीकरिष्यति। कृताभिषेकां हुताग्निकां वल्कलीयोत्तरीयवतीं स्तुतिपाठादिकुर्वाणां तां पार्वतीं दिदृक्षवः मुनयः समागताः। धर्मवृद्धेषु वयः न प्रमाणीक्रियते। पार्वत्याः आश्रमे क्रूरजन्तुभिः स्वाभाविकं वैरं त्यक्तम्। वृक्षाः मधुरफलैः आतिथ्यमकुर्वन् । नूतनपर्णशालासु सदा होमाग्निः ज्वलितो बभूव । एवं तत्र दर्शनमात्रेणैव अतिथयः पवित्राः जाताः।

## पुनरावृत्तिः (Recap)

- पार्वत्याः पुरतः एव मनोभवं दहता शिवेन भग्नमनोरथा पार्वती हृदयेन स्वसौन्दर्यं निन्दितवती।
- ततः सा शिवं भर्तारं लब्धुं तपोऽनुष्ठानाय निश्चिकाय।
- माता मेना पार्वतीं तस्मात् कठिनव्रतात् निवारयितुं यतितवती।
- किन्तु पार्वत्याः दृढनिश्चयत्वात् मेना तां नियन्तुं न शक्ताऽभूत्।
- गौरी पितुः अनुमत्या पश्चात् गौरीशिखरम् इति प्रथितं शिखण्डिमत् शिखरं गत्वा तपः अरेभे।
- सा मुक्ताहारं विमुच्य वल्कलं धारयामास।
- मौञ्जीं तपश्चरणाय बभार।
- पार्वती स्वविलासचेष्टितं कृशलतासु चञ्चलावलोकञ्च मृगीषु न्यक्षिपत्।
- सा स्वहस्ताभ्यां पादपान् कुचकलशजलैः अवर्धयत्।
- स्तुतिपाठादिकुर्वाणां तां पार्वतीं दिदृक्षवः मुनयः समागताः।
- पार्वत्याः आश्रमे क्रूरजन्तुभिः स्वाभाविकं वैरं व्यक्तम्।
- वृक्षाः मधुरफलैः आतिथ्यमकुर्वन्।
- नूतनपर्णशालासु सदा होमाग्निः ज्वलितो बभूव।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. ‘अवाप्यते वा कथमन्यथा द्वयम्’ द्वयं किम्?
2. मेना परिरभ्य वक्षसा’- मेना किमुवाच? काम्?
3. शशाक मेना न नियन्तुमुद्यमात् - काम्?
4. अयाचतारण्यनिवासात्मनः- काम् प्रति?
5. हिमवता प्राप्तानुदेश गौरी कुत्र जगाम?
6. विमुच्य सा हारमहार्यनिश्चया - का?
7. कृतोऽक्षयसूत्रप्रणयी तया करः?
8. द्वयेऽपि निक्षेप इवार्पितं द्वयम्- द्वयं किम्?
9. न पुत्रवात्सल्यमपाकरिष्याति। केषाम्?
10. दिदृक्षवस्तामृषयोऽभ्युपागमन् - कीदृशीं पार्वतीम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. निनिन्द रूपं हृदयेन पार्वती - कुतः?
2. उवाच मेना परिरभ्य वक्षसा - कीदृशीम्?
3. शशाक न नियन्तुमुद्यमात् - कीदृशोद्यमात्?
4. तपोवनं तच्च बभूव पावनम्। कथम्?
5. हारम् सरागमस्याः रशनागुणास्पदम् कस्याः? कुतः?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

**ससन्दर्भं व्याख्यात**

1. प्रियेषु सौभाग्यफला हि चारुता।
2. पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।
3. कः ईप्सितार्थस्थितनिश्चयं मनः।
4. पयश्च निम्नाभिमुखं प्रतीपयेत्।
5. न षड्पदश्रेणिभिरेव।

## निर्दिष्टाभ्यासः (Assignments)

1. पार्वत्याः तपश्चर्योद्यमः।
2. कालिदासस्य प्रकृतिवर्णना।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. पतिः प्रेमश्च।
2. पार्वतीं कठिन तपश्चर्यात् निवारयन्तीम् अवोचत्।
3. दृढनिश्चयां पुत्रीं पार्वतीम्।
4. स्वपितरं हिमालयम्।

5. गौरीशिखरम्।
6. पार्वती।
7. कुशाङ्कुरादानपरिक्षताङ्गुलिः।
8. विलासचेष्टितं विलोलदृष्टं च।
9. वृक्षाणाम्।
10. अधीतिनीं पार्वतीम्।

## सूचनाग्रन्थौ (References)


1. परमेश्वरदीनपाण्डेयः. कालिदासः कुमारसम्भवम् (पञ्चमसर्गः) ,सुधासंस्कृत-हिन्दीव्याख्योपेतं चौखम्बाकृष्णदास अक्कादमी, वाराणसी।
2. कुट्टिकृष्णमारार्. कुमारसम्भवम् (गद्यपरिभाषा) मारार् साहित्यप्रकाशम् कल्लयि, कोषिक्कोट्, ६७३००३।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. आचार्य श्रीरामचन्द्रमिश्रः.संस्कृतसाहित्येतिहासः चौखम्बा विद्याभवन्, वाराणसी २२१००१
2. T.K. Ramachandra Ayyar. A Short History of Sanskrit Literature Published by R.S Vadhyar & Sons Kalpathi Palakkad 678003

# Unit - 2

# महत्तरस्तपश्चर्याविशेषः - श्लोकाः 18 - 29

## उद्देश्यानि (Learning Outcomes)

- महाकाव्येषु कुमारसम्भवस्य प्राधान्यं जानाति।
- नूतनपदावलीं वर्धयति।
- पार्वत्याः तपश्चर्यविशेषाः अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

कालिदासस्य कुमारसम्भवे पञ्चमे सर्गे नगधिराजात् मेनकायां जातं पार्वतीं वर्णयति। यौवनमुपगता सा शिवं भर्तारं प्राप्तुमभिलषति। माता मेना पार्वतीं तस्मात् कठिनव्रतात् निवारयितुं यतितवती। किन्तु पार्वत्याः दृढनिश्चयत्वात् मेना तां नियन्तुं न शक्ताऽभूत्। शिवप्राप्तिः अनायासेन न भविष्यति इति ज्ञात्वा सा पितुः अनुवादेन तपश्चरणाय आरभे। अनन्तरं किं सूभूतमिति अस्मिन् एकके पश्यामः।

## मुख्यपदानि (Keywords)

काङ्क्षितं, ससारमेव, नेत्रप्रतिघातिनीं, ऐक्षत, अपाङ्गयोः, अयाचितोपस्थितमम्बु, सहोष्माणममुञ्चदूर्ध्वगम्, निकामतप्ता, पयोधरोत्सेघनिपातचूर्णिताः, क्षपाः, सरोजसन्धानं, अपर्णा।

## Discussion

**यदा फलं पूर्वतपसमाधिना न तावता लभ्यममंस्तकाङ्क्षितम्।**
**तदाऽनपेक्ष्य स्वशरीरमार्दवं तपो महत्सा चरितुं प्रचक्रमे ।।१८।।**

**व्याख्या** - सा - पार्वती, यदा - यस्मिन् काले, तावता - तावत्प्रमाणेन, पूर्वतपसमाधिना - पूर्वतपस्यानियमेन, काङ्क्षितम् - अभिलषितं, फलं - शिववशीकरणरूपं फलं, लभ्यं - प्राप्यं, न अमंस्त - नामन्यत । तदा - तावत्, स्वशरीरमार्दवं - निजदेहसौकुमार्यं, अनपेक्ष्य - विगणय्य, महत् – दुष्करं, तपः - तपस्या, चरितुं - कर्तुं, प्रचक्रमे – आरेभे

**सारः** - पार्वती यदा पूर्वतपसा अभीष्टं शिववशीकरणरूपं प्रयोजनं अलभ्यममन्यत, तदा आत्मशरीरसौकुमार्यं विगणय्य अतिदुष्करं तपः कर्तुम् आरभत।

**विग्रहः -** पूर्वतपसमाधिना - तपसः समाधि तपःसमाधिः, पूर्वश्चासौ तपः समाधिः पूर्वतपसमाधिः तेन।

**क्रियाः -** अमंस्त - मन् धातु (मन् ज्ञाने) लुङ् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

प्रचक्रमे - प्र इत्युपसर्गपूर्वक क्रमु धातु (क्रमु-पादविक्षेपे) लिट् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

(व्याकरणविशेषः प्रोपाभ्यां समर्थाभ्याम् इति प्रारम्भार्थे प्र पूर्वक क्रमु धातोरात्मनेपदत्वम्।)

**क्लमं ययौ कन्दुकलीलयाऽपिया तया मुनीनां चरितं व्यगाह्यत।**

**ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदुः प्रकृत्या च ससारमेव च ।।१९।।**

**व्याख्या** - या - या पार्वती, कन्दुकलीलया - गेन्दुकक्रीडया, अपि क्लमं - ग्लानिं, ययौ - प्राप, तया - तया पार्वत्या, मुनीनां - ऋषीणां, चरितम् - आचरणं, व्यगाह्यत - प्रविष्टम्। ध्रुवं - नूनं, अस्याः - एतस्याः गौर्याः, वपुः - शरीरं, काञ्चनपद्मनिर्मितं - सुवर्णकमलनिर्मितं, अत एव प्रकृत्या - स्वभावेन, मृदु - सुकुमारं च ससारमेव च - कठिनमेव च।

**सारः** - या पार्वती सुकुमारतया कन्दुकक्रीडया अपि ग्लानिं प्राप। सा मुनीनां चरितं कठिनं तपः चकार । नूनम् अस्याः शरीरं स्वर्णकमलरचितम्। अत एव प्रकृत्या सुकुमारं कठिनञ्चापि भवतीति। सुवर्णस्वभावयुक्तत्वात् सारवत् कमलस्वभावत्वात् सुकुमारञ्चेति ।

**विग्रहः -** काञ्चनपद्मनिर्मितम् - काञ्चनं च तत् पद्मं काञ्चनपद्मं, तेन निर्मितम्।

**क्रियाः** - व्यगाह्यत वि पूर्वक गाहू धातु (गाहु विलोडने) कर्मणि लङ् प्रथमपुरुषः एकवचनम्।

**शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।**

**विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत।। २० ।।**

**व्याख्या -** शुचौ - ग्रीष्मे, शुचिस्मिता - विशदमन्दहासा, सुमध्यमा - सुन्दरी, ज्वलतां - दीप्तिमतां, चतुर्णां - चतुःसंख्यकानां, हविर्भुजां - अग्नीनां, मध्यगता - मध्यभागस्था, नेत्रप्रतिघातिनीं - नयनचाकचिक्यकारिणीं, प्रभां - कान्तिं, विजित्य - जित्वा, अनन्यदृष्टिः - नान्यदृष्टिः सती, सा - पार्वती, सवितारं - भास्करं, ऐक्षत - ददर्श ।

**सारः -** ग्रीष्मर्तौ विशदमन्दहासा सा पार्वती पुरतः पृष्टतः पार्श्वयोरुभयोः च होमाग्नौ ज्वलन्तौ तन्मध्ये स्थिता सती सूर्यमेवावलोकयन्ती तपश्चकार ।

**विग्रहः -** सुमध्यमा - शोभनं मध्यमं यस्याः सा।

हविर्भुजाम् - हवींषि भुजन्तीति हविर्भुजः, तेषाम्।

नेत्रप्रतिघातिनीम् - नेत्रे प्रतिहन्ति तच्छीला नेत्रप्रतिघातिनी, ताम्।

अनन्यदृष्टिः - न विद्यते अन्यत्र दृष्टिः यस्याः सा।

**क्रियाः -** ऐक्षत - ईक्ष् धातु (ईक्ष् दर्शने) लङ् आत्मनेपदि प्रथमपुरुषः एकवचनम्।

**तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ।**

**अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ।।२१।।**

**व्याख्या -** सवितुः - सूर्यस्य, गभस्तिभिः - रश्मिभिः, तथा - तेन प्रकारेण, अतितप्तं - सन्तप्तं, तदीयं - तस्याः पार्वत्याः, मुखम् - आननं, कमलाश्रियं - पद्मशोभां, दधौ - बभार। अस्य - मुखस्य, दीर्घयोः - महतोः, अपाङ्गयोः - नेत्रप्रान्तयोः, केवलं - मात्रं, शनैः शनैः - मन्दं मन्दं, श्यामिकया - कालिम्ना, स्थानं - पदं कृतं - विहितम्।

**सारः -** सूर्यकिरणैः तथाविधं तप्तं पार्वत्याः मुखं कमलशोभां धारयामास। मुखस्यायतनेत्रप्रान्तयोः केवलं मन्दं मन्दं कालिम्ना पदं कृतम्।

**विग्रहः -** कमलाश्रियम् - कमलस्य श्रीः कमलश्श्रीः ताम्।

**क्रियाः -** दधौ - उभयदि धाञ् धातु (डुधाञ् धारणपोषणयोः दाने च) लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**अयाचितोपस्थितमम्बुकेवलं रसात्मकस्योडुपतेश्च रश्मयः।**

**बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः।। २२ ।।**

**व्याख्या -** अयाचितोपस्थितं - अप्रार्थितोपस्थितं, केवलं - मात्रं, अम्बु - जलं, रसात्मकस्य - अमृतमयस्य, उडुपतेः - चन्द्रस्य, रश्मयः - मयूखाः, तस्याः - गौर्याः, पारणाविधिः - भक्षणकर्म, बभूव - अभूत्। वृक्षवृत्तिव्यतिरिक्तसाधनः - तरुजीवनाधिकोपायः, पारणाविधिः, न बभूव - नाभूत्।

**सारः -** अप्रार्थितोपस्थितं केवलं जलं अमृतमयस्य चन्द्रस्य रश्मयः च पार्वत्याः भोजनमभवत्। वृक्षजीवनव्यतिरिक्तं किमपि तस्याः व्रतान्तभोजनं नाभवत्।

**विग्रहः -** उडुपतेः - उडूनां पतिः उडुपतिः, तस्य।

पारणाविधिः - पारणायाः विधिः।

वृक्षवृत्तिव्यतिरिक्तसाधनः - वृक्षाणां वृत्तिः वृक्षवृत्तिः, वृक्षवृत्तेः व्यतिरिक्तं तत् साधनं यस्य सः।

**निकामतप्ता विविधेन वह्निना नभश्चरणेन्धनसंभृतेन सा ।**

**तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम्।। २३ ।।**

**व्याख्या -** विविधेन - विभिन्नेन, नभश्चरेण - खेचरेण, इन्धनसम्भृतेन - काष्ठसम्भृतेन, वह्निना - अनलेन, निकामतप्ता - अतिसन्तप्ता, सा - पार्वती, तपात्यये - ग्रीष्मसमाप्तौ, नवैः - नूतनैः, वारिभिः - जलैः, उक्षिता सती - सिक्ता सती, भुवा सह - धरण्या सह, ऊर्ध्वगं - ऊर्ध्वगामिनं, ऊष्माणं - बाष्पं, अमुञ्चत - अत्यजत्।

**सारः-** नभश्चरेण इन्धनसम्भृतेन च विविधेन वह्निना अतिसन्तप्ता सा पार्वती ग्रीष्मावसाने नूतनाम्बुभिः सिक्ता सती भुवा सह ऊष्माणं ऊर्ध्वगं अमुञ्चत्।

**विग्रहः -** नभश्चरेण - नभसि चरतीति नभश्चरः, तेन।

तपात्यये - तपस्य अत्ययः तपात्ययः, तस्मिन् ।

**क्रियाः -** अमुञ्चत् - उभयपदि मुच्लृ धातु (मुच्लृ मोचने) लङ् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेघनिपातचूर्णिताः।**

**वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदविन्दवः।।२४।।**

**व्याख्या -** प्रथमोदबिन्दवः - नूतनजलबिन्दवः, तस्याः - पार्वत्याः, पक्ष्मसु - नयनरोमस्सु, क्षणं - निमिषं, स्थिताः - अवस्थिताः, ताडिताधराः - व्यथितोष्ठाः, पयोधरत्सेघनिपातचूर्णिताः - कुचाग्रपतनजर्जरिताः, वलीषु - उदररेखासु, स्खलिताः - पतिताः, चिरेण - बहुकालेन, नाभिं - तुन्दिं, प्रपेदिरे - प्रविष्टाः।

**सारः -** वर्षारम्भे पतितप्रथमजलबिन्दवः पार्वत्याः नयनरोमस्सु क्षणमवस्थिताः ततः ताडिताधराः पुनः स्तनयोः उपरि पतित्वा जर्जरिताः ते उदररेखासु प्रपतिताः। तदनन्तरं चिरेण नाभि प्रविविशुः।

**विग्रहः** प्रथमोदबिन्दवः - उदस्य बिन्दवः उदबिन्दवः, प्रथमे च ते उदबिन्दवः प्रथमोदबिन्दवः।

ताडिताधराः - ताडितः अधरः यैः ते ताडिताधराः।

**क्रियाः -** प्रपेदिरे - प्रपूर्वक पद् धातुः (पद गतौ) लिट् आत्मनेपदि प्रथमपुरुषः बहुवचनम्।

**शिलाशयां तामनिकेतवासिनींनिरन्तरास्वन्तरवातवृष्टिषु।**

**व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपसाक्ष्यइव स्थिताः क्षपाः ।।२५।।**

**व्याख्या -** निरन्तरासु - अविच्छिन्नासु, अन्तरवातवृष्टिषु - मध्यवायुवर्षासु, अनिकेतवासिनीं - अगृहवासिनीं, शिलाशयां - शिलातलवासिनीं, तां - पार्वतीं, महातपसाक्ष्ये - घोरतपसाक्षित्वे, स्थिताः - विद्यमानाः, क्षपाः - रात्रयः, तडिन्मयैः - विद्युद्रूपैः, व्यलोकयन् इव - अपश्यन् इव।

**सारः -** अविच्छिन्नासु मध्यवायुवर्षासु अगृहवासिनीं प्रस्तरतलशायिनीं पार्वतीं कठिनतपः साक्षित्वे वर्तमानाः निशाः विद्युद्रूपैः अवलोकनैः व्यलोकयन्।

**विग्रहः -** निरन्तरासु - निर्गतम् अन्तरं याभ्यः तासु।

अन्तरवातवृष्टिषु - अन्तरे वाताः यासां ताः अन्तरवाताः, ते च ताः वृष्टयः अन्तरवातवृष्टयः, तासु।

अनिकेतवासिनीं- निकेते वसतीति निकेतवासिनी, न निकेतवासिनी अनिकेतवासिनी, ताम्।

**क्रियाः -** व्यलोकयन् - वि पूर्वक लोक् धातुः (लोकृ दर्शने) लङ् परस्मैपदि प्रथमपुरुषः बहुवचनम्।

**निनाय सात्यन्तहिमोत्किरानिलाःसहस्यरात्रीरुदवासतत्परा।**

**परस्पराक्रन्दिनी चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती ।।२६।।**

**व्याख्या** - सा - सा पार्वती, अत्यन्तहिमोत्किरानिलाः - अतीवतुहिनक्षेपिपवनाः, सहस्यरात्रीः - पौषयामिन्यः, उदवासतत्पराः - जलनिवाससक्ताः, परस्पराक्रन्दिनि - अन्योन्याक्रोशिनि, पुरः - पुरतः, वियुक्ते - वियोगयुक्ते, चक्रवाकयोः - चक्रवाकपक्षिणोः, मिथुने - युग्मे, कृपावती - सती, निनाय - यापयामास।

**सारः -** पार्वती हिमालयस्य शैत्यपूर्णाः पौषनिशाः जलाधिवासनियता सती वियुक्ते चक्रवाकयुगले दयां कुर्वती अयापयत्।

**विग्रहः -** उदवासतत्परा - उदे वासः उदवासः, तस्मिन् तत्परा।

**क्रियाः -** निनाय - उभयपदि णी धातु (णीञ् प्रापणे) लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना।**

**तुषारवृष्टिक्षतपद्मसम्पदांसरोजसन्धानमिवाकरोदपाम्।। २७ ।।**

**व्याख्या -** सा - पार्वती, निशि - रात्रौ, पद्मसुगन्धिना - कमलसुरभिणा, प्रवेपमानाधरपत्रशोभिना - कम्पमानोष्ठदलशोभिना, मुखेन - वदनेन, तुषारवृष्टिक्षतपद्मसम्पदां - तुहिनक्षतकमलसम्पत्तीनां, अपां - वारिणां, सरोजसन्धानं - पद्मसंघटनं, अकरोत् इव - चकार यथा।

**सारः -** सा पार्वती शैत्यरात्रौ सरोजगन्धिना कम्पमानाधरसुन्दरेण मुखेन तुहिनवर्षक्षतकमलसम्पत्तीनां वारिणां सरोजसम्बन्धमिव चकार।

**विग्रहः -** पद्मसुगन्धिना - शोभनः गन्धः यस्य सः सुगन्धिः, पद्म इव सुगन्धिः पद्मसुगन्धिः, तेन।

**क्रियाः -** अकरोत् - उभयपदिनः कृ धातु (डुकृञ् करणे) लङ् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**स्वयं विशीर्ण द्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः।**

**तदप्यपाकीर्णमतःप्रियंवदां वदन्त्यपर्णेति च तां पुराविदः।।२८।।**

**व्याख्या -** स्वयं - अत्मनैव, विशीर्णद्रुमपर्णवृत्तिता - च्युतवृक्षपत्रैः वर्तनत्वं, तपसः – तपस्यायाः, पराकाष्ठा - परमसीमा, हि तया - पार्वत्या, पुनः - भूयः, तत् - पत्रवृत्तिता अपि, अपाकीर्णं - अपाकृतम्। अतः - अस्मात् कारणात्, प्रियंवदां - मृदुभाषिणीं, तां - पार्वतीं, पुराविदः - पुराणज्ञाः, अपर्णा - पर्णभक्ष्यरहिता इति च वदन्ति - कथयन्ति।

**सारः -** स्वयं च्युतवृक्षपर्णवर्तनत्वं तस्याः तपसः परा सीमा भवति। पार्वत्या ततः तदपि परित्यक्तम्। अतः पुराणज्ञाः तां अपर्णा इति कथयन्ति स्म।

**विग्रहः -** प्रियंवदां - प्रियं वदतीति प्रियंवदा, तां प्रियंवदाम्।

पुराविदः - पुरा विदन्तीति पुराविदः।

अपर्णा - अविद्यमानं (भक्ष्यत्वेन) पर्णं यस्याः सा अपर्णा।

**क्रियाः -** वदन्ति - वद् धातु (वद व्यक्तायां वाचि) लट् परस्मैपदि प्रथमपुरुषः बहुवचनम्।

**मृणालिकापेलवमेवमादिभिर्व्रतैःस्वमङ्गं ग्लपयन्त्यहर्निशम्।**

**तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा।।२९।।**

**व्याख्या -** मृणालिकापेलवं - कमलिनीकन्दकोमलं, स्वं - निजं, अङ्गं - शरीरं, एवमादिभिः - पूर्वोक्तैः, व्रतैः - नियमादिभिः, अहर्निशं - रात्रिन्दिवं, ग्लपयन्ती - शोषयन्ती, सा - पार्वती, कठिनैः शरीरैः - कठोरैः देहैः, उपार्जितं - सम्पादितं, तपस्विनां - तपोव्रतानां, तपः - तपश्चरणं, दूरं - दूरतः, अधश्चकार - तिरश्चकार ।

**सारः -** कमलकन्दकोमलं स्वशरीरं एवं विधाभिः यमनियमादिभिः रात्रिन्दिवं शोषयन्ती पार्वती कठिनशरीरैः सम्पादितं तापसानां तपः तिरश्चकार ।

**विग्रहः -** मृणालिकापेलवं - मृणालिका इव पेलवं तत्।

अहर्निशम् - अहश्च निशा च।

**क्रियाः -** चकार - उभयपदि कृञ् धातुः लिट् परस्मैपदि प्रथमपुरुड एकवचनम्

### पार्वत्याः तपश्चर्याविशेषः।

पार्वती पूर्वोक्ततपसा अभीष्टं शिववशीकरणरूपं प्रयोजनं लभ्यं नामन्यत। तदा सा शरीरमार्दवं विगणय्य अतिदुष्करं तपः कर्तुम् आरभत। ग्रीष्मर्तौ विशदमन्दहासा सा पार्वती पुरतः पृष्टतः पार्श्वयोरुभयोश्चाग्निं ज्वलन्तीं स्थापयित्वा तन्मध्ये स्थिता सती केवलं सूर्यमवलोक्य तपश्चकार। सूर्यकिरणैः अतितप्तं गौर्याः मुखं कमलाश्रियं दधौ। दीर्घयोः अपाङ्गयोः शनैः श्यामिकया स्थानं कृतम्। ततः सा केवलम् अम्बु अमृतमयस्य सोमस्य मयूखात् च भोजनं कृतवती। नभश्चरेण इन्धनसम्मृतेन च अतिसंतप्ता सा पार्वती ग्रीष्मान्ते नूतनाम्बुभिः सिक्ता सती पृथिव्या सह ऊष्माणम् अमुञ्चत। निरन्तरासु अन्तरवायुवर्षासु अनावृतस्थलवासिनीं प्रस्तरतलशायिनीं पार्वतीं कठिनतपः साक्षित्वे वर्तमानाः निशाः विद्युद्रूपैः अवलोकनैः ददृशुः। पार्वती हिमोत्किरणपवनाः पौषरात्रीः जलवासतत्परा सती पुनः वियुक्ते चक्रवाकयुगले दयां कुर्वती अयापयत्। उदवासतत्परा सा जले मुखमात्रदृष्टा सती शैत्यनिशायां कमलसुरभिणा कम्पमानोष्ठदलशोभिना मुखेन तुहिनवर्षाधअवस्तसम्पत्तीनां वारिणां सरोजसंधानमकरोत्। स्वयं विशीर्णवृक्षपत्रवर्तनत्वं तस्याः तपसः परमोत्कर्षः भवति। एवं पार्वती कठिनैः शरीरैः उपार्जितं तापसानां तपः तिरश्चकार ।

## पुनरावृत्तिः (Recap)

- पार्वती तपसा अभीष्टं शिववशीकरणरूपं प्रयोजनं लभ्यं नामन्यत।
- सा शरीरमार्दवं विगणय्य अतिदुष्करं तपः कर्तुम् आरभत।
- ग्रीष्मर्तौ सा पार्वती पुरतः पृष्टतः पार्श्वयोरुभयोश्चाग्नौ ज्वलन्तौ स्थापयित्वा तन्मध्ये स्थिता सती केवलं सूर्यमवलोक्य तपश्चकार।
- सूर्यकिरणैः अतितप्तं गौर्याः मुखं कमलश्रियं दधौ।
- दीर्घयोः अपाङ्गयोः शनैः श्यामिकया स्थानं कृतम्।

- सा केवलम् अम्बु अमृतमयस्य सोमस्य मयूखान् च भोजनं कृतवती।
- नभश्चरेण इन्धनसम्भृतेन च अतिसंतप्ता सा पार्वती ग्रीष्मान्ते नूतनाम्बुभिः सिक्ता सती पृथिव्या सह ऊष्माणम् अमुञ्चत।
- निरन्तरासु अन्तरवायुवर्षासु अनावृतस्थलवासिनीं प्रस्तरतलशायिनीं पार्वतीं कठिनतपः साक्षित्वे वर्तमानाः निशाः विद्युद्रूपैः अवलोकनैः ददृशुः।
- पार्वती हिमोत्किरणपवनाः पौषरात्रीः जलवासतत्परा सती पुरः वियुक्ते चक्रवाकयुगले दयां कुर्वती अयापयत्।
- उदवासतत्परा सा जले मुखमात्रदृष्टा सती शैत्यनिशायां कमलसुरभिणा कम्पमानोष्ठदलशोभिना मुखेन तुहिनवर्षाध्वस्तसम्पत्तीनां वारिणां सरोजसंधानमकरोत्।
- स्वयं विशीर्णवृक्षपत्रवर्तनत्वं तस्याः तपसः परमोत्कर्षः भवति।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. तपो महत्सा चरितुं प्रचक्रमे। का ?
2. अगृहवासिनीं महातपः साक्ष्ये स्थिताः। काः?
3. मृदुप्रकृत्या ससारमेव च। किम्?
4. शनैः शनैः श्यामिकया कृतं पदम्। कुत्र?
5. चिरेण नाभिं प्रथमोदबिन्दवः। कस्याः?
6. वदन्त्यपर्णेति तां पुराविदः। काम् ?
7. तपस्विनां दूरमधश्चकार सा। किम् ?
8. पुरतः पृष्टतः पार्श्वयोरुभयोः च होमाग्नौ ज्वलन्तौ तन्मध्येस्थिता पार्वती किम् अवलोकयन्ति?
9. के पार्वतीं अपर्णा इति वदन्ति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
### (Answer the following questions in one or two sentences)

1. तपो महत्सा चरितुं प्रचक्रमे। कुतः?
2. मृदुप्रकृत्या ससारमेव च। कुतः?
3. चिरेण नाभिं प्रथमोदबिन्दवः। कथम्?
4. सहस्य रात्रीः निनाय – कः ? कथम् ?
5. वदन्त्यपर्णेति तां पुराविदः। कुतः ?

6. तपस्विनां दूरमधश्चकार सा। किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. पार्वत्याः पारणाविधिः कथमासीत्?
2. चिरेण नाभिः प्रथमोदबिन्दवः - सन्दर्भं व्याख्यात।
3. महातप साक्ष्य इव स्थिताः क्षपाः - सन्दर्भं व्याख्यात।

## निर्दिष्टाभ्यासः (Assignments)

पार्वत्याः तपश्चर्यविशेषाः विवृणुत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. पार्वती।
2. क्षपाः।
3. वपुः।
4. दीर्घयोः आपङ्गयोः।
5. पार्वत्याः।
6. पार्वतीम्।
7. पार्वती।
8. सूर्यमेव।
9. पुराविदः।

## सूचनाग्रन्थौ (References)


1. परमेश्वरदीनपाण्डेयः. कालिदासः कुमारसम्भवम् ( पञ्चमसर्गः) ,सुधासंस्कृत-हिन्दीव्याख्योपेतं चौखम्बाकृष्णदास अक्कादमी, वाराणसी।
2. कुट्टिकृष्णमारार्. कुमारसम्भवम् ( गद्यपरिभाषा) मारार् साहित्यप्रकाशम् कल्लयि, कोषिक्कोट्, ६७३००३।

## अधिकवाचनाग्रन्थौ (Suggested readings)


1. आचार्य श्रीरामचन्द्रमिश्रः.संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन्, वाराणसी २२१००१
2. T.K. Ramachandra Ayyar. A Short History of Sanskrit Literature R.S Vadhyar & Sons Kalpathi Palakkad 678003

# Unit - 3

# ब्रह्मचारिप्रवेशः, सखीद्वारा पार्वत्याः इङ्गितनिवेदनञ्च

# श्लोकाः 30-61

## उद्देश्यानि (Learning Outcomes)

- ब्रह्मचारिप्रवेशः सखीद्वारा पार्वत्याः इङ्गितनिवेदनञ्च विशेषाः सन्दर्भाः परिचाययति।
- कालिदासस्य वर्णनापाटवं अवगच्छति।
- आशयावगतिः।

## प्राग्व्यपेक्षाः (Prerequisites)

कालिदासस्य कुमारसम्भवे पञ्चमे सर्गे नगधिराजात् मेनकायां जाता भवति पार्वती। यौवनमुपगता सा शिवं भर्तारं प्राप्तुमभिलषति। शिवप्राप्तिः अनायासेन न भविष्यति इति ज्ञात्वा सा पितुः अनुवादेन तपश्चकार। पार्वती शरीरमार्दवं विगणय्य अतिदुष्करं तपः कर्तुम् आरभत। एवं पार्वती कठिनैः शरीरै उपार्जितं तापसानां तपः तिरश्चकार। तदनन्तरं किं संभूतमिति अत्र वर्णयति।

## मुख्यपदानि (Keywords)

अजिनाषादधरः,जटिलः,अनुज्झितक्रमः,धर्मसाधनम्,चिरोज्झितालक्तकपाटलेन,प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव, च्युतैः, विकीर्णसप्तर्षिबलिप्रहासिभिः, त्रिवर्गसागरः, साप्तपदीनं, पिनाकपाणिं, पुष्पधन्वनः

## Discussion

**अथाजिनाषाढधरः प्रगल्भवाङ्ज्वलन्निव ब्रह्ममयेन तेजसा।**

**विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ।। ३० ।।**

**व्याख्या -** अथ - अनन्तरं, अजिनाषाढधरः - मृगचर्मपलाशदण्डधारी, प्रगल्भवाक् - प्रौढवचनः, ब्रह्ममयेन - वेदाध्ययनप्रयुक्तेन, तेजसा - ओजसा, ज्वलन् इव - देदीप्यमान इव, कश्चित् जटिलः - कोऽपि जटाधारी, शरीरबद्धः - धृतशरीरः, प्रथमाश्रमः - ब्रह्मचर्याश्रमः, इव तपोवनं पार्वत्याः आश्रमं, विवेश - प्रविवेश।

**सारः -** तदनन्तरं मृगचर्मपलाशदण्डधारी प्रौढवचनः ब्रह्मतेजसा देदीप्यमानः कोऽपि जटाधारी ब्रह्मचर्याश्रम इव दृश्यमानं तपोवनं प्रविवेश।

**विग्रहः -** अजिनाषाढधरः - धरतीति धरः, अजिनश्च आषाढश्च अजिनाषाढौ तयोः धरः अजिनाषाढधरः।

(अजिनश्च आषाढं च धरतीति अजिनाषाढधरः)

प्रगल्भवाक् - प्रगल्भा वाक् यस्य सः प्रगल्भवाक्।

**क्रियाः -** विवेश - विश् (विश प्रवेशने) लिट् परस्मैपदि प्रथमपुरुषः एकवचनम्।

**तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती।**

**भवन्ति साम्येऽपि निविष्टचेतसां वपुविशेषेष्वतिगौरवाःक्रियाः ।। ३१ ।।**

**व्याख्या -** आतिथेयी - अतिथिसत्कारे तत्परा, पार्वती - गौरी, तं - ब्रह्मचारिणं, बहुमानपूर्वया - अतिगौरवपूर्वया, सपर्यया - पूजया, प्रत्युदियाय - उदतिष्ठत्, साम्येऽपि - समानत्वेऽपि, निविष्टचेतसां - स्थिरचित्तानां, वपुर्विशेषेषु - व्यक्तिविशिष्टेषु, अतिगौरवाः - अत्यधिकगौरवयुक्ताः, क्रियाः भवन्ति - प्रवर्तन्ते।

**सारः -** अतिथिसत्कारतत्परा सा पार्वती तं ब्रह्मचारिणं बहुमानपूर्वया पूजया स्वीचकार। समानतायामपि स्थिरचित्तानां व्यक्तिविशेषेषु अतिगौरवपूर्णाः क्रियाः भवन्ति।

**विग्रहः –** आतिथेयीम् - अतिथिषु साध्वी आतिथेयी, तां आतिथेयीम्।

निविष्टचेतसाम् - निविष्टं चेतः येषां ते निविष्टचेताः तेषाम्।

वपुर्विशेषेषु - वपुषां विशेषः वपुर्विशेषः, तेषु।

**क्रियाः -** प्रत्युदियाय - प्रति, उत् उपसर्गपूर्वक इ धातु (इण् गतौ) लिट् परस्मैपदी प्र.पु - ए व ।

भवन्ति - भू धातु लट् परस्मैपदी प्र.पु बहुवचनम्।

**विधिप्रयुक्तां परिगृह्य सात्क्रियां परिश्रमं नाम विनीय च क्षणम्।**

**उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः।। ३२ ।।**

**व्याख्या -** सः - असौ ब्रह्मचारी, विधिप्रयुक्तां- विधिपूर्वककृतां, सत्क्रियां - सत्कारं, परिगृह्य - स्वीकृत्य, क्षणं - किञ्चित्कालं, परिश्रमं - विश्रमं, च विनीय - दूरीकृत्य, अथ - अनन्तरं, उमां - पार्वतीं, ऋजुना एव -

सरलेन एव, चक्षुषा - नेत्रेण, पश्यन् - अवलोकयन्, अनुज्झितक्रमः - अभङ्गक्रमः सन्, वक्तुं - कथयितुं, प्रचक्रमे - प्रारभत ।

**सारः -** विधिवत्कृतं स्वागतसत्कारं स्वीकृत्य ब्रह्मचारी सः क्षणं विश्रम्य च पार्वतीं सरलेन नयनेन पश्यन् कथितुमारभत।

**विग्रहः -** अनुज्झितक्रमः - नैव उज्झितः अनुज्झितः, अनुज्झितः क्रमः येन सः।

**क्रियाः -** प्रचक्रमे - प्र पूर्वक क्रमु (क्रमु पादविक्षेपणे) लिट् आत्मनेपदि प्र.पु - ए व।

**अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।**

**अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्।।** ३३ ।।

**व्याख्या -** क्रियार्थं - होमाद्यानुष्ठानार्थं, समित्कुशं - काष्ठदर्भादिकं, सुलभं - सुप्राप्यं, अपि - किं, स्वशक्त्या - आत्मबलेन, तपसि - तपश्चरणे, प्रवर्तसे अपि - प्रवृत्ता भवसि किम् ? खलु - किल, शरीरं - देहः, आद्यं - आदौ, धर्मसाधनं - सुकृतोपकरणम्।

**सारः -** हे देवि ! तवाश्रमे होमाद्यनुष्ठानयोग्यानि समित्कुशानि सुलभानि किम्? स्नानयोग्यानि निर्मलानि जलानि सन्ति वा? आत्मबलेनैव तपः चरसि किम्? नूनं शरीरमेव प्रथमं धर्मसाधनं भवति।

**विग्रहः -** स्नानविधिक्षमाणि - स्नानस्य विधिः स्नानविधिः, तत्र क्षमाणि तानि स्नानविधिक्षमाणि ।

**क्रियाः -** प्रवर्तसे - प्र पूर्वक वृत् (वृतु वर्तने) धातु लट् आत्मनेपदी मध्यमपुरुषः ए व।

**अपि त्वदावार्जितवारिसंभृतंप्रवालमासामनुबन्धिवीरुधाम्।**

**चिरोज्झितालक्तकपाटलेनते तुलां यदारोहति दन्तवाससा।।३४।।**

**व्याख्या -** त्वदावार्जितवारिसम्भृतं - त्वत्सिक्तसलिलोत्पन्नं, आसाम् - एतासां, वीरुधां - लतानां, प्रवालं - पल्लवं, अनुबन्धि अपि - अनुस्यूतं किम्? यत् चिरोज्झितालक्तकपाटलेन - बहुकालत्यक्तलक्षारक्तेन, ते - तव, दन्तवाससा - रदनाच्छादनेन, तुलां - तुलनाम्, आरोहति - गच्छति।

**सारः** - त्वज्जलप्रदानात् एतासु आश्रमलतासु नूतनपल्लवोत्पत्तिः सर्वदा जायते किम्? यन्नवपल्लवाः चिरालक्तकरसत्यागात् अपि स्वाभाविकारुणेन तवाधरोष्ठेन तुलनां गच्छति।

**विग्रहः -** दन्तवाससा - दन्तान् वसते दन्तवासः, तेन।

**क्रियाः -** आरोहति - आङ् पूर्वक रुह् धातु (रुह बीजजन्मनि प्रादुर्भावे च) लट् परस्मैपदी प्र.पु ए व।

**अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु।**

**य उत्पलाक्षि! प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिवप्रयुज्यते ।। ३५ ।।**

**व्याख्या -** करस्थदर्भप्रणयापहारिषु - हस्तस्थितकुशस्नेहग्रहीतृषु, हरिणेषु - मृगेषु, ते - तव, मनः - चित्तं, प्रसन्नं अपि - सन्तुष्टमपि, हे उत्पलाक्षि! - हे कमलनेत्रे!, ये प्रचलैः - चपलैः, विलोचनैः - नयनैः, तव - त्वदीयं, अक्षिसादृश्यं - नयनसमानतां, प्रयुज्यते इव - अभिनयति इव।

**सारः -** करस्थितदर्भप्रणयापहारिषु हरिणेषु तव मनः प्रसन्नं किम्? हे कमलाक्षि! येषां मृगाणां चञ्चलदृष्टिः तव नयनसमानतां करोति।

**विग्रहः -** उत्पलाक्षि - उत्पलमिव अक्षिणी यस्याः सा उत्पलाक्षी, तत्सम्बुद्धौ उत्पलाक्षि।

**क्रियाः -** प्रयुज्यते - प्र पूर्वक युज् (युजिर् योगे, उभयपदि) धातु लट् आत्मनेपदी प्र.पु ए व।

**यदुच्यते पार्वति! पापवृत्तये न रूपमित्यव्यभिचारितद्वचः।**

**तथाहि ते शीलमुदारदर्शने! तपस्विनामप्युपदेशतांगतम् ।। ३६ ।।**

**व्याख्या -** हे पार्वति ! - हे उमे !, रूपं - सौन्दर्य, पापवृत्तये - पापाचरणाय, न - न भवति, इति - इत्थं, यद् उच्यते - यत् कथ्यते, तद्वचः - तद्वचनं, अव्यभिचारि - व्यभिचाररहितं सत्यं, तथाहि - यतो हि, हे उदारदर्शने - हे आयताक्षि, ते - तव, शीलं - सुवृत्तं, तपस्विनां - तापसानाम्, अपि उपदेशतां - शिक्षणं, गतं - प्राप्तम्।

**सारः -** हे गोरि! सौन्दर्य पापाचरणाय न भवति इति यदुच्यते तत् सत्यम्। हे रूपवति, तव शीलं तापसानामपि शिक्षाप्रदं जातम्।

**विग्रहः -** अव्यभिचारि - न व्यभिचरतीति अव्यभिचारि।

उदारदर्शने - उदारं दर्शनं यस्याः सा उदारदर्शना, तत्सम्बुद्धौ।

**क्रियाः -** उच्यते - बृञ् (ब्रूञ व्यक्तायां वाचि) धातु कर्मणि लट् प्र.पु ए व।

**विकीर्णसप्तर्षिबलिप्रहासिभिस्तथान गाङ्गैः सलिलैर्दिवश्च्युतैः।**

**यथा त्वदीयैश्चरितैरनाविलैर्महीधरःपावित एष सान्वयः।। ३७ ।।**

**व्याख्या -** एषः - अयं, महीधरः - भूधरः, हिमालयः, विकीर्णसप्तर्षिबलिप्रहासिभिः - प्रक्षिप्तसप्तर्षिपुष्पोपहारहासैः, दिवः - अन्तरिक्षात्, च्युतैः - पतितैः, गाङ्गै - गङ्गायाः, सलिलैः - जलैः, तथा न पावितः - तथाविधो न पवित्रीकृतः, अनाविलैः - अकलुषैः, त्वदीयैः - त्वत्सम्बन्धिभिः चरितैः, यथा- येन प्रकारेण, सान्वयः - सकुलः, पावितः पवित्रीकृतः।

**सारः -** एषः हिमालयपर्वतः प्रक्षिप्तसप्तर्षिबलिप्रहासिभिः स्वयं पतितैः गङ्गाजलैः तथा न पवित्रीकृतः अकलुषैः तव चरितैः यथा स कुलः पावितः।

**विग्रहः -** महीधरः - धरति इति धरः, मह्याः धरः महीधरः ।

गाङ्गैः - गङ्गायाः इदं गाङ्गं, तानि गाङ्गानि, तैः गाङ्गैः।

**अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि।**

**त्वया मनोनिर्विषयार्थकामयायदेक एव प्रतिगृह्य सेव्यते।। ३८ ।।**

**व्याख्या -** हे भाविनि! - हे उदारहृदये। अनेन - एतेन कारणेन, धर्मं - पुण्यं, सविशेषं - सातिशयं, अद्य - अस्मिन् दिने, मे - मम, त्रिवर्गसारः - धर्मार्थकामश्रेष्ठः, प्रतिभाति - शोभते। यत् - यस्मात् कारणात्, मनोनिर्विषयार्थकामया - अर्थकामपराङ्मुखचित्तया, त्वया - भवत्या, एकः - एकाकी, धर्मः - सुकृतम् एव, प्रतिगृह्य - स्वीकृत्य, सेव्यते - अनुष्ठीयते।

**सारः -** हे भाविनिः! अनेन कारणेन धर्मः सातिशयमद्य में धर्मार्थकामसारः प्रतिभाति। यतः अर्थकामपराङ्मुखचित्तया त्वया केवलं धर्म एव स्वीकृत्य सेव्यते।

**विग्रहः -** भाविनि - प्रशस्तः भावो यस्याः सा, भाविनी तत्सम्बुद्धौ ।

त्रिवर्गसारः - त्रयाणां वर्गः त्रिवर्गः, त्रिवर्गे सारः।

**क्रियाः -** सेव्यते - षेवृ (षेवृ सेवने) कर्मणि लट् आत्मनेपदी प्र.पु - ए व।

**प्रयुक्तसत्कारविशेषमात्मनान मां परं सम्प्रतिपत्तुमर्हसि।**

**यतः सतां सन्नतगात्रि ! सङ्गतं मनीषिभिः साप्तपदीनमुच्यते।। ३९ ।।**

**व्याख्या-** आत्मना - स्वयं, प्रयुक्तसत्कारविशेषं - विहितसत्कारसातिशयं, मां - ब्रह्मचारिणं, परं - अन्यं, सम्प्रतिपत्तुं - अवगन्तुं, न अर्हसि - न योग्यासि। हे सन्नतगात्रि! - हे अवनम्रशरीरे !, यतः - यस्मात्, मनीषिभिः - विद्वद्भिः, सतां - सज्जनानां, संगतं - सख्यं, साप्तपदीनं - सप्तपदसाध्यं, उच्यते - कथ्यते।

**सारः -** (हे शोभने!) भवत्या प्रयुक्तसत्कारविशेषं मां ब्रह्मचारिणं अन्यं मा जानीहि। सज्जनानां मित्रता सङ्गमात्रेण जायते। अतः अहमपि ते सख्ये संजातः। यतः मनीषिभिः सतां सख्यं सप्तपदसाध्यं कथ्यते।

**विग्रहः -** प्रयुक्तसत्कारविशेषम् - सत्कारस्य विशेषः सत्कारविशेषः, प्रयुक्तः सत्कारविशेषः प्रयुक्तसत्कार-विशेषः, तम्।

सन्नतगात्रि - सन्नतं गात्रं यस्याः सा सन्नतगात्री, तत्सम्बुद्धौ।

साप्तपदीनम् - सप्तभिः पदैः अवाप्यते इति साप्तपदीनम्।

**क्रियाः -** अर्हसि - अर्ह (अर्ह पूजायां) लट् परस्मैपदी म.पु ए व।

**अतोऽत्र किञ्चिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः।**

**अयं जनः प्रष्टुमनास्तपोधने! न चेद्रहस्यं प्रतिवक्तुमर्हसि।।४०।।**

**व्याख्या -** हे तपोधने! - हे तपस्विनि!, अतः - अस्मात् कारणात्, अत्र - अस्मिन् कार्ये, बहुक्षमां- क्षमाशीलां, भवतीं - त्वां, द्विजातिभावात् - ब्राह्मणत्वात्, उपपन्नचापलः - संजातचाञ्चल्यः, अयं - एषः, जनः - लोकः, (अहं) किञ्चित् - किमपि, प्रष्टुमनाः - प्रष्टुकामः अस्ति। रहस्यं - गोपनीयं न चेत् - न स्यात् तर्हि, प्रतिवक्तुं - उत्तरं दातुं, अर्हसि - योग्या असि।

**सारः -** हे तपस्विनि! जातसख्यात् ब्राह्मणत्वात् उपपन्नचापलः अहं क्षमाशीलां भवतीं तपश्चरणविषये किञ्चित् प्रष्टुम् इच्छामि। यदि तत् रहस्यं न चेत् मे प्रत्युत्तरं देहि।

**विग्रहः -** तपोधने - तपः धनं यस्याः सा तपोधना, तत्सम्बुद्धौ।

द्विजातिभावात् - द्वे जाती यस्य सः द्विजातिः, तस्य भावः द्विजातिभावः, तस्मात्।

उपपन्नचापलः - उपपन्नं चापलं यस्य सः।

**कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितंवपुः।**

**अमृग्यमैश्वर्यसुखं नवं वयः तपः फलं स्यात्किमतः परं वद।।४१।।**

**व्याख्या -** प्रथमस्य - आदेः, वेधसः - ब्रह्मणः, कुले - वंशे, प्रसूतिः - उत्पत्तिः, वपुः - शरीरं, त्रिलोकसौन्दर्यं -

त्रिभुवनसुन्दरता, इव उदितं - एकत्र समाहृतं, ऐश्वर्यसुखं - वैभवसुखं, अमृग्यं - नान्वेषणीयं, वयः - आयुः, नवं - नूतनं, अतः परं - अस्मात् विशिष्टं, किं तपःफलं - कि तपसः परिणामं, स्यात् - भवेत्, इति वद - कथय।

**सारः -** आदिब्रह्मणः वंशे तव जन्म, त्रिभुनसुन्दरमिव ते शरीरम्, ऐश्वर्यसुखं नान्वेषणीयम्। नवं वयः। इतोऽप्यधिकं तपःफलं किं भवेत् ? वद।

**विग्रहः -** त्रिलोकसौन्दर्यम् - सुन्दरस्य भावः सौन्दर्यं, त्रयाणां लोकानां सौन्दर्यं तत्।

**क्रियाः -** वद - वद् (वद व्यक्तायां वाचि) धातु लोट् स्मैपदी म.पु ए व।

**भवत्यनिष्टादपिनाम दुःसहान्मनस्विनीनांप्रतिपत्तिरीदृशी।**

**विचार्यमार्गप्रहितेनचेतसा न दृश्यते तच्च कृशोदरि ! त्वयि । ।४२।।**

**व्याख्या -** दुःसहात् - असह्यात्, अनिष्टात् - अप्रियात्, अपि मनस्विनीनां - मानिनीनां, ईदृशी - एतद्विधा, प्रतिपत्तिः - प्रवृत्तिः, हे कृशोदरि! - कृशगात्रि (सुन्दरि), विचारमार्गप्रहितेन - विचारपथप्रेषितेन, चेतसा - चित्तेन, तत् च - पूर्वोक्तं, त्वयि - भवत्यां, न दृश्यते - नावलोक्यते।

**सारः -** हे सुन्दरि ! असह्यादनिष्टादपि मनस्विनीनां ईदृशी प्रवृत्तिः विचारपथप्रेषितेन चित्तेन भवत्यां न दृश्यते।

**विग्रहः -** कृशोदरि- कृशम् उदरं यस्याः सा कृशोदरी, तत्सम्बुद्धौ कृशोदरि।

**क्रियाः -** दृश्यते दृश् (दृशिर् प्रेक्षणे) कर्मणि लट् आत्मनेपदी प्र.पु - ए व ।

**अलभ्यशोकाभिभवेयमाकृतिर्विमाननासुभ्रूः कुतः पितुगृहे।**

**पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये।।४३ ।।**

**व्याख्या -** है सुभ्रूः!- शोभनभ्रूयुक्ते!, इयं - एषा, आकृतिः- स्वरूपं, अलभ्यशोकाभिभवा - अप्राप्यदुःखतिरस्कारा, पितुः - जनकस्य हिमालयस्य, गेहे - गृहे, विमानना - अवमानना, कुतः - कस्मात् भवति इति, पराभिमर्शः - अन्यघर्षणं, तव - ते, नास्ति - न वर्तते, पन्नगरत्नसूचये - सर्पमणिप्राप्तये, कः- को नरः, करं - हस्तं, प्रसारयेत् - प्रसारणं कुर्यात्? न कोऽपि इत्यर्थः।

**सारः -** हे सुन्दरि ! एषः तवाकारः अप्राप्यशोकतिरस्कारा भवति। पितृगृहे तव अवमानननायाः कल्पनापि न सम्भाव्यते। अन्यघर्षणमपि तव नास्ति। सर्पमणिग्रहणाय कः हस्तं प्रसारयेत् ? न कोऽपि इत्यर्थः ।

**विग्रहः -** अलभ्यशोकाभिभवः - लब्धुं योग्यः लभ्यः, न लभ्यः अलभ्यः, शोकेन अभिभवः शोकाभिभवः, अलभ्यः शोकाभिभवः अलभ्यशोकाभिभवः ।

पन्नगरत्नसूचये - पन्नगस्य रत्नं पन्नगरत्नं, तस्य सूचिः पन्नगरत्नसूचिः, तस्मै।

**क्रियाः -** प्रसारयेत् - प्र पूर्वक सृ (सृ गतौ) धातु विधिलिङ् परस्मैपदी प्र.पु ए व।

**किमित्यपास्याभरणानियौवने घृतं त्वया वार्धकशोभि वल्कलम् ।**
**वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्प्यते ।।४४ ।।**

**व्याख्या -** (हे गौरि) किमिति - केन कारणेन, यौवने - युवावस्थायां, त्वया - भवत्या, आभरणानि - भूषणानि, अपास्य - त्यक्त्वा, वार्धकशोभि - वृद्धत्वमनोरमं, वल्कलं - वल्कं, धृतं - धारित्तं, प्रदोषे - सायंकाले, स्फुटतारका - व्यक्तनक्षत्रा, विभावरी - रात्रिः, अरुणाय - सूर्यसारथिने, कल्प्यते - कल्पनां करोति, यदि - चेद्, वद - कथय।

**सारः -** हे गौरि! यौवने भवत्या केन कारणेन आभरणानि परित्यज्य वृद्धावस्थाशोभि वल्कलं धारितम्। सायंकाले स्फुटनक्षत्रा रात्रिः यदि सूर्याय कल्पते चेद् कथय।

**विग्रहः -** वार्धकशोभि - वृद्धस्य भावो वार्धकं, तस्मिन् शोभते इति।

**क्रियाः -** कल्प्यते- क्लृपू (क्लृपू सामर्थ्ये) लट् आत्मनेपदी प्र.पु - ए व।

**दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।**
**अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ।।४५ ।।**

**व्याख्या -** यदि - चेत्, त्वं - भवती, दिवं - स्वर्गं, प्रार्थयसे - प्रार्थनां करोषि, श्रमः - उद्योगः, वृथा - व्यर्थं, तव - ते, पितुः - तातस्य हिमालयस्य, प्रदेशाः - राज्यभागाः, देवभूमयः - देवस्थलानि, अथ - अनन्तरं, उपयन्तारं - भर्तारं, प्रार्थयसे - याचयसे, चेत् - तर्हि, समाधिना- चित्तनिरोधवृत्या, अलं - निषेधः, रत्नं - मणिः, न अन्विष्यति - न मृगयते (धारकं), तत् - रत्नं, स्वतः - धारकैः, मृग्यते - अन्विष्यते।

**सारः-** हे पार्वति ! यदि त्वं अनया तपस्यया स्वर्गं प्रार्थयसे चेत् तव परिश्रमः वृथा स्यात्। यतः तव पितुः प्रदेशाः देवभूमयः एव। अथवा भर्तारं प्राप्तुं तपः चेत् (प्रार्थयसे) तदपि अलम्। रत्नं कदापि उपयोक्तारं नान्विष्यति, उपयोक्ता स्वयमेव तदन्विष्यति।

**विग्रहः -** उपयन्तारं - उपयच्छतीति उपयन्ता, तम्।

**क्रियाः -** प्रार्थयसे - प्र पूर्वक अर्थ् (अर्थ् उपयाभ्याम्) लट् आत्मनेपदी म.पु ए व।

अन्विष्यति - अनु पूर्वक इष् (इष गतौ) लट् परस्मैपदी प्र.पु ए व।

मृग्यते -मृग् धातु (मृग अन्वेषणे) कर्मणि लट् - प्र.पु - ए व।

**निवेदितं निश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते।**
**न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम् ।।४६ ।।**

**व्याख्या -** सोष्मणा - उष्णतासहितेन, निश्वसितेन - निश्वासेन, निवेदितं - यत्त्वया कथितं, मनस्तु - चेतस्तु, मे - मम, संशयं - सन्देहम् एव, गाहते - प्राप्नोति, ते - तव, प्रार्थयितव्य एव - प्रार्थयितुं योग्य एव, न दृश्यते - नावलोक्यते, प्रार्थितदुर्लभः - याचितदुष्प्राप्यः, कथं - केन प्रकारेण, भविष्यति - भविता।

**सारः -** सोष्णदीर्घश्वासेन यत्त्वया कथितं, तथापि मम मनः सन्देहमेव प्राप्तम्। तव प्रार्थयितुं योग्यः न कश्चिज्जनः दृश्यते। ते प्रार्थितदुष्प्राप्यः कश्चित् पुरुषः न भविष्यति।

**विग्रहः -** सोष्मणा - ऊष्मणा सहितं सोष्मं, तेन सोष्मणा।

प्रार्थितदुर्लभः - प्रार्थितश्चासौ दुर्लभश्च प्रार्थितदुर्लभः।

**अहो! स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते।**
**उपेक्षते यः श्लथलम्बिनीर्जटाः कपोलदेशे कलमाग्रपिङ्गलाः।।४७।।**

**व्याख्या -** अहो - आश्चर्यं, तव - ते पार्वत्याः, ईप्सितः - अभीष्टः, युवा - युवकः, कः - कश्चिदपि, स्थिरः - कठिनः, यः चिराय - यः चिरकालाय, कर्णोत्पलशुन्यतां - श्रोत्रोत्वराहित्यं, गते - प्राप्ते, कपोलदेशे - गण्डस्थले, श्लथलम्बिनीः - शिथिलावस्रंसिनीः, कलमाग्रपिङ्गलाः - शाल्यग्रकपिलाः, जटाः - सटाः, उपेक्षते - उपेक्षां करोति।

**सारः -** अहो तवाभीप्सितः कोऽपि युवा नास्ति यः चिरात् कर्णाभरणभूषितकपोलदेशे शिथिलावस्रंसिनीः शाल्यग्रकपिलाः सटाः उपेक्षते।

**विग्रहः -** कर्णोत्पलशून्यतां - कर्णयोः उत्पले कर्णोत्पले, ताभ्यां शून्यः कर्णात्पलशुन्यः, तस्य भावः कर्णात्पलशून्यता।

श्लथलम्बिनीः - लम्बन्ते इति लम्बिन्यः, श्लथाः च ताः लम्बिन्यः ताः श्लथलम्बिनीः।

**क्रियाः -** उपेक्षते - उप पूर्वक ईक्ष धातु (ईक्ष दर्शने) लट् आत्मनेपदी प्र.पु ए व।

**मुनिव्रतैस्त्वामतिमात्रकर्शितांदिवाकराप्लुष्टविभूषणास्पदाम्।**

**शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ।।४८।।**

**व्याख्या -** मुनिव्रतैः - महर्षिनियमितैः, अतिमात्रकर्शितां - अतिदुर्बलां, दिवाकराप्लुष्टविभूषणास्पदां - सूर्यदग्धभूषणस्थानां, दिवा - दिने, शशाङ्कलेखामिव - चन्द्ररेखामिव, त्वां - पार्वतीं, पश्यतः - अवलोकयतः, सचेतसः - सहृदयस्य, कस्य - कस्य पुरुषस्य, मनः - चित्तं, न दूयते - न परितप्यते।

**सारः -** तपश्चरणैः अतिकृशां सूर्यदग्धविभूषणस्थानां दिने धूसरितां चन्द्रलेखामिव त्वां अवलोकयतः कस्य वा जनस्य मनः न दूयते। सर्वस्यापि मनः दूयते इति भावः।

**विग्रहः -** मुनिव्रतैः - मुनीनां व्रतानि मुनिव्रतानि, तैः।

शशाङ्कलेखाम् - शशः अङ्के यस्य सः शशाङ्कः, तस्य लेखा, ताम्।

**अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः।**

**करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः।।४९।।**

**व्याख्या -** तव- ते, प्रियं - वल्लभं, सौभाग्यमदेन - सौन्दर्याभिमानेन, वञ्चितं - रहितं, अवैमि - जानामि। यः - यः प्रियः, चतुरावलोकिनः - प्रियदर्शिनः, अरालपक्ष्मणः - कुटिलरोम्णः, अस्य - एतस्य, चक्षुषः - नयनस्य, आत्मीयं - स्वीयं, वक्त्रं - मुखं, चिरं - बहुकालं, लक्ष्यं - दृष्टिविषयं, न करोति - न विदधाति।

**सारः -** यः युवा ते अभीष्टः नूनमेव सः सौभाग्यः अस्ति। चतुरदृष्टिः सः कुटिलरोम्णः अस्य नयनस्यात्मीयं मुखं चिरकालं लक्ष्यं न करोति।

**विग्रहः -** चतुरावलोकिनः - चतुरं यथा स्यात्तथा अवलोकयते यः चतुरावलोकी, तस्य चतुरावलोकिनः।

अरालपक्ष्मणः - अरालानि पक्ष्माणि यस्य तत् अरालपक्ष्मा, तस्य अरालपक्ष्मणः।

**क्रियाः -** अवैमि - अव पूर्वक इण् धातु (इण् गतौ) लट् परस्मैपदी उत्तमपुरुषः ए व।

करोति - उभयपदि कृञ् धातु (डुकृञ् करणे,) परस्मैपदी लट् प्र.पु ए व।

**कियच्चिरं श्राम्यसि गौरि ! विद्यते ममापि पूर्वाश्रमसञ्चितं तपः।**

**तदर्धभागेन लभस्व कांक्षितं वरं तमिच्छामि च साधु वेदितुम् ।।५०।।**

**व्याख्या -** हे गौरि ! - हे पार्वति ! कियत् चिरं - कियदवधिकं, श्राम्यसि - तपश्चरिष्यसि, मम अपि – मे अपि पूर्वाश्रमसञ्चितं - ब्रह्मचर्याश्रमसंगृहीतं, तपः - तपस्या, विद्यते - वर्तते, तदर्धभागेन- तपसः अर्धभागेन, कांक्षितं - वाञ्छितं, वरं - पतिं, लभस्व - प्राप्नुहि। तं - वाञ्छितं वरं, साधु - सम्यक्, वेदितुं - ज्ञातुं, इच्छामि - अभिलषामि।

**सारः** - हे पार्वति ! कियत्कालं यावत् त्वं तपस्यसि ? ब्रह्मचर्याश्रमसञ्चितं तपः मे विद्यते। तस्यार्थभागेन त्वं ईप्सितं फलं प्राप्नुहि। नाम्ना तं वरं ज्ञातुं अहमिच्छामि।

**क्रियाः -** श्राम्यसि - श्रम् धातु (श्रमु तपसि खेदे च) लट् परस्मैपदी म.पु ए व।

विद्यते - विद् धातु (विद सत्तायां) लट् आत्मनेपदी प्र.पु ए व।

लभस्व - लभ् धातु (डुलभष् प्राप्तौ) लोट् आत्मनेपदी- म.पु - ए व।

इच्छामि - इष् (इषु इच्छायां) लट् परस्मैपदी लट् उ.पु ए व।

**इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम्।**

**अथो वयस्यां परिपार्श्ववर्तिनीं विवर्त्तितानञ्जननेत्रमैक्षत। ।५१ ।।**

**व्याख्या -** इति - एवं, द्विजन्मना - विप्रेण, प्रविश्य - प्रवेशं कृत्वा, अभिहिता - कथिता, सा - पार्वती, मनोगतं - मनसा चिन्तितं, शंसितुं - सूचयितुं न शशाक - न शक्ताऽभूत्। अथ - अनन्तरं, परिपार्श्ववर्तिनीं - समीपवर्तिनीं, वयस्यां - सखीं, विवर्त्तितानञ्जननेत्रं - विचलिताऽकज्जलनयनं, ऐक्षत - ईक्षाञ्चक्रे।

**सारः -** एवं ब्राह्मणेन प्रविश्य कथिता पार्वती चित्तवर्तिनं वरं सूचयितुमसमर्था अभवत्। तदनन्तरं समीपवर्तिनीं सखीं तन्मुखावलोकनमात्रेण तां निजमनोगतसूचनार्थं प्रेरितवती।

**विग्रहः -** द्विजन्मना - द्वे जन्मनी यस्य सः द्विजन्मा, तेन।

**सखी तदीया तमुवाच वर्णिनं निबोध साधो ! तव चेत्कुतूहलम्।**

**तदर्थमम्भोजमिवोष्णवारणंकृतं तपः साधनमेतया वपुः ।।५२।।**

**व्याख्या -** तदीया - तस्याः, सखी - आलिः, तम् - आगतं, वर्णिनं -ब्रह्मचारिणम्, उवाच - प्राह। हे साधो ! - हे तपस्विन् !, तव - ते, कुतूहलं - कौतुकं, चेत् - यदि, निबोध - जानीहि। यदर्थं - यन्निमित्तं, एतया - अनया, अम्भोजं - कमलं, उष्णवारणमिव - आतपत्रम् इव, वपुः - शरीरं, तपःसाधनं - तपसः साधनं, तत् - तपः, कृतं - विहितम्।

**सारः -** तस्याः पार्वत्याः सखी तं ब्रह्मचारिणमुवाच। हे साधो ! यदि तव कौतुकं चेत् जानीहि, यत् अनया कमलं आतपत्रमिव शरीरं तपःसाधनं कृतम्।

**विग्रहः -** तपःसाधनम् - तपसः साधनम्।

**इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्यमानिनी।**

**अरूपहार्यं मदनस्य विग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति।।५३।।**

**व्याख्या -** मानिनी - अभिमानिनी, इयं -एषा मे सखी, अधिश्रियः महदैश्वर्यात्, महेन्द्रप्रभृतीन् - शक्रादीन्, चतुर्दिगीशान् - इन्द्रयमवरुणकुबेरान् चतुर्दिगीश्वरान्, अवमत्य - अनादृत्य, मदनस्य - कामदेवस्य, निग्रहात् - हननात्, अरूपहार्यं - असौन्दर्यवर्णं, पिनाकिनं - शिवं, पतिं - भर्तारम्, आप्तुं - प्राप्तुम्, इच्छति - अभिलषति।

**सारः -** मानिनी मे सखी महदैश्वर्यान् शक्रादीन् अनादृत्य कामस्य निग्रहात् असौन्दर्यवर्णं शिवं पतिरूपेण प्राप्तुमिच्छति ।

**विग्रहः -** अधिश्रियः - अधिका श्रीः येषां ते।

अरूपहार्यम् - रूपेण हार्यः रूपहार्यः, न रूपहार्यः अरूपहार्यः, तम्।

पिनाकिनम् - पिनाकं यस्य अस्तीति पिनाकी, तम् पिनाकिनम्।

**असह्यहुङ्कारनिवर्तितःपुरा पुरारिमप्राप्तमुखःशिलीमुखः।**

**इमां हृदि व्यायतपातमक्षिणोद्विशीर्णमूर्तेरपिपुष्पधन्वनः।।५४।।**

**व्याख्या -** पूरा - प्राक्, असह्यहुङ्कारनिवर्तितः - दुःसहहुङ्कृतिपरावर्तितः, पुरारिं - महेश्वरम्, अप्राप्तमुखः - अलब्धफलः, विशीर्णमूर्तेः - दग्धाकृतेः, अपि पुष्पधन्वनः - कामदेवस्य, शिलीमुखः - बाणः, इमां - पार्वतीं, हृदि - चेतसि, व्यायतपातं - दीर्घप्रहरम्, अक्षिणोत्- अकर्शत्।

**सारः -** पुरा दुःसहहुङ्कारपरावर्तितः शिवम् अलब्धवदनः नष्टरूपस्यापि कामदेवस्य शरः इमां पार्वतीं हृदि दीर्घप्रहारमकरोत्।

**विग्रहः -** असह्यहुङ्कारनिवर्तितः - न सह्यः असह्यः, असह्यश्चासौ हुङ्कारः असह्यहुङ्ङ्कारः, तेन निवर्तितः।

पुरारिम् - पुरस्य अरिः पुरारिः, तम्।

अप्राप्तमुखः - न प्राप्तम् अप्राप्तम्, अप्राप्तं मुखं यस्य सः अप्राप्तमुखः।

विशीर्णमूर्तेः - विशार्णा मूर्तिः यस्य सः विशीर्णमूर्तिः, तस्य।

पुष्पधन्वनः - पुष्पं धनुः यस्य सः पुष्पधन्वा, तस्य।

**क्रियाः -** अक्षिणोत् - उभयपदि क्षिण् धातु (क्षिणु हिंसायाम्) लङ् परस्मैपदी प्र.पु ए व।

**तदा प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका।**

**न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि। ।५५ ।।**

**व्याख्या -** तदा प्रभृति - तदारभ्य, पितुः - तातस्य हिमालयस्य, गृहे - गेहे, उन्मदना - उत्कटकामा, ललाटिकाचन्दनधूसरालका - तिलकचन्दनधूसरकेशा, बाला - पार्वती, जातु - कदाचित्, तुषार संघातशिलातलेषु - हिमघनप्रस्तरतलेषु, अपि निर्वृतिं - सुखं, न लभते स्म - न प्राप्नोति स्म।

**सारः -** तदारभ्य पितुः हिमालयस्य गृहे उत्कटकामा तिलकचन्दनधूसरकेशा पार्वती कदाचित् हिमघनप्रस्तरतलेषु अपि सुखं न लभते स्म।

**विग्रहः -** तुषारसंघातशिलातलेषु - तुषाराणां संघातः तुषारसंघातः, तेषां शिलातलानि तुषारसंघातशिला-तलानि, तेषु।

**उपात्तवर्णे चरिते पिनाकिनः सबाष्पकण्ठस्खलितैःपदैरियम्।**

**अनेकशः किन्नरराजकन्यकाःवनान्तसंगीतसखीररोदयत्। ।५६ ।।**

**व्याख्या** - इयं - एषा पार्वती, पिनाकिनः - महेश्वरस्य, चरिते - आचरणे, उपात्तवर्णे - प्रारब्धगीतक्रमे, सबाष्पकण्ठैः - साश्रुकण्ठनिर्गतैः, पदैः - शब्दैः, वनान्तसंगीतसखीः - वनमध्यगानवयस्याः, किन्नरराजकन्यकाः - किन्नरपुरुषाणां कन्याः, अनेकशः - बहुशः, अरोदयत् - रुरोद।

**सारः -** एषा पार्वती भगवतः परमेश्वरस्य चरित्रश्रवणकांक्षया संगीताभ्यासव्याजेन साश्रुकण्ठनिर्गतैः पदैः वनान्तसंगीतसखीः किन्नरराजकन्याः अपि बहुवारम् अरोदयत्।

**विग्रहः -** उपात्तवर्णे - उपात्तः वर्णः यस्य तत् उपात्तवर्णं, तस्मिन्।

सबाष्पकण्ठैः - बाष्पैः सह सबाष्पः सबाष्पश्चासौ कण्ठः सबाष्पकण्ठः, तैः।

**क्रियाः -** अरोदयत् - रुद् धातु (रुदिर् अश्रुविमोचने) लङ् परस्मैपदी प्र.पु ए व।

**त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत।**

**क्व नीलकण्ठ ! व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना।५७।।**

**व्याख्या -** त्रिभागशेषासु - त्रिभागविशिष्टेषु, निशासु - रात्रिषु, क्षणं - निमिषं, नेत्रे - चक्षुषी, निमील्य - मेलवित्वा, सहसा - झटिति, हे नीलकण्ठ! - हे महादेव!, क्व - कुत्र, व्रजसि - गच्छसि, इति - एवं, अलक्ष्यवाक् - अदृश्यवाणी, असत्यकण्ठार्पितबाहुबन्धना - मिथ्यागलकृतभुजबन्धना, व्यबुध्यत - जागर्त्ति स्म।

**सारः -** विरहाकुला पार्वती रात्रौ न स्वपिति स्म। त्रिभागावशिष्टेषु रात्रिषु नेत्रे निमील्य सद्यः स्वप्नदशायां हे नीलकण्ठ ! कुत्र गच्छसि ? इति अलक्ष्यवाक् असत्यकृतालिङ्गना च सती शीघ्रमेव जागर्ति स्म।

**विग्रहः -** अलक्ष्यवाक् - लक्षितुं योग्या लक्ष्या, न लक्ष्या अलक्ष्या, अलक्ष्या यस्याः वाक् सा अलक्ष्यवाक्।

**क्रियाः -** व्रजसि - व्रज् धातु (व्रज गतौ) लट् परस्मैपदी म.पु - ए व।

व्यबुध्यत - वि पूर्वक बुध् (बुधिर् बोधने) लङ् आत्मनेपदी प्र.पु ए व।

**यदा बुधैः सर्वगतस्त्वमुच्यसेन वेत्सि भावस्थमिमं कथं जनम्।**

**इति स्वहस्तोल्लिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः।।५८।।**

**व्याख्या -** यदा - यस्मिन् समये, त्वं - भवान्, बुधैः - पण्डितैः, सर्वगतः - सर्वव्यापकः, उच्यसे - कथ्यसे, ततः - तस्मात् कारणात्, भावस्थं - अनुरागिणम्, इमं जनम् - मां, कथं - केन प्रकारेण, न वेत्सि - न जानासि, इति - एवं, मुग्धया - मूढया, स्वहस्तोल्लिखितः - निजकरचित्रितः, चन्द्रशेखरः - शिवः, रहसि - एकान्ते, उपालभ्यत - उपालब्धः।

**सारः –** भगवन् ! मन्वादिबुधैः यदा सर्वव्यापी कथितः तस्मात् अनुरागिणम् इमं जनं कथं न जानासि इति मुग्धया निजकरचित्रितः चन्द्रशेखरः रहसि उपालब्धः।

**विग्रहः** - भावस्थम् - भावे तिष्ठतीति भावस्थः, तम्।

चन्द्रशेखरः - चन्द्रः शेखरे यस्य सः।

**क्रियाः** - वेत्सि - विद् धातु (विद ज्ञाने) परस्मैपदी लट् म पु ए व।

उपालभ्यत - उप, आङ् पूर्वक लभ् धातु कर्मणि लङ् प्र पु ए व।

**यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधि विचिन्वतीम्।**

**तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम्।।५९।।**

**व्याख्या** - जगत्पतेः - जगदीश्वरस्य, तस्य - शिवस्य, अधिगमे - प्राप्तौ, विचिन्वती - मृग्यमाणा, अन्यं - अपरं, विधि - उपायं, यदा - यावत्, न अपश्यत् - नावलोकयत्, तदा - तावत्, इयं - एषा पार्वती, गुरोः - पितुः, अनुज्ञया - आज्ञया, अस्माभिः - अस्मज्जनैः सखीभिः, सह - साकं, तपोवनं - आश्रमं, तपसे - तपोऽनुष्ठानाय, प्रपन्ना - प्राप्ता।

**सारः** - इयं मे सखी पार्वती जगदीश्वरं प्राप्तुमन्यम् उपायं नावलोकितवती। तदा एषा पितुः हिमालयस्य अनुज्ञया अस्माभिः सह तपस्यां कर्तुं तपोवनं सम्प्राप्ता।

**विग्रहः** - जगत्पतेः - जगतां पतिः जगत्पतिः, तस्य।

**क्रियाः** - अपश्यत् - दृश् धातु लङ् परस्मैपदी प्र.पु ए व ।

**द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि।**

**न च प्ररोहाभिमुखोऽपिदृश्यते मनोरथोऽस्याःशशिमौलिसंश्रयः।।६०।।**

**व्याख्या** - संख्या – सहचर्याः, स्वयं- आत्मना, कृतजन्मसु- विहितजननेषु, तपःसाक्षिषु - तपस्याद्रष्टृषु, एषु - एतेषु, द्रुमेषु - पादपेषु, फलमपि - प्रसवमपि, दृष्टं - अवलोकितम्। अस्याः - पार्वत्याः, शशिमौलिसंश्रयः - शिवप्राप्तिविषयः, मनोरथः - अभिलाषः च, प्ररोहाभिमुखः - अङ्कुरोन्मुखः अपि, न दृश्यते - नावलोक्यते।

**सारः** - मे सख्या पार्वत्या स्वयं कृतजननेषु तपःसाक्षिषु एतेषु वृक्षेषु फलमपि दृष्टम्। अस्याः पार्वत्याः महेश्वरप्राप्तिविषयः मनोरथः अङ्कुरोन्मुखः अपि नावलोक्यते।

**विग्रहः** - कृतजन्मसु - कृतं जन्म येषां ते कृतजन्मानः, तेषु।

शशिमौलिसंश्रयः - शशिः मौलो यस्य सः शशिमौलिः, तस्य संश्रयः।

**न वेद्मि स प्रार्थितदुर्लभः कदा सखीभिरस्रोत्तरमीक्षितामिमाम्।**

**तपः कृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम्।।६१।।**

**व्याख्या** - प्रार्थितदुर्लभः - याचितदुष्प्राप्यः, सः - शिवः, तपःकृशां - तपसा क्षीणां, सखीभिः - आलीभिः, अस्रोत्तरम् - अश्रुसहितम्, ईक्षिताम् - अवलोकिताम्, इमां सखीं - इमां सखीं पार्वतीं, वृषा - इन्द्रः, तदवग्रहक्षतां - शक्रावग्रहपीडितां, सीताम् इव - हलक्षतां भूमिम् इव, कदा - कस्मिन् काले, अभ्युपपत्स्यते - अनुग्रहिष्यति, इति न वेद्मि - एवं न जानामि।

**सारः** - प्रार्थितोऽपि दुष्प्राप्यः स चन्द्रशेखरः तपसा क्षीणाम् अश्रुपूर्णामवलोकयन्तीम् इमां सखीं पार्वतीम् इन्द्रः हलकृष्टां भूमिमिव कस्मिन् काले अनुग्रहिष्यति इति न जानामि।

**विग्रहः** - प्रार्थितदुर्लभः - दुःखेन लब्धुं शक्यः दुर्लभः, प्रार्थितश्चासौ दुर्लभः इति प्रार्थितदुर्लभः।

अस्रोत्तरम् - अस्राणि उत्तराणि यस्मिँस्तत्।

## ब्रह्मचारीप्रवेशः अथवा ब्रह्मचारीवचनम्।

**अथवा**

## प्रचक्रमे वक्तुमनुज्झितक्रमः कः ? किं वक्तुं प्रचक्रमे ?

पार्वत्याः कठिनतपोनुष्ठानानन्तरं मृगचर्मपलाशदण्डधारी प्रौढवचनः ब्रह्मतेजसा देदीप्यमानः जटाधारी कश्चित् ब्रह्मचारी तस्याः आश्रमं प्राविवेश। आतिथेयी सा पार्वती तं ब्रह्मचारिणं बहुमानपूर्वया सपर्यया स्वीचकार। समानतयामपि स्थिरचित्तानां व्यक्तिविशेषेषु अतिगौरवाः क्रियाः भवन्ति। विधिप्रयुक्तं स्वागतसत्कारं स्वीकृत्य ब्रह्मचारी सः क्षणं विश्रम्य पार्वतीं सरलेन नयनेन पश्यन् क्रमेण वक्तुमारेभे।

हे पार्वति ! होमाद्यनुष्ठानार्थं समित्कुशादिकं सुलभं किम्? स्नानयोग्यानि निर्मलानि जलानि सन्ति किम्? त्वं स्वशक्त्या एव तपसि प्रवर्तसे किम्? यतः शरीरमाद्यं धर्मसाधनं खलु। एतासु आश्रमलतासु तव जलप्रदानात् नूतनपल्लवोत्पत्तिः अनुस्यूतं किम्? नवपल्लवाः चिरालक्तकरसत्यागत् अपि स्वाभाविकरूपेण तवाधरोष्ठेन तुलनां गच्छति। करस्थितकुशानुरागशालिषु मृगेषु तव चित्तं प्रसन्नं किम्? हे कमलाक्षि ! येषां मृगाणां चञ्चलदृष्टिः तव नयनसमानतां करोति। हे गौरि! सौन्दर्यं पापाचरणाय न भवति। इति यदुक्तं तत् वचः व्यभिचाररहितं सत्यम्। हे रूपवति ! तव सुवृत्तं तापसानापि शिक्षाप्रदं सञ्जातम्। एषः हिमालयः

विकीर्णसप्तर्षिपुष्पोपहारसहासैः स्वर्गच्युतैः गङ्गाजलैः तथा न पावितः यथा अनाविलेः तव चरितैः स कुलः पवित्रीकृतः। हे भाविनि ! एतेन कारणेन अर्थकामपराङ्मुखचित्तया त्वया केवलं धर्म एव स्वमनः स्थिरं चकार। हे शोभने ! सज्जनानां मित्रता सङ्गमात्रादेव जायते। अतः तव साक्षात् विशेषेण ते सख्यं संजातः। यतः विद्वद्भिः सज्जनानां सख्यं सप्तपदसाध्यम् उच्यते। हे तपस्विनि ! जातसख्यात् ब्राह्मणत्वात् अहं क्षमावतीं भवतीं तपश्चरणविषये किञ्चित्प्रष्टुम् इच्छामि। यदि तत् गोपनीयं न चेत् वदतात्।

आदिब्राह्मणः वंशे तव जन्म, त्रिभुवनसौन्दर्यम् इवोदितं ते शरीरम्। ऐश्वर्यसुखं नान्वेषणीयम्। इतोऽप्यधिकं तपःफलं किं स्यात् ? वद। हे कृशोदरि ! असह्यात् अनिष्टात् अपि मनस्विनीनामीदृशी प्रवृत्तिः भवति नाम। किन्तु तदनिष्टमपि त्वयि न दृश्यते। हे सुभ्रु ! इयं ते आकृतिः अप्राप्यदुःखतिरस्कारा। पितृगृहे अवमानोऽपि न भवति। अन्यघर्षणमपि न। सर्पमणिप्राप्तये कः करं प्रसारयेत्? न कोऽपि इति भावः। यदि त्वं स्वर्गलोकं प्रार्थयसे तर्हि तदपि व्यर्थम्। यतः तव पितुः प्रदेशाः देवभूमयः। अथवा पतिप्राप्तये प्रार्थयसि चेत् समाधिना अलम्। यतः रत्नं कदापि उपयोक्तारं न अन्विष्यति। उपयोक्ता एव तदन्विष्यति। अत्र तव सोष्णदीर्घनिश्वासेन यत्त्वया निवेदितं तत् पतिप्राप्तये इति जानामि। तथापि मे चेतः सन्दिह्यते तव प्रार्थितदुर्लभः कः? कश्चिज्जनः नास्ति। पुनः ब्रह्मचारी तामवदत् हे गौरि ! कियत्कालं यावत्त्वं तपस्यसि? तथापि उद्दिष्टफलं न प्राप्स्यसि किम्? पश्य ब्रह्मचर्याश्रमे मया बहुतपः सञ्चितम्। तस्यार्धेन त्वं कांक्षितं फलं प्राप्नुहि। वद सखि स वरः कः? इति ज्ञातुं मे तात्पर्यमस्ति। इति ब्रह्मचारी पार्वतीमवदत्।

### ब्रह्मचारिणं प्रति सख्याः प्रतिवचनम्।

ब्रह्मचारिणा विप्रेण कथिता पार्वती मनोगतं वरं सूचयितुं न शक्ताऽभूत्। अतः समीपवर्तिनीं सखीं निजमनोगतसूचनार्थं प्रेरितवती। तस्याः सखी तं ब्रह्मचारिणं अवदत् हे साधो ! यदि ते कौतुकं तर्हि श्रृणोतु, यत् अनया कमलम् आतपत्रमिव शरीरं तपः साधनत्वेन नियोजितम्। स्वाभिमानिनी मे सखी महदैश्वर्यान् इन्द्रप्रभृतीन् चतुर्दिगीशान् अनादृत्य पिनाकपाणिं पतिमाप्तुमिच्छति। पुरा असह्यहुङ्कारपरावर्तिनं महेश्वरम् अलब्धवदनः दग्धाकृतेः पुष्पधन्वनः कामस्य शरः इमां पार्वतीं हृदि दीर्घप्रहारम् अकरोत्। तदा प्रभृति पितुः हिमालयस्य गृहे उत्कटकामा सा पार्वती तिलकचन्दनलेपैः तुषारसंघाता शीलातलोपचारैरपि निर्वृतिं न प्राप्तवती। भगवतः शम्भोः चरितश्रवणकांक्षया यदा पार्वती संगीताभ्यासव्याजेन साश्रुकण्ठनिर्गतैः पदैः वनान्तसंगीतसखीः किन्नरराजसुताः भूयो भूयः अरोदयत्। सा रात्रौ क्षणं नेत्रे निमील्य सद्यः हे नीलकण्ठ ! कुत्र यासि इति अलक्ष्यवाग्व्यापारेण असत्यकृतालिङ्गिता सती जागृता भवति स्म। हे भगवन् ! पण्डितैः महर्षिभिः भवान् सर्वव्यापी इति कथ्यते। तदा अनुरागिणीं मद्रूपं जनं कथं न जानाति ? इति मूढया पार्वत्या निजकरचित्रितः चन्द्रशेखरः एकान्ते उपालब्धः। इयं सखी, पार्वती, जगदीश्वरं शिवं प्राप्तुम् अपरमुपायं नापश्यत्। तदा एषा पितुराज्ञया अस्माभिः सखीभिः सह तपोऽनुष्ठानाय आश्रमं प्राप्ता। मे सख्या पार्वत्या

स्वयं कृतजन्मसु तपःसाक्षिषु वृक्षेषु फलमपि अवलोकितम्। किन्तु अस्याः शिवप्राप्तिविषयः मनोरथः अङ्कुरोन्मुखः अपि न दृश्यते। एवं सखी पार्वत्याः मनोगतं ब्रह्मचारिणं निवेदयामास ।

## पुनरावृत्तिः (Recap)

- अनन्तरं मृगचर्मपलाशदण्डधारी प्रौढवचनः ब्रह्मतेजसा देदीप्यमानः जटाधारी तपोवनं प्रविवेश।
- अतिथिसत्कारतत्परा सा पार्वती तं ब्रह्मचारिणं बहुमानपूर्वया पूजया स्वीचकार।
- स्वागतसत्कारं स्वीकृत्य ब्रह्मचारी सः क्षणं विश्रम्य च पार्वतीं कथयितुमारभत।
- हे देवि ! तवाश्रमे होमाद्यनुष्ठानयोग्यानि समित्कुशानि सुलभानि किम्? नूनं शरीरमेव प्रथमं धर्मसाधनं भवति।
- ततः ब्रह्मचारी पार्वतीं अभिनन्दति।
- ब्रह्मचर्याश्रमसञ्चितं तपः मे विद्यते। 'तस्यार्धभागेन त्वं ईप्सितं फलं प्राप्नुहि' इति ब्रह्मचारी पार्वतीं वदति।
- पार्वत्याः सखी किमर्थं पार्वति तपः चरतीति तं ब्रह्मचारिणमुवाच।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. शरीरबद्धः प्रथमाश्रमो यथा। कः ?
2. सपर्यया प्रत्युदियाय पार्वती। कम्?
3. तपस्विनामप्युपदेशतां गतम्। किम् ?
4. यदेक एव प्रतिगृह्य सेवते। एकः कः ?
5. सतां सङ्गतं काभिः सप्तपदीनमुच्यते?
6. अयं किञ्चित् प्रष्टुमनाः - अयं कः?
7. ……… आद्यं खलु धर्मसाधनम्।
8. केन वञ्चितं तव प्रियम्?
9. 'पूर्वाश्रमसञ्चितं तपः विद्यते तदर्धभागेन कांक्षितं वरं प्राप्नुहि' कस्य वचनम् ?
10. कस्य शिलीमुखः पार्वतीं हृदि व्यायतपातं अक्षिणोत्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. मनीषिभिः साप्तपदीनमुच्यते - कुतः?
2. पिनाकपाणिं पतिमाप्तुमिच्छति - का ? कस्य वचनम्?
3. शरीरबद्धः प्रथमाश्रमो यथा - कीदृशः ?
4. अनेन धर्मं अद्य मे त्रिवर्गसारः प्रतिभाति- कुतः?
5. एषः महीधरः सान्वयः पावितः कथम्?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

**ससन्दर्भं व्याख्यात -**

1. कः करं प्रसारयेत्पन्नगरत्नसूचये।
2. न रत्नमन्विष्यति मृग्यते हि तत्।
3. किन्नरराजकन्यकाः वनान्तसंगीतसखीररोदयत्
4. शरीरमाद्यं खलु धर्मसाधनम्।
5. भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः।
6. सङ्गतं मनीषिभिः साप्तपदीनमुच्यते।

## निर्दिष्टाभ्यासः (Assignments)

ब्रह्मचारिवचनम् – विवृणुत

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. जटिलः।
2. ब्रह्मचारिणम्।
3. शीलम्।
4. धर्मः।

5. मनीषिभिः।
6. द्विजातिभावादुपपन्नचापलः ब्रह्मचारी।
7. शरीरम्।
8. सौभाग्यमदेन।
9. ब्रह्मचारिणः।
10. पुष्पधन्वनः।

## सूचनाग्रन्थौ (References)


1. परमेश्वरदीनपाण्डेयः, कालिदासः कुमारसम्भवम् (पञ्चमसर्गः), सुधासंस्कृत-हिन्दीव्याख्योपेतं चौखम्बाकृष्णदास अक्कादमी, वाराणसी।
2. कुट्टिकृष्णमारार्, कुमारसम्भवम् (गद्यपरिभाषा) मारार् साहित्यप्रकाशम् कल्लयि, कोषिक्कोट्, ६७३००३।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. आचार्य श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः चौखम्बा विद्याभवन्, वाराणसी २२१००१
2. T.K. Ramachandra Ayyar. A Short History of Sanskrit Literature, R.S Vadhyar & Sons Kalpathi Palakkad 678003

# Unit - 4

# ब्रह्मचारिकृता शिवनिन्दा, पार्वत्या तन्निरासः, फलोदयश्च

## श्लोकाः - 62 - 86

### उद्देश्यानि (Learning Outcomes)

- महाकाव्येषु कुमारसम्भवस्य प्राधान्यं जानाति।
- नूतनपदावलीं वर्धयति।
- ब्रह्मचारिकृता शिवनिन्दा, पार्वत्याः तन्निरासः, फलोदयश्च- इत्यादि विषयाणां अवगमनम्

### प्राग्व्यपेक्षाः (Prerequisites)

कालिदासस्य कुमारसम्भवे पञ्चमे सर्गे नगधिराजात् मेनकायां जाता भवति पार्वती। यौवनमुपगता सा शिवं भर्तारं प्राप्तुमभिलषति। शिवप्राप्तिः अनायासेन न भविष्यति इति ज्ञात्वा सा पितुः अनुवादेन तपश्चकार। पार्वती शरीरमार्दवं विगणय्य अतिदुष्करं तपः कर्तुम् आरभत। एवं पार्वती कठिनैः शरीरै उपार्जितं तापसानां तपः तिरश्चकार। तदनन्तरे ब्रह्मचारी आश्रमं प्रविवेश। तयोः सम्भाषणान्तरे रखी द्वारा शिवं पतिं प्राप्तुं तस्याः तपः इति ब्रह्मचारी ज्ञातवान्। ततः किं संभूतमिति पश्यामः।

### मुख्यपदानि (Keywords)

अव्यञ्जितहर्षलक्षणः - वर्णी - वधूदुकुलं - त्रिनेत्रवक्षः - चिताभस्मरजः - वारणराजहार्यया - वृद्धोक्षमधिष्ठितं - स्मेरमुखी - बालमृगाक्षि- यूपसत्क्रिया - प्रवेपमानाधरलक्ष्यकोपया - अलोकसामान्यमचिन्त्यहेतुकं -भीमरूपः – शिवः – पिनद्धभोगी - स्तनभिन्नवल्कला वृषराजकेतनः।

### Discussion

**अगूढसद्भावमितीङ्गितज्ञयानिवेदितो नैष्ठिकसुन्दरस्तया।**

**अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः।। ६२ ।।**

**व्याख्या** - इङ्गितज्ञतया - हृद्गतज्ञया, तया - सख्या, इति - एवं, अगूढसद्भावं - प्रकटितसदभिप्रायं, निवेदितः - कथितः, नैष्ठिकसुन्दरः - ब्रह्मचारीसौम्यः, अव्यञ्जितहर्षलक्षणः - अप्रकटितप्रमोदचिह्नः सन्, अयि - हे (पार्वति), इदं - एतत्, एवं - इत्थं, परिहासः - केलिः, वा - अथवा, इति - एवं, उमां - पार्वतीम्, अपृच्छत् - पृष्टवान्।

**सारः** - पार्वत्याः हृद्गतं भावं जानन्त्या सख्या प्रकटितसदभिप्रायं यथा स्यात् तथा कथितः ब्रह्मचारीसुन्दरः अप्रकटितप्रमोदचिह्नः सन्नपि एतत् इत्थं प्रकारं अस्ति, अथवा परिहासोऽयमिति पार्वतीं पृष्टवान्।

**विग्रहः** - इङ्गितज्ञया - इङ्गितं जानातीति इङ्गितज्ञा, तया।

अगूढसद्भावम् - न गूढः अगूढः अगूढश्चासौ सद्भावः यस्मिन् कर्मणि तत्।

नैष्ठिकसुन्दरः - निष्ठा अवधिः यस्य सः नैष्ठिकः, नैष्ठिकश्चासौ सुन्दरश्च।

**क्रियाः** - अपृच्छत् - प्रच्छ् धातु (प्रच्छ् ज्ञीप्सायां) लङ् परस्मैपदी प्र.पु ए व।

**अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमालिकाम्।**

**कथञ्चिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत। । ६३ ।।**

**व्याख्या** - अथ - अनन्तरं, मुकुलीकृताङ्गुलौ - सम्पुटीकृताङ्गुलौ, अग्रहस्ते - कराग्रे, स्फटिकाक्षमालिकां - स्फटिकजपमालां, समर्पयन्ती - समर्पणं कुर्वन्ती, चिरव्यवस्थापितवाक् - चिरकालसंयतवचना, अद्रेः - पर्वतस्य, तनया - सुता पार्वती, मिताक्षरं - मितवर्णं, कथञ्चित् - कथमपि, अभाषत - कथितवती।

**सारः** - ब्रह्मचारिणः प्रश्नानन्तरं मुकुलीकृताङ्गुलौ स्फटिकजपमालां धारयन्ती चिरसंयतवचना पार्वती परिमिताक्षरं कथम् अपि कथितवती।

**विग्रहः** - मुकुलीकृताङ्गुलौ - अमुकुलाः मुकुलाः सम्पद्यमानाः कृताः मुकुलीकृताः, मुकुलीकृताः अङ्गुलयः यस्मिन् सः मुकुलीकृताङ्गुलिः तस्मिन्।

स्फटिकाक्षमालिकाम् - स्फटिकाभिः कृता अक्षमालिका स्फटिकाक्षमालिका, ताम्।

**क्रियाः** - अभाषत - भाष् धातु (भाष व्याक्तायां वाचि) लङ् आत्मनेपदि प्र.पु - ए व।

**यथा श्रुतं वेदविदां वर! त्वया जनोऽयमुच्चैर्पदलङ्घनोत्सुकः।**

**तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्नविद्यते ।। ६४।।**

**व्याख्या** - हे वेदविदां वर ! – वैदिकश्रेष्ठ !, त्वया - भवता, यथाश्रुतं - यथा आकर्णितं, तथा - तेन प्रकारेण, अयं - एषः, जनः - मद्विधः जनः, उच्चैःपदलङ्घनोत्सकः - उच्चैःपदाक्रमणोत्सुकः, अस्ति - भवति, इदं - एतत्, तपः - तपस्या, तदवाप्तिसाधनं - शिवप्राप्तिकारणं, किल - खलु, मनोरथानां - कामनां, अगतिः - अविषयः, न विद्यते - न वर्तते।

**सारः** - हे वेदविदां श्रेष्ठ ! त्वया येन प्रकारेण श्रुतं तथैव। मादृशः जनः उच्चैःपदाक्रमणोत्सुकः अस्ति। तपः शिवप्राप्तिहेतुः भवति। मनोरथानां अविषये न वर्तते।

**अथाह वर्णी विदितो महेश्वरस्त्वदर्थिनी त्वं पुनरेव वर्तते।**

**अमङ्गलाभ्यासरतिंविचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे ।। ६५ ।।**

**व्याख्या** - अथ - अनन्तरं, वर्णी - ब्रह्मचारी, आह - उवाच, महेश्वरः - परमेश्वरः, विदितः - प्रसिद्धः पुनः - भूयः, त्वं - भवती, तदर्थिनी - प्राप्तुकामा, एव वर्तसे - विद्यसे, अमङ्गलाभ्यासरतिं - चिताभस्मादीनां अनुलेपनप्रयासानुरक्तिम्, तं - तं शिवं, विचिन्त्य - विचार्य, तव- ते, अनुवृत्तिं - अनुसरणं, कर्तुं - विधातुं, न उत्सहे - अनुसर्तुं न शक्नोति।

**सारः** - ततः स ब्रह्मचारी पार्वतीं पुनः अवदत्। मया विदितः महेश्वरः। त्वं पुनः तमेव कामयसे। चिताभस्मानुलेपिनानुरागिणं तं शिवं विचार्य तव चित्तवृत्तिमनुसर्तुं न शक्नोमि।

**विग्रहः** - वर्णी - प्रशस्तः वर्णः अस्यास्तीति।

माहेश्वरः - महांश्चासौ ईश्वरः।

तदर्थिनी - तस्य अर्थिनी।

**क्रियाः** - आह - उभयपदि ब्रूञ् धातु (बृञ् व्यक्तायां वाचि) लट् परस्मैपदी प्र पु - ए व।

वर्तसे - वृतु धातु (वृतु वर्तने) लट् आत्मनेपदी म पु - ए व।

उत्सहे - उद् इत्युपसर्गपूर्वक सह धातु (षह मर्षणे) लट् आत्मनेपदी उ पु - ए व।

**अवस्तुनिर्बन्धपरे! कथं नु ते करोऽयमामुक्तविवाहकौतुकः।**

**करेण शम्भोर्वलयीकृताहिनासहिष्यते तत्प्रथमावलम्बनम्।। ६६ ।।**

**व्याख्या** - अवस्तुनिर्बन्धपरे - तुच्छवस्तुनिर्बन्धतत्परे ! आमुक्तविवाहकौतुकः - आसञ्जितपरिणयमङ्गलसूत्रः, अयं - एषः, ते - तव, करः - हस्तः, वलयीकृताहिना - भूषणीकृतसर्पेण, शम्भोः - शिवस्य, करेण - हस्तेन, तत्प्रथमावलम्बनं - तत्प्रथमग्रहणं, कथं नु सहिष्यते - केन प्रकारेण सहनं करिष्यति।

**सारः** - हे तुच्छवस्तुन्यभिनिवेशपरे ! विवाहकाले मङ्गलसूत्रभूषितः ते पाणिः सर्पभूषणयुक्तस्य शिवस्य करस्पर्शं पाणिग्रहणकाले कथं सहिष्यते।

**विग्रहः** - अवस्तुनिर्बन्धपरे - अवस्तुनि निर्बन्धः यस्याः सा अवस्तुनिर्बन्धपरा, तत् सम्बुद्धौ।

आमुक्तविवाहकौतुकः - विवाहे कौतुकं विवाहकौतुकं, तदामुक्तं यस्य सः।

वलयीकृताहिना - न वलयः अवलयः, अवलयः वलयः सम्पद्यमानः वलयीकृतः, वलयीकृतः अहिः यस्मिन् सः वलयीकृताहिः, तेन।

**क्रियाः** - सहिष्येते - सह् (षह मर्षणे) धातु लृट् आत्मनेपदी प्र पु - ए व।

**त्वमेव तावत्परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः।**

**वधूदुकूलं कलहंसलक्षणं गजाजिनं शोणितबिन्दुवर्षि च।। ६७।।**

**व्याख्या** - हे गौरि ! त्वमेव - भवती एव, स्वयं तावत् - आत्मना तावत्कालं, परिचिन्तय - विचारय, कलहंसलक्षणं - कलहंसचिह्नितं, वधूदुकूलं - नवोढाक्षौमं, तथा - तादृशं, शोणितबिन्दुवर्षि - रक्तबिन्दुवर्षि, गजाजिनं - करिचर्म, च एते, कदाचित् - कदापि, योगं - संयोगं, अर्हतः यदि - नैवार्हतः स्तः।

**सारः** - हे पार्वति ! भवती तावत् स्वयं चिन्तय। यत् कलहंसचित्रितं नवोढायाः दुकूलं रक्तबिन्दुवर्षि गजचर्म च एतत् द्वयं कदापि संगच्छते किम्?

**विग्रहः** - कलहंसलक्षणम् - कलहंसलक्ष्म इव लक्षणं यस्य तत्।

वधूदुकूलम् - वध्वाः दुकूलम्।

शोणितबिन्दुवर्षि - शोणितस्य बिन्दवः शोणितबिन्दवः तान् वर्षतीति।

**क्रियाः** - अर्हतः - अर्ह् धातु (अर्ह पूजायां) लट् परस्मैपदी प्र पु - द्वि व।

**चतुष्कपुष्पप्रकरावकीर्णयोःपरोऽपि का नाम तवानुमन्यते।**

**अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासुपरेतभूमिषु। । ६८ ।।**

**व्याख्या** - चतुष्कपुष्पप्रकरावकीर्णयोः - चतुष्ककुसुमसमूहव्याप्तयोः, तव - ते, पादयोः - चरणयोः, अलक्तकाङ्कानि - लाक्षारससञ्जितानि, पदानि - पदन्यासचिह्नानि, विकीर्णकेशासु - विक्षिप्तकचासु, परेतभूमिषु - श्मशानेषु, परः - अन्यः, अपि को नाम अनुमन्यते - कः जनः अनुमतिं ददाति।

**सारः** - कुसुमाच्छादितभूसञ्चारयोग्ययोः तव अतिकोमलयोः चरणयोः लाक्षारससिक्तानि पदचिह्नानि विकीर्णकुन्तलासु श्मशानभूमिषु पातयितुं शत्रुजनोऽपि अनुमतिं न ददाति।

**विग्रहः** - चतुष्कपुष्पप्रकरावकीर्णयोः - पुष्याणां प्रकरः पुष्णप्रकरः, चतुष्के पुष्पप्रकरः चतुष्कपुष्पप्रकरः, तस्मिन् अवकीर्णौ, तयोः।

**क्रियाः** - अनुमन्येत - अनु पूर्वक मन् धातु (मन् ज्ञाने) लट् आत्मनेपदी प्र.पु ए व।

**अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षः सुलभं तवापि यत्।**

**स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति ।।६९।।**

**व्याख्या** - त्रिनेत्रवक्षः - शिववक्षःस्थलं, शिवालिङ्गनमिति, तव - पार्वत्याः, सुलभं - सुप्राप्तम् अपि, अतः - परः, अस्मात् - अन्यत्, अयुक्तरूपं - अनुपयुक्तं किम्? वद - कथय, यत् - हि, हरिचन्दनास्पदे - हरिचन्दनार्चिते, अस्मिन् - एतस्मिन् , (तव) स्तनद्वये - पयोधरयुगले, चिताभस्मरजः - श्मशानभस्मरेणुः, पदं - स्थानं, करिष्यति - विधास्यति।

**सारः** - हे गौरि ! शिवालिङ्गनं ते सुलभम्। अतः परं ते अनुपयुक्तं किम्? हरिचन्दनार्चिते ते कुचद्वये श्मशान-भस्मरेणुः स्थानं करिष्यति।

**विग्रहः** - त्रिनेत्रवक्षः - त्रीणि नेत्राणि यस्य सः त्रिनेत्रः, तस्य वक्षः।

अयुक्तरूपम् - न युक्तम् अयुक्तं, अतिशयेनायुक्तम् इति अयुक्तरूपम्।

चिताभस्मरजः- चितायाः भस्म चिताभस्म, तस्य रजः।

**क्रियाः** - करिष्यति - (उभयपदी) कृञ् धातु लृट् परस्मैपदी प्र.पु ए व।

**इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया।**

**विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ।।७०।।**

**व्याख्या** - इयं - एषा, ते - तव, पुरतः - अग्रतः, अन्या - अपरा, विडम्बना - परिहासः, अस्ति। ऊढया - विवाहितया, वारणराजहार्यया - करिराजनेतव्या, त्वया - भवत्या, अधिष्ठितम् - आरूढं, वृद्धोक्षं - वृद्धवृषभं, विलोक्य - अवलोक्य, महाजनः - सत्पुरुषः, स्मेरमुखः - हसितवदनः, भविष्यति।

**सारः** - पतिगृहप्रस्थानकाले ते पुरतः अयम् अन्यः परिहासः भविष्यति। ऊढया गजेन्द्रोपरि नेतव्या त्वया वृद्धवृषभोपरि आरूढं दृष्ट्वा महाजनः उपहासं करिष्यति।

**विग्रहः** - वारणराजहार्यया - वारणानां राजा वारणराजः, तेन हार्या, तया।

**द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः।**

**कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी।।७१।।**

**व्याख्या** - पिनाकिनः - धनुर्धारिणः शिवस्य, समागमप्रार्थनया - सम्प्राप्तियाचनया, सम्प्रति - इदानीं, द्वयं - उभयं, शोचनीयतां - शोचनीयावस्थां, गतं - प्राप्तम्। सा - असौ, कान्तिमती - प्रभवती, कलावतः - कलायुक्तस्य चन्द्रस्य, कला - षोडशो भागः, अस्य - एतस्य, लोकस्य - संसारस्य, नेत्रकौमुदी - लोचनचन्द्रिका, त्वं - भवती च।

**सारः** - शिवप्राप्तिकामनयाधुना वस्तुद्वयं शोचनीयतां गतम्। प्रथमं चन्द्रस्य दीप्तिमतो कला ततः लोकस्य लोचनचन्द्रिका भवती च।

**विग्रहः** - पिनाकिनः - पिनाकमस्यास्तीति पिनाकी, तस्य।

कान्तिमती - प्रशस्ता कान्तिः यस्याः सा।

नेत्रकौमुदी - कौ मोदते इति कुमुदः, तस्येयं कौमुदी, नेत्रयोः कौमुदी नेत्रकौमुदी।

**वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।**

**वरेषु यत् बालमृगाक्षि! मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने।। ७२ ।।**

**व्याख्या** - वपुः - शरीरं, विरूपाक्षं - विकृतरूपाक्षं, अलक्ष्यजन्मता - अज्ञातजन्मत्वं, वसु - धनं, दिगम्बरत्वेन - नग्नत्वेन, निवेदितं - ज्ञातम्। हे बालमृगाक्षि ! - हे मृगशावकनयने !, वरेषु - वरजनेषु, यत् मृग्यते - यदन्विष्यते, तत् त्रिलोचने - शिवे, व्यस्तं - एकम्, अपि अस्ति किम्? - नास्ति इति।

**सारः** - तस्य शरीरं विरूपनेत्रं, अज्ञातजन्मत्वं, धनं नग्नत्वेन ज्ञातुं शक्यम्। हे बालमृगलोचने ! वरेषु ये गुणाः अन्विष्यन्ते तेषु एकमपि शिवे अस्ति किम्? नास्ति इति।

**विग्रहः** - विरूपाक्षम् - विकृतं रूपं येषां तानि विरूपाणि, तानि अक्षीणि यस्य सः विरूपाक्षः, तम्।
अलक्ष्यजन्मता - लक्षितुं योग्यं लक्ष्यं, न लक्ष्यमलक्ष्यं, अलक्ष्यं जन्म यस्य सः अलक्ष्यजन्मा, तस्य भावः।
दिगम्बरत्वम् - दिगेव अम्बरं यस्य सः दिगम्बरः, तस्य भावः।

**क्रियाः** - मृग्यते - मृग् धातु (मृग अन्वेषणे) कर्मणि लट् - प्र.पु - ए व ।

**निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।**
**अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया।। ७३ ।।**

**व्याख्या** - अस्मात् - एतस्मात्, असदीप्सितात् - अनिष्टकामनायाः, मनः - चेतः, निवर्तय - निरोधय। तद्विधः - तथाविधः, जनः - शिवः, क्व - कुत्र, पुण्यलक्षणा - शुभचिह्नयुक्ता, त्वं - भवती, च क्व - कुत्र, श्मशानशूलस्य - पितृवनशूलस्य, वैदिकी - वेदोक्ता, यूपसत्क्रिया - पशुबन्धनभूतः शुद्धः दारुविशेषः, न अपेक्षते - न इष्यते।

**सारः** - हे पार्वति ! अतः शिवप्राप्तिरूपादीप्सितात् चित्तं प्रतिनिवर्तय। बहुदोषयुक्तः शिवः कुत्र वर्तते? शुभलक्षणोपेता त्वं च कुत्र? उभयोः महदन्तरमस्ति। यथा वेदोक्तं यूपदारु श्मशानदारुवत् भवितुं नार्हति। तथैव त्वमपि शिवेन सह परिणयाय नार्हसि।

**विग्रहः** - असदीप्सितात् - न सत् असत्, असत् ईप्सितम् असदीप्सितम्, तस्मात्।
यूपसत्क्रिया - सती चासौ क्रिया सत्क्रिया, यूपस्य सत्क्रिया।

**क्रियाः** - अपेक्ष्यते - अप पूर्वक ईक्ष् धातु (ईक्ष दर्शने) कर्माणि लट् प्र पु - ए व।
निवर्तय - नि पूर्वक वृतु धातु णिजन्तात् लोट् परस्मैपदी म पु - ए व।

**इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया।**
**विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते।।७४ ।।**

**व्याख्या** - इति - एवं, द्विजातौ - ब्राह्मणे, प्रतिकूलवादिनि - विपरीतभाषिणि सति,

प्रवेपमानाधरलक्ष्यकोपया - कम्पमानोत्कण्ठलक्ष्यकोपया, तया - पार्वत्या, उपान्तलोहिते - अपाङ्गारुणे, विलोचने - नेत्रे, विकुञ्चितभ्रूलतं - कुटिलितभ्रूलतं, यथा स्यात् तथा, तिर्यक् - वक्रं, आहिते - निहिते।

**सारः -** एवं ब्रह्मचारिणि विपरीतं कथयति सति कम्पमानोत्कण्ठलक्ष्यकोपया तया पार्वत्या अपाङ्गारुणे नयने कुटिलितभ्रूलतं यथा तथा निहिते।

**विग्रहः** - द्विजातौ - द्वे जाती यस्य सः द्विजातिः, तस्मिन् ।

प्रतिकूलवादिनि - प्रतिकूलं वदतीति प्रतिकूलवादी तस्मिन् ।

**उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ त्वम्।**

**अलोकसामान्यमचिन्त्यहेतुकंद्विषन्ति मन्दाश्चरितं महात्मनाम्।। ७५ ।।**

**व्याख्या** - अथ - अनन्तरं, एनं - ब्रह्मचारिणं, उवाच - प्राह, त्वं - भवान्, परमार्थतः - तत्वतः, हरं - शम्भुं, न वेत्सि - न जानासि, नूनं - किल, यतः - यस्मात्, मां - पार्वतीं, एवं - इत्थं, आत्थ - कथयसि, मन्दाः - मूढाः, अलोकसामान्यं - जनसाधारणभिन्नं, अचिन्त्यहेतुकं - दुर्बोधकारणकं, महात्मनां - महापुरुषाणां, चरितं - चरित्रं, द्विषन्ति - दूषयन्ति।

**सारः** - अनन्तरं पार्वती ब्रह्मचारिणमुवाच भवान् यथार्थतः शिवं न जानाति। अतः एवं कथयति। मूढाः असाधारणं अचिन्त्यहेतुकं च सतां चरितं दूषयन्ति।

**विग्रहः** - परमार्थतः - परमश्चासौ अर्थः परमार्थः, तस्मात्।

अचिन्त्यहेत्तुकम् - चिन्तयितुं शक्यं चिन्त्यः, न चिन्त्यः अचिन्त्यः, स हेतुः यस्य तत्।

**क्रियाः** - आत्थ - उभयपदि ब्रूञ् धातु लट् परस्मैपदी म पु - ए व ।

द्विषन्ति - उभयपदि द्विष् धातु (द्विष अप्रतीतौ) लट् परस्मैपदी प्र पु - ब व।

**विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा।**

**जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः। । ७६ ।।**

**व्याख्या** - विपत्प्रतीकारेण - आपत्परिहारार्थिना, भूतिसमुत्सुकेन - ऐश्वर्ये उत्कण्ठितेन, वा - अथवा, मङ्गलम् - कल्याणम्, निषेव्यते - सेव्यते। जगच्छरण्यस्य - लोकशरण्यस्य, निराशिषः - निरभिलाषिणः,

सतः - सज्जनस्य, आशोपहतात्मवृत्तिभिः - तृष्णादूषितचेतोवृत्तिभिः, एभिः - एतैः मङ्गलैः, किं प्रयोजनम्? - कः अर्थः ?

**सारः** - अनर्थानपनेतुं ऐश्वर्यकामनया च मनुजः गन्धमाल्यादिमाङ्गलिकवस्तूनि सेवते। किञ्च लोकशरण्यस्य निरभिलाषिणः शिवस्य चित्तवृत्तिदूषकानां माङ्गलिकवस्तूनां सेवनेन किमपि प्रयोजनं नास्ति।

**विग्रहः** - विपत्प्रतीकारेण - विपदः प्रतीकारः विपत्प्रतीकारः, तेन।

निराशिषः - निर्गतः आशीः यस्मात् स निराशीः, तस्य।

**क्रियाः** - निषेव्यते - नि पूर्वक सेव् धातु कर्मणि लट्- प्र.पु - ए व।

**अकिञ्चनः सन् प्रभवः सः सम्पदां त्रिलोकनाथः पितृसद्मगोचरः।**

**स भीमरूपः शिव इत्युदीर्यते न सन्ति यथार्थविदः पिनाकिनः।। ७७।।**

**व्याख्या** - सः - असौ हरः, अकिञ्चनः - दरिद्रः सन्, सम्पदां - सम्पत्तीनां, प्रभवः - कारणं, पितृसद्मगोचरः - श्मशानगोचरः सन्, त्रिलोकनाथः - त्रिभुवनेश्वरः, भीमरूपः - भीषणाकृतिः सन्, शिवः - कल्याणकरः इति उदीर्यते - उच्यते। पिनाकिनः - हरस्य, यथार्थ्यविदः - तत्त्ववेत्तारः, न सन्ति - न वर्तन्ते।

**सारः** - शिवः दरिद्रः सन् विभवकारणं श्मशानगोचरः सन् त्रिलोकनाथः, भयङ्कररूपः सन् कल्याणकरः इति उच्यते, तस्य तत्त्ववेत्तारः न विद्यन्ते।

**विग्रहः** - अकिञ्चनः - नास्ति किञ्चन यस्य सः।

याथार्थ्यविदः - यथार्थस्य भावः याथार्थ्यं, तद् विदन्तीति याथार्थ्यविदः, ते।

**क्रियाः** - उदीर्यते - उत् पूर्वक ईर् धातु (ईर क्षेपे) कर्मणि लट् प्र.पु - ए व।

**विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा।**

**कपालि वा स्यादथवेन्दुशेखरंन विश्वमूर्तेरवधार्यते वपुः ।।७८।।**

**व्याख्या** - विश्वमूर्तेः - शिवस्य, वपुः - शरीरं, विभूषणोद्भासि - आभूषणकान्तं, पिनद्धभोगि - बद्धनागं, वा गजाजिनालम्बि - करिचर्मावलम्बि, दुकूलधारि वा - क्षौमधारि कपालि - कपालयुक्तं, वा - अथवा, इन्दुशेखरः - चन्द्रमौलिः, स्यात् - भवेत्, इति - एवं, नावधार्यते - न निश्चयः क्रियते।

**सारः** - विश्वमूर्तेः शिवस्य शरीरं भूषणमनोहरं बद्धभोगि गजचर्मावलम्बि क्षौमधारि कपालयुक्तं वा चन्द्रमौलिः भवेत् इति निश्चयः न क्रियते।

**विग्रहः -** विश्वमूर्तेः - विश्वं मूर्तिः यस्य सः विश्वमूर्तिः, तस्य।

पिनद्धभोगि - पिनद्धाः भोगिनः यस्मिन् तत्।

**क्रियाः** - अवधार्यते - अव पूर्वक धृञ् धातु (धृन् धारणे) कर्मणि लट् प्र पु - ए व।

**तदङ्गसंसर्गमवाप्यकल्पते ध्रुवं चिताभस्मरजो विशुद्धये।**

**तथा हि नृत्याभिनयक्रियाच्युतंविलिप्यते मौलिभिरम्बरौकसाम्।। ७९ ।।**

**व्याख्या -** तदङ्गसंसर्गं - शिवशरीरसम्पर्कं, अवाप्य - प्राप्य, चिताभस्मरजः - चिताभूतिरेणुः, विशुद्धये - पवित्रतायै, कल्पते - भवति। ध्रुवं - निश्चितं, तथाहि - यतो हि, नृत्याभिनयक्रियाच्युतं - ताण्डवाभिनयकर्मपतितं, तत्, अम्बरौकसां - दिवौकसां, मौलिभिः - शिरोभिः, विलिप्यते - लेपनं क्रियते।

**सारः -** शिवशरीरसंसर्गात् चिताभस्मरेणुरपि नूनं पवित्रतामेति। तस्मादेव तत् भस्म दिवौकसां उत्तमाङ्गैः लेपनं क्रियते।

**विग्रहः** - अम्बरौकसाम् - अम्बरमेव ओकः येषां ते अम्बरौकसः, तेषाम्।

**क्रियाः** - विलिप्यते - वि पूर्वक लेपृ धातु (लेपृ गतौ कम्पने च) कर्मणि लट् प्र.पु - ए व।

**असम्पदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनोवृषा।**

**करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोऽरुणाङ्गुली।।८० ।।**

**व्याख्या -** प्रभिन्नदिग्वारणवाहनः – मदस्राविदिग्गजयानः ऐरावतः, वृषा - शक्रेण, असंपदः - सम्पत्तिहीनस्य, वृषेण - नन्दिना, गच्छतः - यातस्य (वृषभारूढस्य) तस्य - शिवस्य, पादौ - चरणौ, मौलिना - शिरसा, उपगम्य - प्राप्य, विनिद्रमन्दाररजोऽरुणाङ्गुली - विकसितमन्दारपुष्परेणुरङ्गुली, करोति - विदधाति।

**सारः** - ऐरावतवाहनः देवेन्द्रः अपि वृषभारूढस्य शिवस्य पादौ शिरसा नत्वा मन्दारपुष्परागरक्ताङ्गुली च करोति ।

**विग्रहः** - प्रभिन्नदिग्वारणवाहनः - प्रकर्षण भिन्नः प्रभिन्नः, दिशः वारणः दिग्वारणः, प्रभिन्नः दिग्वारणः वा रूपं यस्य सः।

**विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम्।**

**यमामनन्त्यात्मभुवोऽपिकारणं कथं स लक्ष्यप्रभवो भविष्यति।।८१।।**

**व्याख्या -** च्युतात्मना - पतितस्वभावेन, दोषं - दूषणं, विवक्षिता - कथयितुम् इच्छता अपि, त्वया - भवता, ईशं प्रति - शिवं प्रति, एकं - वस्तु, साधु - सुष्टु, भाषितं - कथितं, यं - यं शिवं, आत्मभुवः - आत्मनैव भवतीति, तस्य – ब्राह्मणः, अपि कारणं - हेतुं, आमनन्ति - वेदाः उदाहरन्ति, सः - शिवः, कथं - केन प्रकारेण, लक्ष्यप्रभवः - दृश्यजन्मा, भविष्यति - भविता।

**सारः -** दुष्टस्वभावेन शिवदोषविवक्षता त्वया केवलं तस्यैको गुणः अलक्ष्यजन्मता कथितः। यं शिवः श्रुतः ब्रह्मणः अपि निदानमुदाहरन्ति, सः शिवः केन प्रकारेण दृश्यजन्मा भविष्यति ।

**विग्रहः -** च्युतात्मना - च्युतः आत्मा यस्य सः च्युतात्मा, तेन।

**क्रियाः -** आमनन्ति - आ पूर्वक मन् धातु (मन् अभ्यासे) लट् परस्मैपदी प्र पु ब व।

**अलं विवादेन यथा श्रुतस्त्वया तथाविधस्तावदशेषमस्तुसः।**

**ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते। ।८२ ।।**

**व्याख्या -** विवादेन अलं - अलं कोलाहलेन, सः - असौ शिवः, त्वया - भवता, यथा - येन प्रकारेण, श्रुतः - आकर्णितः, अशेषं - सम्पूर्णं, तथाविधः - तादृशः, अस्तु - भवतु। मम - मे, मनः - चित्तम्, अत्र - शिवे, भावैकरसं - अभिलाषैकरसं, स्थितं - अवस्थितं, तथा हि कामवृत्तिः - स्वेच्छाव्यवहारः, वचनीयं - निन्दां, न ईक्षते - न विचारयति।

**सारः -** अथवा कलहेनालम्। त्वयासौ शिवः येन प्रकारेण श्रुतः पूर्णरूपेण सः तथाविधः अस्तु। किञ्च मम चित्तं तु शिव एव अभिलाषैकरसः वर्तते। स्वेच्छाव्यवहारः निन्दां न पश्यति।

**क्रियाः -** अस्तु - अस् धातु (अस भुवि) लोट् परस्मैपदी प्र पु - ए व।

ईक्ष्यते - ईक्ष् धातु (ईक्ष् दर्शने) लट् आत्मनेपदी प्र पु - ए व।

**निवार्यतामालि! किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।**

**न केवलं यो महतोऽपभाषते श्रृणोति तस्मादपि यः सः पापभाक्। ।८३ ।।**

**व्याख्या** - हे आलि ! - हे सखि !, स्फुरितोत्तराधरः - कम्पिताधरोष्ठः, पुनः - भूयः, किमपि - किञ्चिदपि, विवक्षुः - वक्तुमिच्छुः, अयं - एषः, वटुः - ब्रह्मचारी, निवार्यताम् - दूरीक्रियताम्। यः - यो जनः, महतः - साधुजनान्, अपभाषसे - निन्दति। न केवलं स एव - केवलमसावेव न, पापभाक् - पापीयान्, अपि - तु, तस्मात् - पापिष्टेन, यः श्रृणोति - यः आकर्णयति, सः अपि पापभाक् भवति।

**सारः** - हे सखि ! अस्य कम्पिताधरोष्ठेन अयं पुनः किञ्चित् वक्तुकामः अस्ति इति अनुमीयते। अतः एतं ब्रह्मचारिणम् आश्रमात् दूरीक्रियताम्। यतः सः साधुजनान् निन्दति। न केवलं निन्दक एव पापभाक् अपि तु यः निन्दावचनं श्रृणोति सोऽपि पापीयान् भवति।

**विग्रहः** - पापभाक् - पापं भजतीति पापभाक्।

**इतो गमिष्याम्यथवेतिवादिनी चचाल बाला स्तनभिन्नवल्कला।**

**स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ।।८४।।**

**व्याख्या** - अथवा - अन्यथा (एवं न चेत्) इतः गमिष्यामि - अस्मात् स्थानात् व्रजिष्यामि, इति - एवं, वादिनी - भाषमाणा, स्तनभिन्नवल्कला - कुचस्रस्तवल्कला, बाला - पार्वती, चचाल - गन्तुमारभत। वृषराजकेतनः - परमेश्वरः च, स्वरूपं - प्रकृतरूपं, आस्थाय - स्थित्वा, कृतस्मितः- मन्दहसितः सन्, तां - पार्वतीं, समाललम्बे - जग्राह।

**सारः** - अथवाहं स्वयमेवास्मात् स्थानात् अन्यत्र गमिष्यामि इति कथयित्वा ततश्चचाल। तस्याः वक्षःस्थलाञ्चलमपतत्। तदनन्तरं शिवः आत्मनः प्रकृतरूपमास्थाय मन्दहसितः सः तां जग्राह।

**विग्रहः** - वादिनी - वदतीति वादिनी।

स्तनभिन्नवल्कला - स्तनाभ्यां भिन्नं वल्कलं यस्याः सा।

**क्रियाः** - गमिष्यामि - गम् धातु (गम्लृ गतौ) लृट् परस्मैपदी उ पु - ए व।

चचाल - चल् धातु (चल् कम्पने) लिट् परस्मैपदी प्र पु - एव।

समाललम्बे - सम् आङ् पूर्वक लब् धातु (लब् शब्दे अवस्रंसने च) लिट् आत्मनेपदी प्र पु - ए व।

**तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।**

**मार्गाचलव्यतिकराऽऽकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ ।।८५।।**

**व्याख्या** - तं - महादेवं, वीक्ष्य - दृष्ट्वा, वेपथुमती - कम्पयन्ती, सरसाङ्गयष्टिः - स्विन्नगात्रयष्टिः, निक्षेपणाय - अन्यत्र विन्यासाय, उद्धृतं - उत्क्षिप्तं, पदं - चरणं, तथैव - तेन प्रकारेण, उद्वहन्ती - धारयन्ती, शैलाधिराजतनया - हिमालयपुत्री पार्वती, मार्गचरव्यतिकराऽऽकुलिता - पथि पर्वतावरोधसंभ्रान्ता, सिन्धुः इव - नदी इव, न ययौ - न गतवती, नैव तस्थौ - न चातिष्ठत् ।

**सारः** - भगवती पार्वती शिवं समक्षं दृष्ट्वा स्वेष्टदेवदर्शनकुतूहलात् हर्षवशाच्च कम्पितवती। तस्याः शरीरं प्रस्वेदक्लिन्नं जातम्। अन्यत्र गन्तुमुद्यता शैलसुता परवशीभूता नदीव गन्तुं न शशाक, गमनोद्यमाच्च नैव विरराम।

**विग्रहः** - सरसाङ्गयष्टिः - रसेन सहिता सरसा, अङ्गमेव यष्टिः अङ्गयष्टिः, सरसा अङ्गयष्टिः यस्याः सा।

**क्रियाः** - ययौ - या धातु (या प्रापणे) लिट् परस्मैपदी प्र पु - ए व।

तस्थौ - स्था धातु (ष्ठा गतिनिवृत्तौ) लिट् परस्मैपदी प्र पु - ए व।

**अद्य प्रभृत्यवनताङ्गि! तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।**

**अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते ।।८६ ।।**

**व्याख्या** - हे अवनताङ्गि ! - हे नम्रशरीरे !, अद्य प्रभृति - अस्मद्दिनादारभ्य, तव - ते, तपोभिः - तपश्चरणैः, क्रीतः - आत्मवशीकृतः, दासः - सेवकः, अस्मि - भवामि। इति - एवं, चन्द्रमौलौ - शिवे, वादिनि - वदति सति, सा - पार्वती, अह्नाय - झटिति, नियमजं - नियमजातं, क्लमं - क्लेशं, उत्ससर्ज - विससर्ज। हि - यतः, क्लेशः - दुःखं, फलेन - फलसिद्ध्या, पुनः - भूयः, नवतां - नूतनतां, विधत्ते - धारयति।

**सारः** - हे अवनतशरीरे ! अद्यतोऽहं तपोभिः तवाधीनसेवकः अस्मि । एवं चन्द्रशेखरे वादिनि सति पार्वती झटिति तपस्यादिजातं क्लेशं तत्याज। यतः क्लेशः फलसिद्ध्या पुनः नवतां धारयति

**विग्रहः** - अवनताङ्गि - अवनतम् अङ्गं यस्याः सा अवनताङ्गी, तत्सम्बुद्धौ ।

**क्रियाः** - अस्मि - अस् धातु लट् परस्मैपदी उ पु- ए व।

उत्ससर्ज - उद् पूर्वक सृज् धातु (सृज विसर्ग) लिट् परस्मैपदी प्र पु - ए व।

विधत्ते - उभयपदि धाञ् धातु (डुधाञ् धारणपोषणयोः दाने च) लट् आत्मनेपदी प्र पु - ए व।

## ब्रह्मचारिणः शिवनिन्दा।

तदनन्तरं सख्याः वचनानन्तरं ब्रह्मचारिणोक्तम्। अहं महेश्वरं जानामि येन त्वं प्रथमं भग्नमनोरथा भूता। तमेव त्वं पुनः कामयसे। चिताभस्माद्यनुलेपनानुरागिणं तं शिवं विचार्य तव चित्तवृत्तिमनुसर्तुं न शक्नोमि। हे तुच्छवस्त्वनुरागिणि! परिणयमङ्गलसूत्रालङ्कृतः ते करः सर्पभूषणयुक्तस्य शिवस्य पाणिस्पर्शं कथं सहिष्यति? हे पार्वति ! त्वमेव स्वयं चिन्तय। यत् कलहंसचिह्नं वधूदुकूलं तथा रक्तबिन्दुवर्षि गजाजिनं च कदापि योगं न लभते। पुष्पाच्छादितभूसञ्चारयोग्ययोः तव कोमलपादयोः लाक्षारससिक्तानि पदचिह्नानि विकीर्णकेशासु परेतभूमिषु धर्तुं शत्रुरपि नानुमन्यते। हरिचन्दनचर्चिते तव कुचयुगले श्मशानभस्मरेणुः शिवालिङ्गने स्थानं करिष्यति। अतः परं अयुक्तरूपं किम्? तव पतिगृहप्रस्थानकाले प्रथमः परिहासो भविष्यति यत् गजेन्द्रारोहणार्हां त्वां वृद्धवृषभोपरि आरुह्य गच्छन्ती दृष्ट्वा साधुजनः विस्मिताननो भविष्यति। पिनाकिनः सम्प्राप्तियाचनायाद्य वस्तुद्वयं शोचनीयतां प्राप्तम्। प्रथमं चन्द्रस्य दीप्तिमती कला, अस्य संसारस्य लोचनचन्द्रिका भवती च। पुनः ब्रह्मचारी अवदत् यत् शिवस्य शरीरं विकृतं, जन्म अज्ञातं, धनस्य अवस्था दिगम्बरत्वेन ज्ञाता। हे बालमृगाक्षि ! वरेषु ये गुणाः अन्विष्यन्ते शिवे तेषु नैकोऽपि विद्यते। हे पार्वति ! अतः शिवप्राप्त्यभीप्सिताच्चेतः परावर्तय। बहुदोषयुक्तः शिवः क्व -? शुभलक्षणोपेता त्वं च क्व? उभयोः महदन्तरं वर्तते। यथा वेदोक्तं यूपदारु श्मशानदारुवत् भवितुं नार्हति। तथा त्वमपि शिवेन सह परिणयाय नार्हसि इति।

## ब्रह्मचारिणं पार्वत्याः प्रतिवचनम्।

पूर्वोक्तप्रकारेण ब्रह्मचारिणि प्रतिकूलवादिनि सति कम्पमानोष्ठानुमेयक्रोधया तया पार्वत्या अपाङ्गारुणे नयने कुटिलभ्रूलतं यथा स्यात् तथा निहिते। तदा सा पार्वती ब्रह्मचारिणमुवाच। भवान् तत्त्वतः शिवं न जानाति। अतः त्वं मां कथयसि। मूढाः असाधारणं दुर्बोधहेतुकं सतां चरितं दूषयन्ति। अनर्थपरम्परामपनेतुमिच्छया ऐश्वर्यकामनया च नरः गन्धमाल्यादिमाङ्गलिकवस्तुनि सेवते। किञ्च विश्वशरण्यस्य शिवस्य चेतोवृत्तिदूषकानां सेवनेन कोऽपि लाभः नास्ति। शिवः दरिद्रः सन्, विभवकारणं श्मशानाश्रयः सन्, त्रिलोकनाथः भयङ्कररूपः सन् कल्याणकरः उच्यते, तस्य तत्त्ववेत्तारः न विद्यन्ते। त्रिलोकनाथस्य शिवस्य शरीरं विभूषणमनोहरम् अथवा बद्धसर्पि गजचर्मावलम्बि अथवा दुकूलधारि, कपालधारि चन्द्रमौलि वा भवेत्। इत्थं निश्चयो न क्रियते। चिताभस्मरेणुरपि शिवशरीरसम्पर्कात् नूनं पवित्रतामाप्नोति। तदेव दिवौकसां शिरोभिः विलिप्यन्ते। दुष्टस्वभावेन शिवदोषविवक्षता त्वया केवलं तस्यैको गुणः 'अलक्ष्यजन्मता' कथितः। यं शिवं श्रुतः ब्रह्मणः अपि निदानमुदाहरन्ति, सः शिवः केन प्रकारेण दृश्यजन्मा भविष्यति। अथवा कलहकारणं व्यर्थम्। त्वयाऽसौ शिवः यद्विधः श्रुतः स तथाविधः अस्तु। किञ्च मम मनः तु शिव एवाभिलाषैकपक्षपाति वर्तते। स्वेच्छाव्यवहारो निन्दां न पश्यति। हे सखि! पुनः अयमितोऽप्यधिकं वक्तुकामः अस्ति। एतमाश्रमात् दूरीक्रियताम्। यः महतः निन्दति न केवलं स एव

पापभाक्। अपि तु यः श्रृणोति सोऽपि पापीयान्। अतोऽहं अस्मात् स्थानादन्यत्र गच्छामि। इति कथयित्वा सा पार्वती ततः चचाल। तदा एव शिवः आत्मानं प्रकृतरूपमास्थाय मन्दहसितः तां जग्राह। महादेवं वीक्ष्य वेपथुमती पार्वती स्वेदक्लिन्ना जाता। निक्षेपणाय पदमुद्धृतमुद्वहन्ती सा न ययौ न तस्थो।तदा सः महेश्वरः तामनुजग्राह। हे विनयशालिनि ! अद्यतोऽहं तपोभिः तवाधीनः सेवकः संजातः। एवं चन्द्रशेखरे कथयति सति पार्वती सपदि तपोजातं क्लेशं तत्याज। फलेन पुनः नवीनतां धारयति पार्वती।

## पुनरावृत्तिः (Recap)

- शिवं पतिं प्राप्तुं पार्वत्याः तपः इति ब्रह्मचारी ज्ञातवान्।
- ततः स ब्रह्मचारी शिवं बहुधा अनिन्दत् ।
- यत् सः शिवः विकृतशरीरः, अज्ञातजन्मा, श्मशानभस्मधारी, वृद्धवृषभसञ्चारी एवमादि।
- ब्रह्मचारिणः शिवनिन्दां श्रुत्वा पार्वती तदुचितं प्रतिवचनम् अदात्।
- पुनः अपवादभाषणं कर्तुम् उद्युक्तं ब्रह्मचारिणं तस्मात् नियन्तुं पार्वती सखीं प्रेरितवती ।
- निन्दाभाषणवत् निन्दाश्रवणमपि पापकरम् इत्यतः पार्वती तत्रस्थात् गन्तुमुद्युक्तवती ।
- तदा सः शिवः ब्रह्मचारिवेषं त्यक्त्वा यथार्थरूपेण पार्वत्याः पुरतः प्रत्यक्षीबभूव ।
- दृष्ट्वा च तं शिवं शैलाधिराजतनया न ययौ न तस्थौ।
- तदा स परमेश्वरः हे अवनताङ्गि ! अद्यतोऽहं तपोभिः तवाधीनः सेवकः अस्मि ।
- चन्द्रशेखरे एवं कथयति सति पार्वती तपोजातं क्लेशं त्यक्त्वा फलसिद्ध्या पुनर्नवतां विधत्ते।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. हरिचन्दनास्पदे अस्मिन् स्तनद्वये पदं करिष्यति। किम्?
2. त्रिलोचनस्य वपुः कीदृशः?
3. के महात्मनां चरितं दूषयन्ति?
4. विपत्प्रतिकारेण भूतिसमुत्सुकेन वा किं निषेव्यते?
5. शिवःइति पदस्य अर्थः कः?
6. अम्बरौकसां मौलिभिः विलिप्यते- कः?
7. कः वचनीयं ईक्षते?
8. कः पापभाक् भवेत् ?
9. मार्गचरव्यतिकराऽऽकुलिता का इव न ययौ न तस्थौ?

| |
|---|
| 10. फलेन पुन: नवतां विधत्ते। क:? |

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. त्वया महाजनः स्मेरमुखो भविष्यति- कथम्?
2. द्वयं गतं सम्प्रति शोचनीयतां- द्वयं किम्?
3. पिनाकिनं शिवः इति उदीर्यते - कुतः?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

**ससन्दर्भं व्याख्यात**

1. मनोरथानामगतिर्न विद्यते।
2. द्विषन्ति मन्दाश्चरितं महात्मनाम्।
3. न कामवृत्तिर्वचनीयमीक्षते।
4. न केवलं यो महतोपभाषते श्रृणोति तस्मादपि यः स पापभाक्।
5. क्लेशः फलेन हि पुनर्नवतां विधत्ते।

## निर्दिष्टाभ्यासः (Assignments)

1. ब्रह्मचारिणः शिवनिन्दां पार्वत्याः प्रतिवचनम् च - वर्णयत।
2. कुमारसम्भवस्य पञ्चमोऽध्यायं संक्षिप्य लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. शमशानभस्मरेणुः।
2. विरूपाक्षम्।
3. मूढाः।
4. मङ्गलम्।
5. कल्याणकरः।
6. चिताभस्मरजः।

7. कामवृत्तिः।
8. निन्दाभाषणवत् यः निन्दावचनं श्रृणोति सः पापभाक् भवेत्।
9. सिन्धुः इव।
10. क्लेशः।

## सूचनाग्रन्थौ (References)


1. परमेश्वरदीनपाण्डेयः, कालिदासः कुमारसम्भवम् (पञ्चमसर्गः) ,सुधासंस्कृत-हिन्दीव्याख्योपेतं चौखम्बाकृष्णदास अक्कादमी, वाराणसी।
2. कुट्टिकृष्णमारार्, कुमारसम्भवम् (गद्यपरिभाषा), मारार् साहित्यप्रकाशम् कल्लयि, कोषिक्कोट्, ६७३००३।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. आचार्य श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः चौखम्बा विद्याभवन्, वाराणसी २२१००१
2. T.K. Ramachandra Ayyar..A Short History of Sanskrit Literatur R.S Vadhyar & Sons Kalpathi Palakkad 678003

BLOCK-3

# गद्यपरिचयः

SGOU

# Unit - 1
# गद्यकाव्यानां सामान्यपरिचयः

## उद्देश्यानि (Learning Outcomes)

- गद्यकाव्यानां सामान्यपरिचयः।
- गद्यसाहित्यकारान् परिचाययति।
- गद्यसाहित्यग्रन्थानां सामान्यपरिचयः।
- संस्कृतगद्यकाव्यानां सविशेषताम् अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

भोः छात्राः,

महाकाव्यं गद्यकाव्यञ्च इत्यस्मिन् पत्रे तृतीये खण्डे वयं प्रविशामः। तुभ्यं स्वागतम्। अस्मिन् खण्डे गद्यकाव्यानां सामान्यपरिचयः प्रथमे एकके विशदयति।

कवेः कर्म काव्यम्। काव्यं दृश्यश्रव्यभेदात् द्विधा। दृश्यम् अभिनेयम्। श्रव्यं पाठ्यम्। काव्यस्य द्वितीयं विभजनमस्ति। गद्यं, पद्यं, मिश्रं चेति। कथा आख्यायिकाभेदात् गद्यकाव्यं प्रधानतया द्विविधम्। किन्तु दण्डिनः मते कथाख्यायिका इत्येका एव जातिः। महाकाव्यं, खण्डकाव्यादिभेदात् पद्यकाव्यमनेकविधम्। मिश्रे चम्पूकाव्यमन्तर्भवति ।

अपादः पदसङ्घातो गद्यम् इति दण्डी। स्वातन्त्र्येण प्रयोगाय गद्यमेवोपयुज्यते। भाषायाः प्राकृतिकं स्वरूपमेव गद्यम्। गद्यते इति गद्यम्। अनियतवर्णावसानं गद्यम्। संस्कृतगद्यसाहित्यं पद्यसाहित्यात् प्राचीनतरम्। गद्यसाहित्यस्य प्रारम्भिकं रूपं भाषितभाषया आरेभे। पश्चात् काले कृत्रिमता सञ्जाता। तथापि गद्ये स्वाभाविकता न नष्टा। गद्यसाहित्यस्य द्वितीयं रूपं सुबन्धुना प्रारब्धम्। गद्यकाव्यस्य पञ्चाशदधिकद्विसहस्रवर्षाधिकं (२०५०) दैर्घ्यमस्ति। गद्यसाहित्ये सुबन्धु - गुणाढ्य - बाणभट्ट - दण्डि - धनपाल - ओढ्यदेव - विश्वेश्वरपाण्डेय - कृष्णपण्डित – अम्बिकादत्तव्यास - रामशरणादयः अन्तर्भवन्ति। गद्यकाव्यं कथा- आख्यायिका चेति द्विविधम्। कथा कविकल्पिता वस्तुपात्रादिविषया। यथा बृहत्कथा। ऐतिहासिकवृत्ताधारा आख्यायिका। कथा नायकेन अन्येन वा वाच्या। आख्यायिका स्वयं नायकेनैव कथिता। यथा हर्षचचरितम्। कतिपयानां गद्यकाव्यानां विवरणमधो दीयते।

## मुख्यपदानि (Keywords)

सुबन्धुः - वासवदत्त- सप्तमशतकस्यादिभागः। गुणाढ्यः - बृहत्कथा- पिशाचभाषायाम्। बाणभट्टः - कादम्बरी - हर्षचरितम्। दण्डी - दशकुमारचरितम् - अवन्तिसुन्दरीकथा। धनपालः - तिलकमञ्जरी - समरकेतुः। ओड्यदेवः - गद्यचूडामणिः । विश्वेश्वरपाण्डेयः - मन्दारमञ्जरी - वैयाकरणसिद्धान्तसुधानिधिः । कृष्णपण्डितः - रत्नावली धर्माधिकारवंशः। अम्बिकादत्तव्यासः - शिवरामविजयः - पाटलीपुत्रस्थः। रामशरणः - कौमुदीकलाकल्लोलिनी - अन्ये संस्कृतकथाग्रन्थाः।

## Discussion

### 3.1.1 सुबन्धुः वासवदत्ता (7 CAD)

सुबन्धुप्रणीतं 'वासवदत्ता' संस्कृतसाहित्ये नितरां प्राधान्यमर्हति। आख्यायिकाविभागे अयं ग्रन्थः अन्तर्भवति। अस्य ग्रन्थकर्तुः जीवनकालमधिकृत्य चरित्रकारमण्डले विसंवादः वरीवर्ति। तथापि सप्तमशतकस्य आदिभागे जीवितमधारयत् इति चरित्रकाराः। सः मगधराजस्य बिन्दुसारस्य सभापण्डितः आसीत्। सुबन्धुना रचितं ग्रन्थं पठितुं राज्ञा बिन्दुसारेण न शशाक। सः राजा गद्यकाव्यं सरलीकर्तुं कविं प्रार्थितवान्। किन्तु काव्यस्य मौलिकता विनष्टा भवेत् इति चिन्तया राज्ञः अभ्यर्थनां कविः न मानितवान्। अतः राजा राज्यात् तं निष्कासितवान्। कौशाम्बीं प्राप्तं तं वत्सेशराजः स्वीचकार इति श्रूयते। सुबन्धुः बाणभट्टस्य पूर्विकः। बाणभट्टः हर्षचरिते एवं सूचयति -

**कवीनामगलद्दर्पोनूनं वासवदत्तया।**

**शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ।।इति।**

वासवदत्ताग्रन्थे वासवदत्तायाः कन्दर्पकेतोः च प्रेमकथां वर्णयति। नायकः कन्दर्पकेतुः स्वप्ने कुसुमपुरराजकुमारीं वासवदत्तां पश्यति। तस्याः सौन्दर्ये आकृष्टः सः मकरन्देन सह चलति। देशान्तरं सञ्चरन्नसौ विन्ध्याचलं प्राप्नोति। अत्रान्तरे वासवदत्ता स्वप्ने कन्दर्पकेतुं दृष्ट्वा तस्मिन् आकृष्टचित्ता बभूव। सा कामदेवतुल्यं तमन्वेष्टुं काञ्चन सारिकां प्रेषयति। विन्ध्याटव्यां शुकसारिकयोः संवादमाकर्ण्य कन्दर्पकेतुः वासवदत्ताप्रेमं ज्ञात्वा कुसुमपुरं गच्छति। राजकुमारीं दृष्ट्वा तौ मायाश्वमारुह्य इतस्ततः सञ्चार्य विन्ध्याटटवीं प्राप्नुवतः। तत्र तयोः विश्रमवेलायां निद्रावशं कन्दर्पकेतुं विहाय वनशोभया आकृष्टा वासवदत्ता कियन्मात्रदूरं अगच्छत्। तां किराताः अपहृतवन्तः। तस्याः प्राप्त्यर्थं किराताः कलहायमाने अवसरे वासवदत्ता पलायते। सा तु स्त्रीनिषिद्धं मुनेराश्रमं प्रविश्य शिलारूपेण परिणतिं प्राप।

निद्रातः विमुक्तः कन्दर्पकेतुः वासवदत्तामदृष्ट्वा अन्वेषणाय यतते। अन्ते तामेव शिलां स्पृशति। तत्स्पर्शनमात्रेण वासवदत्ता स्वकीयं पूर्वशरीरं प्राप्नोति। मकरन्दोऽपि तत्रैवागच्छति। ते स्वपुरं गत्वा ससुखमवसन्।

अस्य ग्रन्थस्य प्राधान्यमधिकमेव। सुबन्धुः वक्रोक्तिकथने श्लेषे च सर्वातिशय महत्वमावहति। कविनानेन अनुप्रासश्लेषोपमाद्यलङ्काराः प्रयुक्ताः। सोऽयं कविः

**सरस्वतीदत्तवरप्रसादाच्चक्रेसुबन्धुः भुवनैकबन्धुः।**

**प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिनिबन्धम्।**

सुबन्धुरचनायाम् अतीव सुन्दरा स्वरमाधुरी वर्तते। अपूर्वा च वर्णनाचातुरी दृश्यते। कवीनां अग्रणीं गणयन्ति तम्। गद्यकाव्यस्य आद्यः रचयिता महाकविः च सुबन्धुरेव। तस्यैवोच्छिष्टं सर्वं संस्कृतगद्यसाहित्यम्।

### 3.1.2 गुणाढ्यस्य बृहत्कथा। (6 CAD)

उपलभ्यमानकथाग्रन्थेषु प्राचीनतमः ग्रन्थः भवति गुणाढ्यस्य बृहत्कथा। पैशाचीनामिकायाम् अपभ्रंशभाषायामेव अस्य ग्रन्थस्य रचना कृता। सोऽयं षष्ठे शतके अजायत।

गुणाढ्यस्य रचनाविषयः कथासरित्सागरे उक्तमस्ति - यत् सः सातवाहनस्य राज्ञः सभापण्डितः आसीदिति। अत्र काचन कथा श्रूयते। सातवाहनः संस्कृतानभिज्ञः आसीत्। एकदा जलक्रीडायां राज्ञ्या "मोदकैस्ताडय" इत्युक्तः सः मोदकान् आनाय्य तैः प्रहर्तुमारभत। तदा "मा उदकैः" इति विज्ञातः लज्जाकुलः राजा संस्कृतं जिज्ञासुः पण्डितान् प्रार्थयामास। तदा गुणाढ्येन षड्भिः वर्षैः राजानं संस्कृतपण्डितं कर्तुं प्रतिज्ञातम्। सर्ववर्मणा षड्भिः मासैरेव तत्करणाय प्रतिज्ञातम्। ततः गुणाढ्यः पराजितः भूत्वा राजद्वारं, संस्कृतं, प्राकृतं च भाषामुत्सृज्य विन्ध्याटवीं प्राप। तत्र सः काणभूतेः कथां श्रुत्वा तां पिशाचभाषायां ग्रथितवान्। सः स्वरक्तेन सप्तलक्षात्मकान् श्लोकान् विरच्य सातवाहनं समर्पितवान्। पैशाच्यां लिखितत्वात् राजा तं ग्रन्थं तिरस्कृतवान्। निराशाकुलः गुणाढ्यः स्वग्रन्थं कानने वन्यमृगाणां पुरतः वाचयित्वा अग्नौ समर्पितवान्। अन्तिमं लक्षपरिमितं विहाय सर्वे श्लोकाः विनष्टाः। सातवाहनस्य हस्ते अन्तिमं भागं सम्प्राप्तम्। तस्मिन् नरवाहनदत्तस्य चरित्रमेवावशिष्टम्।

बृहत्कथा अनेकधा प्रशस्ता। ग्रन्थस्यास्य त्रीणि संस्करणानि लभ्यन्ते- बृहत्कथाश्लोकमञ्जरी, बृहत्कथामञ्जरी, कथासरित्सागरश्च।

### 3.1.3 बाणभट्टः - हर्षचरितम्, कादम्बरी (7 C AD)

संस्कृतगद्यसाहित्ये महोन्नतं स्थानमर्हति महाकविः बाणभट्टः। सः हर्षवर्धनमहाराजस्य आस्थानकविरासीत्। सः हर्षवर्धनः स्थाणीश्वरस्य (तानेश्वरस्य) इदानीन्तनस्य कानूज्नगरस्य राजा आसीत्। तस्य भरणकालः ६०६ तः ६४८ पर्यन्तमासीत्। तस्य ग्रन्थतल्लजे आस्तां हर्षचरितं, कादम्बरी च।

बाणभट्टस्य पिता चित्रभानुः, माता राजदेवी चास्ताम्। पिता वात्स्यायनगोत्रे हिरण्यनद्याः तीरे प्रीतिकूटग्रामे जातः आसीत्। इदानीं बीहार् देशे छप्रप्रविश्यायामेव अयं ग्रामः। बाणभट्टस्य चतुर्दशे वयसि पिता ममार। पुनः सः वयस्यैः सह इतस्ततः भ्रमन् अलसजीवितं निनाय। तथापि सः सर्वविद्यापारङ्गतः आसीत्। भ्रमणानुभवाः तस्य काव्यरचनायै साहाय्यकम् अभवत्। पश्चात् कृतोद्वाहः सः स्वस्थो बभूव। तस्य विद्यापाटवं ज्ञात्वा हर्षः तं सभापण्डितत्वेनाङ्गीचकार। एवं पञ्चविंशतिवयस्कः बाणभट्टः श्रीहर्षस्य सभापण्डितः समजायत।

हर्षचरितमेव संस्कृतसाहित्ये आविर्भूतं प्रथमं चरित्रकाव्यम्। हर्षचरिते बाणभट्टः हर्षस्य जीवचरितं लिखितवान्। तस्मिन् अष्टौ उच्छ्वासाः (अध्यायाः) सन्ति। हर्षचरितम् आख्यायिकाविभागे अन्तर्भवति। हर्षचरितस्य प्रथमे द्वितीये च उच्छ्वासे हर्षस्य वंशवर्णना वर्तते। तृतीये उच्छ्वासे हर्षपूर्वजस्य पुष्पभूपतेः वर्णनम्। चतुर्थे प्रभाकरवर्धनस्य शौर्यवर्णनम् अस्ति। अस्मिन्नध्याये एव राज्यवर्धनस्य हर्षवर्धनस्य राज्यश्रियाश्च जन्मवर्णनाः। राज्यश्रियाः ग्रहवर्मणा सह विवाहः वर्णितः। पञ्चमे उच्छ्वासे राज्यवर्धनस्य हूणविजयार्थगमनं, तथा प्रभाकरवर्मणः वधं च सूचितमस्ति। षष्ठे राज्यवर्धनस्य प्रत्यागमनं, मालवराजेन ग्रहवर्मणः हत्या, राज्यश्रियाः निरोधः च वर्णितः। पुनः राज्यवर्धनः मालवराजं पराजितवान्। किन्तु गौडनरेशः शशाङ्कः राज्यवर्धनं कपटरूपेण जघान। सप्तमे अध्याये हर्षः गौडराजं हन्तुं गमनं, राज्यश्रिया विन्ध्याटव्यां पलायनं, तामन्वेष्टुं हर्षस्य प्रयासः च वर्णितवान्। अष्टमे उच्छ्वासे राज्यश्रिया सह हर्षस्य प्रत्यागमनं वर्णितमस्ति। अपूर्णा इयं कृतिः। कारणं तु राज्ञः हर्षस्य वधमेव भवेत्। बाणोऽपि हर्षवधानन्तरं बहुकालं नैव जीवितः आसीत्।

बाणभट्टस्य जीवितकाले प्रचलितां राष्ट्रियव्यवस्थां कथमासीदिति ज्ञातुं अनेन ग्रन्थेन शक्यते। अपि च तत्रस्थाः साम्पदिक-सामूहिक-धर्मपराः जीवितरीतयः सुष्टु अवगन्तुं शक्यते। साहित्यदृष्ट्या अयं ग्रन्थः नितरां प्राधान्यमर्हति। श्लेषघटनायां रसाविष्करणे अलङ्कारप्रयोगे अर्थगोरवे कथावर्णनायां च बाणभट्टः कविषु अग्रगण्यः एव।

हर्षचरितवर्तिका नाम टीका रुय्यकः रचितवान्। अपरा टीका भवति शङ्करकविप्रणीता सङ्केता।

### 3.1.3.1 बाणभट्टः - कादम्बरी (7 C AD)

बाणभट्टेन लिखितः कथामयः ग्रन्थः भवति कादम्बरी। सा कृतिः अपि अपूर्णा। कल्पनावैचित्र्येण अलङ्कृता इयं कृतिः संस्कृतसाहित्ये आचन्द्रतारं देदीप्यते।

विशालदेशस्य अधिपः भवति शूद्रकः। तस्य सभायाम् एकदा काचन चण्डालकन्यका पञ्जरस्थं शुकमानीय राज्ञे समर्पयति। तस्य शुकस्य नाम भवति वैशम्पायनः। स शुकः मनुष्यवाचा राजानम् आत्मकथां

श्रावयति। कथायाः अन्ते पूर्वजन्मवृत्तान्तं स्मृत्वा राजा पूर्वजन्मदेहं प्राप्नोति। जन्मत्रयस्य वृत्तान्तम् अस्मिन् ग्रन्थे प्रतिपादयति।

शुकः स्ववृत्तान्तं श्रावयन् एवं कथयति। यदा सः अजायत तदैव तस्य माता दिवंगता। किञ्चित्कालानन्तरं एकः लुब्धकः पितरं जघान। वृक्षादधः पतितः कथञ्चित् प्राणावशिष्टं तं कश्चन मुनिकुमारः जाबालेः आश्रममानिनाय। जाबालिः तस्य पूर्वजन्मवृत्तान्तं श्रावितवान्। उज्जयिन्यां तारापीडो नाम राजा। तस्य भार्यायां विलासवत्यां चन्द्रापीडो नाम पुत्रः जातः। तारापीडस्य सचिवस्य शुकनासस्य वैशम्पायनः नाम पुत्रः समजनि। अभ्यस्तविद्यं तारापीडं यौवराज्ये अभिषिक्तवान्। शुकनासः चन्द्रापीडं बहुपदेशं दत्तवान्।

एकदा युवराजः चन्द्रापीडः मन्त्रिपुत्रेण वैशम्पायनेन सेविकया पत्रलेखया च सह दिग्विजयायागच्छत्। यात्रान्ते महाश्वेतां ददर्श। महाश्वेता पुण्डरीकवृत्तान्तं श्रावयित्वा तं कादम्बरीवृत्तान्तमपि अकथयत् । कादम्बरीचन्द्रापीडौ परस्परानुरागिणौ अभवताम्। एतस्मिन् समये पितुराज्ञया चन्द्रापीडः उज्जयिनीं प्रत्यागतः । पुनः पत्रलेखा प्रत्यागत्य कादम्बरीविरहावस्थां चन्द्रापीडाय न्यवेदयत्।

बाणः कादम्बर्याम् एतावान् भागः रचितः। शिष्टा कथा बाणपुत्रः भूषणभट्टः लिखितवान्। बाणरचितः भागः कथायाः पूर्वार्धः स्मृतः। भूषणभट्टगुम्भितभागः उत्तरभागः भवति।

कादम्बर्याः विरहव्यथां पत्रलेखातः सविस्तरं श्रुत्वा तस्याम् आकृष्टमनाः चन्द्रापीडः महाश्वेताशापेन वैशम्पायनं शुकभूतं श्रुत्वा विरहातुरः प्राणान् उपेक्षितवान्। तन्मृतशरीरं आलिङ्ग्य कादम्बरी आत्महत्यां कर्तुमारभत। तदा भविष्यत्समागमसन्देशेन नभोवाणी तां मरणात् निवारयामास। सरसि इन्द्रायुधोऽप्यगाहत। ततश्च कपिञ्जलो बहिरागत्य सर्वं रहस्यं श्रावयति।

कादम्बरीमधिकृत्य अनेकाः अर्वाचीनाः टीकाः सन्ति। ताः हरिदाससिद्धान्तवागीशकृता कल्पलता, कृष्णमोहनठक्कुरविरचिता चन्द्रकला, शेषराजशर्मणा रचितायाः टीकायाः नामापि चन्द्रकला इत्यादयः।

यद्यपि बाणभट्टस्य उभौ ग्रन्थौ प्रसिद्धौ तथापि तयोः कादम्बरी प्रशस्ततरा। हि कादम्बर्याः पात्रचित्रणं रसपरिपाकः वस्तुविन्यासः च अतीव मनोहारिणौ। उभावपि पाञ्चालीरीत्यां रचितौ स्तः। व्यञ्जनाप्रधानः वक्रोक्तिनिर्भरं च भवति ग्रन्थद्वयमिदम्। हर्षचरितस्य अपूर्णतायां हर्षस्य निधनं चेत् कादम्बर्याः अपूर्णतायां कवेरेव मरणं हेतुः भवति ।

बाणभट्टेन अस्पृष्टं किमपि वस्तु न दृश्यते। उक्तं च 'बाणोच्छिष्टं जगत्सर्वम्' इति। संस्कृतकथासाहित्ये नवः युगः बाणेन आरब्धः। श्लाघ्यमेव तस्य वर्णनापाटवम्। कविना बाणेन सूचितमेव यत्

**नवोऽर्थो जातिरग्राम्याऽक्लिष्टःस्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्।। इति**

बाणेन रचिताः कृतयः भवन्ति चण्डीशतकम्, शिवाष्टकम्, शारदचन्द्रिका (नाटिका) पार्वतीपरिणयः (नाटकम्) च। चण्डीशतके शतश्लोकैः देवीं स्तौति। शैवधर्मावलम्बिनत्वात् शिवाष्टकस्य कर्ता बाणेति कार्ये न सन्देहः। किन्तु मुकुटताडिकस्य शारदचन्द्रिकाया च कार्ये चरित्रकाराः पण्डिताः भिन्नाभिमतं प्रकटयन्ति।

कादम्बरीमुपजीव्य द्वौ ग्रन्थौ प्रसिद्धौ स्तः। एकस्तु मञ्जुनाथस्य कादम्बरीसारः, अपरस्तु गौडाभिनन्दस्य कादम्बरीकथासारः च।

### 3.1.4 दण्डी - दशकुमारचरितम्, अवन्तिसुन्दरीकथा(7 CAD)

संस्कृतशास्त्रमण्डले कविमण्डले च विश्रुतः आसीत् दण्डी। क्रिस्त्वब्धे सप्तमे शतके सः स्वजीवितनेमं लोकं पावयामास। तेन विख्याताः त्रयः ग्रन्थाः रचिताः। शास्त्रमण्डले विश्रुतमेव तस्य काव्यादर्शः नाम ग्रन्थः। दशकुमारचरितं नामकं गद्यग्रन्थः संस्कृतगद्यसाहित्ये नितरां प्रसिद्धः। अपरः कश्चन प्रसिद्धः ग्रन्थतल्लजं भवति अवन्तिसुन्दरीकथा। तस्य महत्वं सूचयति अयं श्लोकः।

**जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।**
**कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।। इति।**

कौशिकगोत्रे सञ्जातः कश्चन ब्राह्मणः आसीत् दण्डी। दण्डी इति नाम यथार्थं वा नवेति संशयः इदानीमवशिष्यते। दशकुमारचरितस्य मङ्गलाचरणे 'ब्रह्माण्डच्छात्रदण्डः शतधृतिभावनाम्भोरुहो नालदण्डः' इति श्लोके पुनः पुनरपि दण्डशब्दस्य प्रयोगे दण्डी इति नाम प्राचलत् इति कांश्चन कथां श्रूयते। अवन्तिसुन्दरीकथायां काचन सूचना वर्तते यत् विदुषः नारायणस्वामिनः पुत्रः आसीत् भारविः (किरातार्जुनीयस्य कर्ता) इति। तस्य पुत्रत्रये मध्यमः एव आसीत् मनोरथः। मनोरथस्य चतुर्षु पुत्रेषु अन्यतमः आसीत् वीरदत्तः। अयं वीरदत्तः आसीत् दण्डिनः पिता। माता गौरी इति।

दशकुमारचरितं दण्डिनः प्रथमं गद्यकाव्यम्। तस्य पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका चेति त्रयः भागाः। दशानां कुमाराणां पौरुषपराक्रमवर्णना अस्य ग्रन्थस्य विषयः। मगधेशराजस्य पुत्रस्य राजवाहनस्य तन्मित्राणां नवानां सञ्चारः देशाटनानुभवाः सम्यक्तया अस्मिन् ग्रन्थे वर्णयति।

दण्डिनः कल्पना उदात्ता प्रसादमधुरा भावगर्भिता च। प्रसादमधुराणि वचांसि हृदयाह्लादकानि भवन्ति। सर्वालङ्कारप्रयोगे सः प्रवीणः सन्नपि अनुप्रासमयपदविन्यासे नितरां तात्पर्यं दृश्यते। अपि च अस्मिन् गद्यकाव्ये नानाविधाः रोमाञ्चकारिण्यः घटनाः सन्ति। ग्रन्थस्यास्य मुख्यः रसस्तु वीर एव। किन्तु प्राधान्यम् अद्भुतस्यैव।

दशकुमारचरितस्य अनेकाः टीकाः सन्ति। पूर्वपीठिकायाः टीका भवति पददीपिका। कवीन्द्राचार्यसरस्वतिना रचिता पदचन्द्रिका नाम टीका मध्यभागस्य दशकुमारचरितस्य भवति।

उत्तरपीठिकायाः टीका न दृश्यते। पूर्वपीठिकायाः मध्यभागस्य च कृते ताराचरणभट्टाचार्यः एकां टीकां रचितवान्। सा भवति बालबोधिनी ।

केचन विद्वांसः छन्दोविचितिनामकः वृत्तशास्त्रग्रन्थः दण्डिनः इति मन्यन्ते। एवं तस्याः 'कलापरिच्छेदे रूपमाविर्भविष्यति' इत्युल्लेखात् कलापरिच्छेदः इत्ययमपि ग्रन्थः दण्डिनः इति मन्यन्ते। किन्तु पर्याप्तस्य प्रमाणस्याभावात् एतदुभयग्रन्थमपि दण्डिनः इति वक्तुं न शक्यते। राजशेखरेण सूचितं भवति यत् -

**त्रयोऽग्नयस्त्रयो वेदास्त्रयो गुणाः**
**त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ।। इति।**

अतः काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति त्रयः ग्रन्थाः दण्डिना विरचिताः ।

### 3.1.4.1 दण्डिनः अबन्तिसुन्दरीकथा।

दण्डिनः गद्यकाव्येषु अन्यतरः भवति अवन्तिसुन्दरीकथा। राजवाहनः अवन्तिदेशस्य राजकुमारीम् अवन्तिसुन्दरीं पाणिग्रहणं करोति। अवन्तिसुन्दरी एवास्य गद्यकाव्यस्य नायिका। अयं ग्रन्थः कतिपयैः पद्यैरारभते। अत्र वाल्मीकि-व्यास-सुबन्धु-गुणाढ्यादीनां कवीनां परामर्शः अस्ति। पुनः गद्येन ग्रन्थारम्भः कृतः। दण्डिना 'ओजः समासभूयस्त्वं गद्यस्य जीवितम्' इति यदुक्तं तद् अवन्तिसुन्दरीकथायां पूर्णतः चरितार्थं भवति।

### 3.1.5 धनपालस्य तिलकमञ्जरी (10 CAD)

संस्कृतगद्यकाव्यमण्डले धनपालस्य तिलकमञ्जरी प्रमुखं स्थानं वहति। सः धाराराजस्य मुञ्जस्य सभापण्डितः आसीत्। सः दशमे शतके जीवितमधारयत् इति चरित्रकाराः वदन्ति। अस्मिन् राजकुमारस्य समरकेतोः प्रेमविवाहं वर्णयति। तस्य नायिका आसीत् तिलका नाम परमसुन्दरी।

ग्रन्थस्य भूमिकायां प्राचीनान् कविश्रेष्ठान् कविः स्मरति। वाल्मीकिव्यासप्रवरसेनकालिदासादीन् स्मृत्वा ग्रन्थरचना आरब्धा। अपि च ग्रन्थेऽस्मिन् बृहत्कथां तरङ्गवतीम् इति द्वौ ग्रन्थौ अधिकृत्य सूचना वर्तते। बाणस्य शैली अनेन कविना स्वीकृता इति समालोचकाः वदन्ति।

### 3.1.6 ओड्यदेवस्य (वादीभसिंहस्य) गद्यचूडामणिः (12 C AD)

ओड्यदेवस्य गद्यकाव्यं भवति गद्यचूडामणिः। सः द्वादशशतके अजायत। अस्मिन् काव्ये राजपुत्रस्य जीवनधरस्य चरितमेव वर्णयति। तस्य कवेः अपरं नाम भवति वादीभसिंहसूरिः इति। अध्यायस्य स्थाने कविना 'लम्ब' इति नाम दत्तम्। जैनधर्मानुयायी आसीत् सः कविः। अनेन श्लोकेन स्वकृतिमारभत।

**श्रियः पतिः पुष्यतु वः समीहितं त्रैलोक्यरक्षानिरतो जिनेश्वरः।**
**यदीयपादाम्बुजभक्तिशीकरःसुरासुराधिशपादायजायते।। इति।**

### 3.1.7 विश्वेश्वरपाण्डेयस्य मन्दारमञ्जरी (18 C AD)

विश्वेश्वरस्य मन्दारमञ्जरी, कादम्बर्याः शैल्या रचितः कश्चन प्रशस्तः कथाग्रन्थः भवति। तेन अनेके ग्रन्थाः रचिताः। केचन ग्रन्थाः अप्रकाशिताः। नव ग्रन्थाः प्रकाशिताः। ते - .वैयाकरणसिद्धान्तसुधानिधिः, अलङ्कारकौस्तुभः, रसचन्द्रिका, आर्यासप्तशती, अलङ्कारप्रदीपः, अलङ्कारमुक्तावली, कवीन्द्रकर्णाभरणम्, रोमावलीशतकम्, मन्दारमञ्जरी च भवन्ति।

मन्दारमञ्जरी गद्यकाव्येषु अन्यतमं ग्रन्थतल्लजं भवति। कुसुमपुरस्य राजा आसीत् राजशेखरः। तस्य पुत्रः आसीत् चित्रभानुः। चित्रभानोः मन्दारमञ्जर्याः प्रेम एव कविनात्र वर्णितम्। काव्येऽस्मिन् कुसुमपुरवर्णनं, नृपराजशेखरवर्णनं, तस्य प्रजापरिपालनपाटवं, राज्ञः प्रतापातिशयवर्णनम्, कुमारोत्पत्ति, शिक्षणपटुत्वं, मन्दारमञ्जरीसमागमं च सविशदं प्रतिपादयति। नायकस्य चित्रभानोः नायिकायाः मन्दारमञ्जर्याः च समागमपर्यन्तमेव चित्रितम्। अयं ग्रन्थः अपूर्णः दृश्यते। कवेः आकस्मिकमरणमेवास्य कारणम्। पुनः विश्वेश्वरस्य केनचित् शिष्येण ग्रन्थस्य उत्तरभागः पूरितः इति श्रूयते।

वैयाकरणपटुः आलङ्कारिकः चासौ कविसार्वभौमः क्रिस्तोः अष्टादशशतकस्य प्रथमपादे अजायत। चत्वारिंशद्वर्षपर्यन्तं जिजीव। बाल्यात्प्रभृति ग्रन्थरचनायां व्यापृतः सः सरस्वतीसेवया आजीवं कालं निनाय।

कवेः पिता लक्ष्मीधरो नाम पण्डिताग्रेसरः। पुत्रः जयकृष्णोऽपि कुलमहिमां संवर्धयामास।

बाणभट्टस्य शैलीमनुकुर्वन् असौ कविः प्रौढां भाषां प्रयुक्तवान्। अलङ्कारविद्वान् सः श्लेष-रूपक-उत्प्रेक्ष-विरोधाभासैरलङ्कारैः काव्यशोभां वर्धयामास। भावस्य भाषायाः च सुन्दरः समन्वयः मनोहराभिः वर्णनाभिः युक्ता च दृश्यते।

### 3.1.8 कृष्णपण्डितस्य रत्नावली (18 CAD)

महाकवेः श्रीहर्षस्य रत्नावली नाम नाटिका श्रेष्ठा। रत्नावलीनामधेयेन किञ्चन गद्यकाव्यमप्यस्ति। तस्य कर्ता अष्टादशशतके जातः कृष्णपण्डितः। सः कविः धर्माधिकारिवंशे जातः आसीत्।

अस्मिन् काव्ये गन्धर्वराजकुमार्याः रत्नावल्याः नागराजकुमारेण रत्नचूडेन सह परिणयः वर्णितः। काव्यगुणैः समलङ्कृतोऽयं ग्रन्थः सर्वदा मौलिकः। अस्य दीर्घसमासवन्ति वाक्यानि बाणं स्मारयन्ति। श्लेषप्रयोगे सुबन्धुं पदलालित्ये दण्डिनं चानुकरोति। स्वल्पमपि काव्यमिदं सुखपर्यवसानं च भवति।

### 3.1.9 अम्बिकादत्तव्यासस्य शिवराजविजयः (19 CAD)

जयपुर्यां पाटलीपुत्रे अम्बिकादत्तव्यासः जनिं प्राप। कविश्रेष्ठेन तेन अनेके ग्रन्थाः रचिताः। तेषु शिवराजविजयं नाम गद्यकाव्यं नितरां प्रसिद्धम्।

ऐतिहासिकवृत्तमेव अस्मिन् काव्ये वर्णितम्। शिवाजीवीरस्य साहसिकं जीवनवृत्तं आख्यायिकारूपेऽस्मिन् वर्णयति। १६३० वर्षे संजातः शिवाजी स्वबाहुबलेन महाराष्ट्रस्य सम्राट् समजायत। सः मुगलशासनात् मारात्तदेशस्य मोचनाय नितरां यतितवान्। भारतीयनाविकसेनायै सः परिष्कारादिकं कृतमिति श्रूयते।

विविधैः रसैः परिपुष्टेऽस्मिन् काव्ये वीररसः एव मुख्यः। वैदर्भ्यां रीत्यां रचितेऽस्मिन् प्रसादगुणः वर्तते।

### 3.1.10 रामशरणस्य कौमुदीकलाकल्लोलिनी (19 CAD)

संस्कृतगद्यकाव्येषु काश्मीरदेशस्य रामशरणस्य कौमुदीकथाकल्लोलिनी प्रधानं किमपि स्थानमलङ्करोति। भट्टिकाव्ये इव अस्मिन् काव्ये कथामाध्यमेन व्याकरणप्रयोगाः शिक्षिताः।

ऊनविंशतितमे शतके जातोऽयं कविः भावनया समकालिकान् कवीनतिशेते। उदयनपुत्रस्य नरवाहनदत्तस्य जन्मत आरभ्य अभिषेकपर्यन्ता कथा अस्मिन् ग्रन्थे सूचिता।

**अन्ये संस्कृतकथाग्रन्थाः।**

| | | |
|---|---|---|
| वामनभट्टबाणस्य | - | वेमभूपालचरितं, वीरनारायणचरितं च। (15 CAD) |
| अनन्तशर्मणः | - | मुद्राराक्षसपूर्वसङ्कथानकम् । |
| क्षमायाः | - | कथामुक्तावली। |
| देवविजयगणिनः | - | रामचरितम् । |
| विद्यानाथस्य | - | कृष्णचरितम् (13 CAD) |
| नृसिंहस्य | - | अभिनवकादम्बरी। |
| राजगोपालस्य | - | शैवालिनी, कुमुदिनी, विलासकुमारी, सङ्गरः। |
| कल्याणरामस्य | - | कनकलता। |
| कृष्णमाचार्यस्य | - | मन्दारवती। |
| आल्वार् अय्यङ्कारस्य | - | जयन्तिका। |
| श्रीशैलस्य | - | मेनका। |

इत्यनेकाः संस्कृतकथाग्रन्थाः सन्ति।

**संक्षिप्तीकरणम्।**

| **कवेः नाम कालः च** | **ग्रन्थस्य नाम इतरग्रन्थाः** | **संक्षिप्तं विवरणम्** |
|---|---|---|
| १. सुबन्धुः (7C AD) | वासवदत्ता | आख्यायिका। बिन्दुसारस्य सभायां पण्डितः। बिन्दुसारेण तिरस्कृतं तं कौशम्बीराजः वत्सेशराजः स्वीचकार। वासवदत्तायाः कन्दर्पकेतोः च प्रेमकथा। |
| २. गुणाढ्यः (6C AD) | बृहत्कथा | पैशाचीभाषायाम् (अपभ्रंश) रचितम्। कथाग्रन्थेषु प्राचीनतमः। सातवाहन महाराजस्य सभापण्डितः। सप्तलक्षकान् श्लोकान् विरचितवान्। पैशाच्यां रक्तैश्च रचितत्वात् तिरस्कृतम्। अवसानभागे वर्तमानान् लक्षपरिमितान् श्लोकान् विहाय सर्वै श्लोकाः अग्नौ समर्पितवान्। त्रीणि संस्करणानि। |
| ३. बाणभट्टः (7C AD) | कादम्बरी। टीकाः - हरिदासवागीशः- कल्पलता, कृष्णमोहनठक्कुरः - चन्द्रकला, शेषराजशर्मा – चन्द्रकला। हर्षचरितम् टीके - रुय्यकः - हर्षचरितवर्तिका शङ्करकविः – सङ्केता। | कथाग्रन्थः। संस्कृतसाहित्ये नितरां प्रसिद्धः। कादम्बरीचन्द्रापीडयोः तथा महाश्वेतावैशम्पायनयोः च प्रेमकथा, जन्मान्तरे कथमासीत् इत्यादिकं वर्णयति। अपूर्णा कृतिः। पुनः बाणभट्टस्य पुत्रेण भूषणभट्टेन उत्तर भागः रचितः। प्रथमं चरित्रकाव्यम्। आख्यायिका। हर्षस्य जीवचरित्रम्। अष्ट उच्छ्वासः। हर्षस्य वंशवर्णना-पुष्यभूतेः वर्णना-प्रभाकरवर्धनस्य शौर्यवर्णना-हूणविजयार्थं राज्यवर्धनस्य गमनादिः। अपूर्णः ग्रन्थः। |

| | | |
|---|---|---|
| ४. दण्डी (7C AD) | १.दशकुमारचरितम् टीके पददीपिका(पूर्वपीठिकायाः) कवीन्द्राचार्यसरस्वतिना पदचन्द्रिका (दशकुमारचरितम्) | प्रथितं गद्यकाव्यम्।दशकुमारचरितस्य त्रयः भागाः। पूर्वपीठिका, दशकुमारचरितम्, उत्तरपीठिका च। दशानां कुमाराणां पौरुषपराक्रमवर्णना। मगधदेशराजपुत्रस्य राजवाहनस्य, तस्य मित्राणां नवानां सञ्चाराः देशाटनानुभवाः वर्णिताः। कल्पना उदात्त- प्रसादमधुराणि- अलङ्कारप्रयोगे - रसपोषणे च प्रवीणः। वीररसः। |
| | २. अवन्तिसुन्दरीकथा।<br><br>३. काव्यदर्शः। | ओजगुणयुक्ता भवति अवन्दीसून्दरकथा। अवन्दिदेशस्य राजकुमारीम् अवन्तिसुन्दरीं राजवाहनः पाणिग्रहणं करोति।<br><br>आलङ्कारिकः ग्रन्थः। त्रयः परिच्छेदः। |
| ५. धनपालः | तिलकमञ्जरी | धाराराजस्य मुञ्जस्य सभापण्डितः। राजकुमारस्य समरकेतोः प्रेमविवाहः वर्णितः। नायिका तिलका। बाणशैलीमनुकरोति। |
| ६.ओड्यदेवः (वादिभसिंहः) (13CAD) | गद्यचूडामणिः।<br>क्षेत्रचूडामणिः (काव्यम्) | राजपुत्रस्य जीवनधरस्य चरितम्। अध्यायस्य स्थाने लम्पपदम्। कविः जैनमार्गानुयायी। कादम्बर्याः शैल्यनुसारम्। |
| ७.विश्वेश्वरपाण्डेयः (18C AD) | मन्दारमञ्जरी<br>तस्य प्रसिद्धाः ग्रन्थाः<br>१. मन्दार मञ्जरी<br>२.वैयाकरणसिद्धान्तसुधानिधिः<br>३. अलङ्कारकौस्तुभः<br>४. रसचन्द्रिका<br>५. आर्यासप्तशती<br>६. अलङ्कारप्रदीपः<br>७. अलङ्कारमुक्तावली<br>८. कवीन्द्रकर्णाभरणम्<br>९. रोमावलीशतकम् | मन्दारमञ्जर्याः प्रेमकथा। कुसुमपुरवर्णनं, राजशेखरवर्णनं, प्रजापरिपालनरीतिं, कुमारोत्पत्तिं, शिक्षणपटुत्वं, मन्दारमञ्जरी-समागमं वर्णितमस्ति। अपूर्णः ग्रन्थः। स्वशिष्येण केनचित् उत्तर भागः पूरितः। प्रौढा भाषा अलङ्कारप्रयोगचातुर्यम् । |

| | | |
|---|---|---|
| ८. कृष्णपण्डितः (18C AD) | रत्नावली | धर्माधिकारिवंशे जातः भवति कविः। गन्धर्वराजकुमार्याः रत्नावल्यः नागराजकुमारस्य चन्द्राचूडस्य च विवाहः । |
| ९.अम्बिकादत्तव्यासः (19C AD) | शिवराजविजयः | आख्यायिका। शिवाजिं वर्णयति। वीररसप्रधानं गद्यकाव्यम्। प्रसादगुणबाहुल्यम्। |
| १०. रामशरणः (19 C AD) | कौमुदीकलाकल्लोलिनी | काश्मीरदेशस्थः कविः। भट्टिकाव्यम् इव कथामाध्यमेन व्याकरणप्रयोगान् विशदयति। उदयनपुत्रस्य नरवाहनदत्तस्य जन्मतः आरभ्य अभिषेकपर्यन्ता कथा। |

## पुनरावृत्तिः (Recap)

- गद्यकाव्यं प्रधानतया द्विविधं- कथा आख्यायिका।
- दण्डिनः मते कथाख्यायिका इत्येका एव जातिः। महाकाव्यं, खण्डकाव्यादिभेदात् पद्यकाव्यमनेकविधम्। मिश्रे चम्पूकाव्यमन्तर्भवति।
- आख्यायिकविभागे सुबन्धुप्रणीतं 'वासवदत्ता' संस्कृतसाहित्ये नितरां प्राधान्यमर्हति।
- उपलभ्यमानकथाग्रन्थेषु प्राचीनतमः ग्रन्थः भवति गुणाढ्यस्यमबृहत्कथा। सोऽयं षष्ठे शतके अजायत।
- बाणभट्टेन हर्षस्य जीवनचरितं आधृत्य रचितं ग्रन्थः हर्षचरितम् आख्यायिकाविभागे अन्तर्भवति, तस्मिन् अष्टौ उच्छवासाः सन्ति।
- बाणभट्टेन लिखितःकथामयः ग्रन्थः भवति कादम्बरी।
- दण्डीमहोदयेन विख्याताः त्रयः ग्रन्थाः रचिताः। शास्त्रमण्डले विश्रुतमेव काव्यादर्शः, गद्यग्रन्थः भवति दशकुमारचरितं, अपरः ग्रन्थतल्लजं भवति अवन्तिसुन्दरीकथा।
- संस्कृतकाव्यमण्डले धनपालस्य तिलकमञ्जरी प्रमुखं स्थानं वहति।
- ओड्यदेवस्य गद्यकाव्यं भवति गद्यचूडामणिः।
- विश्वेश्वरस्य मन्दारमञ्जरी, कादम्बर्याः शैल्या रचितः प्रशस्तः कथाग्रन्थः भवति।
- रत्नावलीनामके गद्यकाव्ये गन्धर्वराजकुमार्याः रत्नावल्याः नागराजकुमारेण रत्नचूडेन सह परिणयः कृष्णपण्डितेन रचितः।
- अम्बिकादत्तव्यासेन अनेके ग्रन्थाः रचिताः। तेषु शिवराजविजयं नाम गद्यकाव्यं नितरां प्रसिद्धम्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. भाषायाः प्राकृतिकं रूपं किम्?
2. दण्डिनः कृतिषु अन्यतमः भवति....... ।
3. वासवदत्तायाः कन्दर्पकेतोः च प्रेमकथा कस्मिन् वर्णयति?
4. बिन्दुसारेण राज्यात् निष्कासितः कविः कः आसित्?
5. अवन्तिसुन्दरीं कः पाणिग्रहणं कृतवान्?
6. पैशाच्यभाषायां रचितः कथाग्रन्थः कः?
7. कविरसौ क्षेत्रचूडामणिः इति काव्यमपि रचितवान्। कविः कः?
8. कादम्बर्याः विरहव्यथां श्रुत्वा कः तस्यामाकृष्टमनाः बभूव ?
9. 'रामशरणस्य गद्यकाव्यस्य नाम किम् ?
10. ओड्यदेवस्य अपरं नाम किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत

**(Answer the following questions in one or two sentences)**

1. बृहत्कथायाः त्रीणि संस्करणानि कानि ?
2. विश्वेश्वरपाण्डेयेन नवग्रन्थाः रचिताः। ते के?
3. दशकुमारचरितस्य टीकाः काः?
4. त्रयः दण्डिप्रबन्धाः के?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

1. तिलकमञ्जरी।
2. दशकुमारचरितम् ।
3. हर्षचरितम् ।

## निर्दिष्टाभ्यासः (Assignments)

1. संस्कृतसाहित्ये वासवदत्तायाः प्राधान्यम्।
2. संस्कृतसाहित्ये वर्तमानान् दश काव्यानि अधिकृत्य लिखत।

:

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. गद्यम्।
2. दशकुमारचरितम्।
3. वासवदत्ताग्रन्थे।
4. सुबन्धुः।
5. राजवाहनः।
6. बृहत्कथा।
7. ओड्यदेवः।
8. चन्द्रापीडः।
9. कौमुदीकलाकल्लोलिनी।
10. वादिभसिंहसूरिः।

## सूचनाग्रन्थौ (References)


1. आचार्यः लोकमणि दहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१६, पुटानि ३३६-३६०।
2. टि.के. रामचन्द्र अय्यर् (संक्षिप्तं संस्कृतसाहित्यचरित्रम्), आर्.एस्. वाध्यार् आन्ड् सण्स्, कल्पात्ति, पालक्काट्, २०१८, पुटानि १०८-११६।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. Glimpses of Sanskrit Literature, A.N.D Haskar, ICC Rand, New Age, International Limited Publishers.
2. कुञ्जुण्णिराजः, एं. एस्. मेनोन् च संस्कृतसाहित्यचरित्रम् (कैरली), केरलसाहित्य अक्कादमी, तृश्शूर्, १९९१।

# Unit - 2
# इतरसाहित्यरूपेषु इतिहासपुराणानां स्वाधीनम्

## उद्देश्यानि (Learning Outcomes)

- इतिहासपुराणानां विषये उद्बोधनम्।
- इतिहासपुराणानां महिमानमवगच्छति।
- इतरसाहित्यरूपेषु इतिहासपुराणानां स्वाधीनं अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

कवेः कर्म काव्यम्। काव्यं त्रिधा गद्यपद्यमिश्रभेदात्। अपादः पदसङ्घातो गद्यम्। पद्यं चतुष्पदी। रामायण- महाभारत- रघुवंशादीनि काव्यानि। इतिहासकाव्यं, महाकाव्यं, खण्डकाव्यम् इत्यादिभिः भेदैः काव्यानि अनेकविधानि। रामायणं महाभारतं च इतिहासकाव्यत्वेन अङ्गीक्रियन्ते बुधैः। तयोः रामायणं महर्षिणा वाल्मीकिना प्रणीतम्। अस्मिन्नेकके इतरसाहित्यरूपेषु इतिहासपुराणानां स्वाधीनम् अधिकृत्य पठामः। प्रथमम् इतिहासकाव्यमधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

आदिकविः - वाल्मीकिः – जयम् - करुणरसप्रधानम् - अनपत्यतया दूयमानः दशरथः - रामाभिषेकविघ्नः - रामस्य वनगमनम् - रावणेन सीतापहरणं- रामरावणयोर्युद्धं - रामायणस्यनेके टीकाः। पुराणानि - आधुनिकविषयाः - अष्टादश पुराणानि- सात्विकराजसतामसानि।

## Discussion

### 3.2.1 रामायणम्

लौकिकसंस्कृतसाहित्ये आदिकविः वाल्मीकिः आदिकाव्यं रामायणं च। अनेके कवयः वाल्मीकेः रामायणम् उपजीव्य काव्यरचनाम् अकुर्वन्। वाल्मीकेः स्थितिकालविषये इदानीमपि केचन संवादाः अवशिष्यन्ते। तथापि महर्षेः व्यासादपि पूर्वतनः आसीत् वाल्मीकिः। रामायणकथातः ज्ञातुं शक्यते यत् वाल्मीकिः रामकथां लवं कुशं च बोधयति। वाल्मीकिमधिकृत्य कतिपयाः श्लोकाः महाभारते दृश्यन्ते। अतः

महाभारतकालात् नूनाधिनूनं एकशतकात्पूर्वमेव रामायणस्य आविर्भावः। महाभारतरचनायां तिस्रः स्तराः सन्ति।

प्रथमस्तरे कुरुपाण्डवयुद्धकथा वर्णिता। 'जयम्' इति नाम्ना प्रख्यातमासीत् प्रथमः स्तरः। तस्याविर्भावः प्रायेण क्रिस्तोः पूर्वं पञ्चमं शतकमिति चरित्रकाराः। तस्मादपि पूर्वमासीत् रामायणकालमिति केचन पण्डिताः।

अधुना रामायणे चतुर्विंशतिसहस्रं श्लोकाः सन्ति। अस्मिन् सप्त काण्डानि। तानि बाल-अयोध्या-आरण्य - किष्किन्धा - सुन्दर - युद्ध-उत्तरकाण्डानि।

याकोबीप्रभृतीनां पाश्चात्यविचक्षणानां मते रामायणं मूलतो अयोध्याकाण्डतो युद्धकाण्डपर्यन्तमेव वाल्मीकिना विरचितमासीत्। केनापि बालोत्तरकाण्डे पश्चात् संयोजिते। रामम् आदर्शपुरुषत्वेन वाल्मीकिः गणयति। किन्तु बालकाण्डे उत्तररकाण्डे च वर्तमानः रामः भगवदवताररूपेण अङ्कितः दृश्यते। अपि च तत्रत्यानां विश्वामित्र-अहल्या-गङ्गावतरण-ऋष्यश्रृङ्गादिकथानां रामायणकथया साकं कश्चित् सम्बन्धः नास्ति। युद्धकाण्डसमाप्तौ ग्रन्थान्तसूचनापि प्रतीयते।

भारतीयसंस्कृतकवीन्द्राः भास-कालिदास-भवभूति-दिङ्नागाः तथा आनन्दवर्धनाचार्यः च सर्वाणि काण्डानि वाल्मीकिना एव रचिताः इति विचारयन्ति। रामायणं करुणरसप्रधानं काव्यं मन्यन्ते विद्वज्जनाः। यदि रामायणे युद्धकाण्डावसाने परिसमाप्तं मन्यते तदा तत्र शान्तो हि मुख्यः रसः भवेत्, वीरः अङ्गरसश्च। यदा उत्तरकाण्डे एव रामायणस्य परिसमाप्तिः मन्यते चेत् करुणो हि मुख्यो रसः, वीरः अङ्गरसश्च। आनन्दवर्धनः ध्वन्यालोके एवं सूचयति यत् रामायणे हि करुणो रसः, स्वयमादिकविना सूचितः 'शोकः श्लोकत्वमागतः' इति। अतः रामायणे केचन भागाः कालान्तरे संयोजिताः। प्रक्षिप्ताः सर्गाः च सन्ति। बालकाण्डस्याद्याः चत्वारो सर्गाश्च प्रक्षिप्ताः एव। तथैव पञ्चमसर्गस्य चत्वारः श्लोकाश्च।

रामायणे बालकाण्डे अनपत्यतया दुःखितस्य दशरथस्य अवस्थाः, पुत्रकामेष्टिं कर्तुं सन्नाहः, रामादिजन्म, सलक्ष्मणः रामः विश्वामित्रमुनिना सह गमनं, रामलक्ष्मणयोः बलातिबलमन्त्रस्य ग्रहणं, मिथिलायात्रा, भगीरथतपोवृत्तान्तग्रहणं, मिथिलाप्रवेशः, सीतापरिणयः, परशुरामगर्वभङ्गः, वधूवराणाम् अयोध्याप्रवेशनपर्यन्ताः कथाः वर्णिताः।

अयोध्याकाण्डे रामगुणकीर्तनं, रामाभिषेकसंरम्भः, रामाभिषेकविघ्नः, लक्ष्मणस्य कोपः, रामस्य लक्ष्मणसान्त्वनं, रामस्य वनाय दशरथस्योपदेशः, वनयात्रायै सन्नद्धस्य रामस्य दानकर्मादयः, ससीतस्य लक्ष्मणानुगस्य रामस्य वनगमनं, रामाभावे दशरथस्य अवस्था , रामादीनां गङ्गातरणं, कौसल्यदशरथयोः

परस्परसान्त्वनं, दशरथस्य मरणं, भरतकैकेयीसंवादः, श्रीराममानेतुं भरतस्य वनयात्रा, दशरथपुत्राणां सङ्गमः, रामं प्रति भरतस्याभ्यर्थना, अन्ते रामपादुकाभ्यां भरतस्य प्रत्यागमनं च वर्णयति ।

आरण्यकाण्डे दण्डकारण्ये विराधराक्षसवधं, रामस्य अगस्त्याश्रमप्राप्तिः, शूर्पणखादर्शनं, रावणसन्निधौ शूर्पणखायाः परिवेदनं, मारीचस्य मायामृगेण रामाश्रमप्रवेशः, सीतापहरणं, सीताविरहे रामस्य दुःखं, कबन्धदहनादिकं च वर्णयति।

किष्किन्धाकाण्डे सुग्रीवस्य भयाशङ्का, रामेण सप्तसालभेदनं, बालिनः वधं, हनूमतः सुग्रीवोपदेशः, सीतान्वेषणं, हनूमत्प्रशंसा इत्यादीन् वर्णयति ।

सुन्दरकाण्डे हनूमतः लङ्काप्राप्तिः, रावणदर्शनं, सीतादर्शनं, सीतारावणयोः संवादः, हनूमतः सीतारामवृत्तान्तश्रवणं, रावणपुत्रस्य अक्षकुमारस्य वधं, रावणविभीषणसंवादं, हनूमतः प्रत्यागमनं च वर्णयति।

युद्धकाण्डे दुःखितं रामं प्रति सुग्रीवोपदेशः, रावणकुम्भकर्णसंवादं, नलस्य सेतुनिर्माणं, वानरराक्षसयोः युद्धं, धूम्राक्षकुम्भकर्णादिवधं, रावणानुतापं, इन्द्रजितः वधं, रामरावणयोर्युद्धं, रावणवधं, लङ्कायां विभीषणाभिषेकं, रामस्य अयोध्याप्राप्तिं, रामाभिषेकं च वर्णयति।

उत्तरकाण्डे विश्रवसः जननं, इन्द्रजितः जननं, यमरावणयोर्युद्धं, कार्तवीर्येण रावणस्य बन्धनं, सीतापवादं, सीतापरित्यागं, शत्रुघ्नाभिषेकं, कुशलवयोः जननं इत्यादिकं वर्णयति।

भारतीयसाहित्यचरित्रे रामायणवत् श्रेष्ठा काचन कृतिः न दृश्यते। तादृशमेवास्य जनप्रीतिकरः व्यवहारः। भारतीयानां चिन्तायां जीवितरीतौ सामाजिके च महत्स्थानं रामायणं वहति। उक्तञ्च वाल्मीकिना

**'यावत्स्थास्यन्तिगिरयः सरितश्च महीतले ।**

**तावद्रामायणकथालोकेषु प्रचरिष्यति ।।' इति ।**

रामायणस्यानेके टीकाः सन्ति। तेषु प्रमुखाः भवन्ति रामवर्मणः तिलका, नागेशभट्टस्य रामीया, श्रीरामस्य अमृतकटका, गोविन्दराजस्य श्रृंगारभूषणा, अहोबलस्य वाल्मीकिहृदया, अप्पय्यदीक्षितस्य रामायणताल्पर्या, विश्वनाथस्य वाल्मीकिताल्पर्यसरणिः च।

अनेकासु विश्वभाषासु रामायणस्य भाषान्तरीकरणं सञ्जातम्। राल्फ् टि. एच्. ग्रिफित् महाशयेन (Ralph T.H. Griffix) सम्पूर्णं रामायणम् आङ्गलभाषायां विवर्तनं कृतम्। सर्वासु भारतीयभाषासु रामायणस्य भाषान्तरीकरणं सञ्जातम्। तुलसीदास् कम्पर्सदृशाः कवीन्द्राः रामायणस्य महत्वेनाकृष्टाः भूत्वा हिन्दीभाषायां तमिल्भाषायां च रामायणविवर्तनं कृतवन्तः आसन्। तेषां ग्रन्थानामपि प्रचुरप्रचारः सम्प्राप्तः।

### 3.2.2 पुराणानि (BC 200 - AD 500)

पुराणसाहित्यस्यापि वेदोपकारकत्वमस्ति। 'इतिहासपुराणाभ्यं वेदं समुपबृहयेत्' इति। इतिहासः पुरावृत्तमेव। पुराणं तु सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितादि लक्षणोपेतम् आख्यानमेव। पुरा भवं पुराणम्। इदानीं वर्तमानं पुराणसाहित्यं महाभारतकथया सहबद्धं भवति। महाभारतात् कथां स्वीकृत्य पोषिताः ग्रन्थाः च सन्ति।

वैदिकयुगे इतिहासपुराणे प्रायः पृथक् रूपेणैव गृहीते स्तः। ब्राह्मणादिग्रन्थेषु इतिहासपुराणे पृथक्त्वेन संयुक्तेन च गृहीते दृश्येते। प्रायेण सृष्टिप्रक्रियावर्णनं पुराणम्। काल्पनिककथानिमित्तकं पुराणम्। शतपथब्राह्मणे वेदानां सहैव पुराणानामभ्युत्पत्तिः वर्णिता।

प्रायः सर्वेषु पुराणेषु सूतः नैमिषारण्ये शौनकं महर्षीन् च प्रति उपदेशात्मकं कथनमेव वर्णयति। धार्मिकतत्वानां देवतास्तुतिरूपाः वर्णनाः च सन्ति। न केवलं पुरातनकथाकथनं किन्तु आधुनिकविषयाणां वर्णनाः सन्ति ।

पुराणानां कालः कः? यथार्थतः पुरातनविषयवत् आधुनिककार्यमपि पुराणेषु अन्तर्भूतानि इत्यतः कृत्यतया कालनिर्णयः असाध्यः। व्यासेन व्यासपरम्परावर्तमानैः व्यासपीठपदवीं प्राप्तैः व्यासैः वा पुराणरचनाः कृताः। पौराणिकपुराणेषु अन्तर्भूतस्य विष्णुपुराणस्य कालः क्रिस्तोः पूर्वं द्विशतकमेव। कुमारिलभट्टः तथा शङ्कराचार्यः च पुराणानि स्मृतिग्रन्थाः इति गणयतः। अर्थात् पुराणग्रन्थाः नियमग्रन्थाः। अतः पुराणानां कालः क्रिस्तोः पूर्वं द्विशतकादारभ्य क्रिस्त्वन्तरे पञ्चमे शतके यावत् इति निर्णेतुं शक्यते।

पुराणसंहिता एकैवासीत्। ताः व्यासः शिष्यं रोमहर्षणम् अध्यापयामास। सः स्वशिष्यान् चतुरः अध्यापयामास। एवं चतस्रः संहिताः संजाताः। तां शिष्यप्रशिष्यपरम्परया बह्वीषु संहितासु विभक्ताः। सम्प्रति पुराणानां संख्या अष्टादश। यथा-

**मद्वयं भद्वयञ्चैव बत्रयं यचतुष्टयम्।**
**अनापलिङ्गकूस्कानिपुराणानि प्रचक्षते ।। इति।**

मद्वयम् इत्यनेन मत्स्यपुराणं, मार्कण्डेयपुराणम्। भद्वयम् इत्यनेन भविष्यपुराणं, भागवतश्च (देवीभागवतः)। बत्रयमित्यनेन ब्रह्मवैवर्तपुराणं, ब्रह्मपुराणं, ब्रह्माण्डपुराणं च। वचतुष्टयमित्यनेन

वामनपुराणं, वराहपुराणं, विष्णुपुराणं, वायुपुराणं च। अनापलिङ्गकूस्कानि इत्यनेन अग्निपुराणं, नारदपुराणं, पद्मपुराणं, लिङ्गपुराणं, गरुडपुराणं, कूर्मपुराणं, स्कन्दपुराणं च गृह्यन्ते।

एतानि अष्टादशपुराणानि त्रिधा विभक्तुं शक्यन्ते। सात्विक राजस-तामसपुराणानि इति भेदात्।

| | | |
|---|---|---|
| सात्विकपुराणानि षट् | - | विष्णु-नारद-पद्म-गरुड-वराह-श्रीमद्भागवतपुराणानि। |
| राजसपुराणान्यपि षट् | - | ब्रह्म-ब्रह्मवैवर्त-ब्रह्माण्ड-मार्कण्डेय-भविष्य- वामनपुराणानि राजसानि । |
| तामसपुराणानि षट् | - | वायुपुराणं (शिवपुराणं), लिङ्गपुराणं, स्कन्दपुराणं, अग्निपुराणं, मत्स्यपुराणं, कूर्मपुराणं च तामसपुराणानि भवन्ति । |

### पुराणानां संक्षिप्तं विवरणम्।

**१. विष्णुपुराणम्** - विष्णुपुराणे पुराणलक्षणानुसारं सर्ग-प्रतिसर्गादयः घटन्ते। अतिपुरातनमिदं पुराणम्। न केवलं धर्मप्रतिपादकानि किन्तु साहित्यिकदार्शनिकैतिहासिकदृष्ट्यापि पुराणमिदं श्रेष्ठम्। पराशरः स्वशिष्यं मैत्रेयं प्रति उपदिशत्यस्मिन्। इदं हि वैष्णवानां प्रधानं शास्त्रम्। शङ्कराचार्यः अस्मात् पुराणात् अनेकानि वाक्यानि उद्धृतानि सन्ति।

**२. नारदपुराणम्** - अस्मिन् पुराणे सनत्कुमारादयः नारदं विष्णुभक्तिमधिकृत्य विशदीकुर्वन्ति। तत्वप्रधानाः अनेकाः कथाः अस्मिन् सन्ति। विष्णुभक्तैः क्रियामाणानि आचरणानि अस्मिन् प्रतिपादितानि ।

**३. पद्मपुराणम्** - पद्मपुराणे राधाकृष्णयोः विवाहादयः वर्णिताः सन्ति। राधां कृष्णस्य पत्नीत्वेनोपस्थापयति। अस्मिन् ५५००० श्लोकाः सन्ति। तान् श्लोकान् षट्भागत्वेन खण्डत्वेन विभक्तं च। कालिदासः अमुं पुराणमधिकृत्य शकुन्तलकथां रघुवंशकथां च स्वीकृतवान्। केचन चरित्रकाराः वदन्ति यत् शकुन्तलायाः रघोः च वृत्तान्तं कालिदासस्य काव्यसृष्ट्यनन्तरं विलिख्य पद्मपुराणे समायोजितमिति ।

**४. गरुडपुराणम्** - गरुडं प्रति विष्णोः उपदेशरूपेण वर्तमानेऽस्मिन् गरुडपुराणे आराधनाक्रियामधिकृत्य विशदीकरणमस्ति। अस्य पुराणस्य उत्तरभागे मरणानन्तरम् आत्मनः स्थितिः तथा अग्नियागादिकं च विवृणोति । भारतीयशास्त्रसंहतेः सङ्ग्रहग्रन्थः भवत्ययम्।

**५. वराहपुराणम्** - विष्णोः वराहावतारवर्णना अस्मिन् वर्तते। विष्णुभक्तानां दैनन्दिनजीवितरीतिरस्मिन् वर्णयति ।

**६. श्रीमद्भागवतपुराणम्** - भारते सर्वत्र प्रशस्तिं प्राप्तं पुराणं भवति श्रीमद्भागवतपुराणम्। भारतस्य प्रायः सर्वासु भाषासु अस्य पुराणस्य भाषान्तरीकरणं वर्तते। अस्मिन् १८००० श्लोकाः सन्ति, ते द्वादशस्कन्धत्वेन

विभक्तं च। दशमे स्कन्धे श्रीकृष्णस्य कथा विस्तरेण प्रतिपादयति। भगवतः विष्णोः चतुर्विंशतिः अवतारकथाः अस्मिन् वर्णयति। दार्शनिकानि अनेके स्तुतिश्लोकाः अस्मिन् सन्ति। भाषारीतिः शैली चातीव उन्नते च।

७. **ब्रह्मपुराणम्-** आदिपुराणमिति नाम्ना ख्यातेऽस्मिन् पुराणे बह्मा यक्षप्रजापतिमुपदिशति। तीर्थमाहात्म्यमधिकृत्य अस्मिन् वर्णनाः सन्ति।

८. **ब्रह्मवैवर्तपुराणम् -** परमात्मा मायारूपेण विवर्त्य प्रपञ्चे वर्तते। ब्रह्मणः सर्वव्यापित्वं सूचयति। अस्मिन् चत्वारि खण्डानि सन्ति। तानि ब्रह्म-प्रकृति-गणेश-कृष्णजन्मखण्डानि। चतुर्थे खण्डे राधाकृष्णसमागमः सविस्तरं वर्णयति। कृष्णः परमात्मरूपेण, राधा मायारूपेण च वर्तते। वैकुण्ठात् दूरे वर्तमाने गोलोके कृष्णेन सारूप्यं प्राप्तानां भक्तानां स्थितिः। स्थलमाहात्म्यं विशदीकुर्वतः अस्य पुराणस्य चतुर्थखण्डस्थं भागमुपजीव्य जयदेवः गीतगोविन्दं विरचितवान् ।

९. **ब्रह्माण्डपुराणम् -** विविधानां पुण्यदेवालयानां स्थलानां स्त्रोत्राणां च समाहारः भवति ब्रह्माण्डपुराणम्। प्रसिद्धम् अध्यात्मरामायणम् अस्मिन् अन्तर्भवति। शिवपार्वत्योः सम्भाषणरूपेणास्य रचना। सुवर्णाण्डादेव प्रपञ्चस्यास्य निष्पत्तिरिति, अत एव ब्रह्माण्डपुराणमिति नाम लब्धमिति विश्वासः वर्तते।

१०.**मार्कण्डेयपुराणम्-** पुरातनेऽस्मिन् पुराणे सृष्टिप्रलययोः वर्णना वर्तते। वैदिककालदेवताः, सूर्याग्निप्रभृतयः अत्र वर्ण्यन्ते। प्रसिद्धं देवीमाहात्म्यं (दुर्गासप्तशती) अस्मिन् पुराणे अन्तर्भवति। जैमिनिमहर्षिमधिकृत्य विवरणमस्मिन् अस्ति।

११. **भविष्यपुराणम् -** भाविकाले विशिष्य, कलियुगे सम्भविष्यमाणानां कार्याणां सूचनाः ददाति। अपि च अस्मिन् चातुर्वर्ण्यस्य धर्माः कर्तव्यानि च सूचितानि। सूर्यम्, अग्निं, नागान् च कथम् आराधनीयमित्यस्मिन् विशदयति ।

१२. **वामनपुराणम् -** अस्मिन् विष्णोः वामनावतारं वर्णयति। पुनः लिङ्गराधनां देवालयेषु तीर्थाटनं च विशदयति ।

१३. **वायुपुराणम् (शिवपुराणम्) -** शिवमाहात्म्यप्रतिपादकमिदं पुराणम्। वायुदेवेन शिवमाहात्म्यं वर्णितम्। गुप्तवंशराजानां प्रतिपादनम् अस्मिन् वर्तते इत्यतः क्रिस्तोः पञ्चमे षष्ठे वा शतकेऽस्योत्पत्तिरिति गणयन्ति चरित्रकाराः।

१४. **लिङ्गपुराणम् -** अस्मिन् पुराणे शिवस्य अष्टाविंशतिः अवतारवर्णना दृश्यते। शिवलिङ्गार्चनं विशेषेण प्रतिपादितमस्ति ।

**१५. स्कन्दपुराणम् -** अस्मिन् पुराणे ८१००० श्लोकाः, मुख्यतः सप्तसु खण्डेषु विभक्तमस्ति। अस्मिन् सूतसंहिता तथा काशीदेशस्य पवित्रतां च सुष्ठु विशदीकृतम्। भारतवर्षस्थितानां सर्वेषामेव तीर्थानां वर्णना वर्तते ।

**१६. अग्निपुराणम् -** अग्निदेवः वसिष्ठमहर्षिम् उपदिशति। अस्मिन् प्रायेण सर्वाण्यपि शास्त्राणि संक्षिप्य चर्चितानि वर्तन्ते। विश्वविज्ञानकोशात्मके अस्मिन् पुराणे आयुर्वेद-शिल्पशास्त्र-ज्योतिष-अलङ्कारादीनि वर्णितानि ।

**१७. मत्स्यपुराणम् -** अस्मिन् पुराणे विष्णुः मत्स्यरूपेण राजानं मनुम् उपदिशति। अस्मिन् स्थलमाहात्म्यं उत्सवादीन् शैववैष्णवादीनामाराधनारीतिं च वर्णिताः सन्ति ।

**१८. कूर्मपुराणम् -** विष्णोः कूर्मरूपेण अवतारवर्णनं मुख्यः प्रतिपाद्यविषयः भवति। शिवार्चनं शिवस्य विविधाः अवतारकथाः चास्मिन् सन्ति।

अष्टादश पुराणानि, अष्टादश उपपुराणानि च सन्ति। केचन अनुपुराणानि च सन्ति इति वदन्ति। ब्रह्मवैवर्तपुराणानुसारेण सनत्कुमार-नारदीय-नारसिंह-शैवधर्मादि उपपुराणानि। एवं सुसमृद्धं पुराणसाहित्यं भारतीयजीवनदर्शनस्य दर्पणः विश्वविज्ञानकोशश्च। भारतीयसाहित्यमण्डले पुराणानां योगदानमत्यधिकमेव।

### साहित्यादिमण्डलेषुइतिहासग्रन्थयोःपुराणादीनां च स्वाधीनम्।

भारतस्य साहित्ये सर्वेषु विभागेषु रामायणस्य महाभारतस्य पुराणानां च योगदानमधिकमेव। प्रायेण सप्ततिशतमानं ग्रन्थाः एतेषां साहाय्येन सञ्जाताः भवन्ति। एतेभ्यः ऊर्जमवलम्ब्य भारतस्य सामूहिक-सामाजिक-साहित्यिक-नैतिक-धार्मिकमण्डलेषु महत् योगदानमवर्तत। कतिपयानि उदाहरणानि सूचयामः। रामायणमवलम्ब्य अधो निर्दिष्टानि काव्यानि सञ्जातानि।

| **कविः** | **ग्रन्थस्य नाम** | **विभागः** |
|---|---|---|
| कालिदासः | मेघसन्देशः | खण्डकाव्यम्। |
| भट्टिः | रावणवधः | महाकाव्यम्। |
| भोजदेवः | चम्पूरामायणम् | चम्पूकाव्यम्। |
| कुमारदासः | जानकीहरणम् | महाकाव्यम्। |
| भासः | प्रतिमानाटकम् | नाटकम् । |
| अभिनन्दः | रामचरितम् | महाकाव्यम् । |
| शक्तिभद्रः | आश्चर्यचूडामणिः | नाटकम् । |
| धनञ्जयः | राघवपाण्डवीयम् | महाकाव्यम् । |

| | | |
|---|---|---|
| भवभूतिः | उत्तररामचरितम् | नाटकम्। |
| कविराजः | राघवपाण्डवीयम् | महाकाव्यम् । |
| क्षेमेद्रः | रामायणमञ्जरी | कथा। |
| चिदम्बरः | राघवपाण्डवयादवीयम् | महाकाव्यम् । |
| मुरारि | अनर्घराघवम् | नाटकम् । |
| हरदत्तसूरिः | राघवनैषधीयम् | महाकाव्यम् । |
| राजशेखरः | बालरामायणम् | नाटकम् । |
| सन्ध्याकरनन्द | रामपालचरितम् | खण्डकाव्यम्। |
| जयदेवः | प्रसन्नराघवम् | नाटकम् । |
| मल्लाचार्यः | उदारराघवम् | महाकाव्यम् । |
| हरिकृष्णभट्टः | सीतास्वयंवरकाव्यम् | कथा। |
| मल्लिनाथः | रघुवीरचरितम् | महाकाव्यम् । |
| श्रीनिवासाचार्यः | जानकीचरणचामरम् | स्तोत्रकाव्यम् । |
| मधुरवाणी | रामायणम् | महाकाव्यम् । |
| रामभद्रः | रामचापस्तवः | स्तोत्रकाव्यम् । |
| चक्रकविः | जानकीपरिणयम् | महाकाव्यम् । |
| मधुसूदनमिश्रः | हनुमन्नाटकम् | नाटकम् । |

पुराणानि यथार्थतः विश्वविज्ञानकोशाः एव। तेषु शास्त्र-साङ्केतिकविद्या-भूगोलिकादिकार्याणि सुष्ठु वर्णयन्ति। पुराणेभ्यः उपलब्धाः आशयाः कालान्तरे भारतीयसाहित्यमण्डले बहुधा दृश्यन्ते। कतिपयानि सूचयामः।

| **पुराणस्य नाम** | **ग्रन्थकर्तुः नाम** | **ग्रन्थस्य नाम** |
|---|---|---|
| पद्मपुराणम् | कालिदासः | अभिज्ञानशाकुन्तलम्, रघुवंशः |
| विष्णुपुराणम् | भासः<br>विद्यानाथः<br>अभिनवकालिदासः | बालचरितम्<br>कृष्णचरितम्<br>भागवतचम्पूः |
| मार्कण्डेयपुराणम् | व्यासः | दुर्गासप्तशती, देवीमाहात्म्यम् |
| अग्निपुराणम् | व्यासः | आयुर्वेद-शिल्पशास्त्र-ज्योतिष-अलङ्काराः प्रतिपाद्यविषयाः |
| भगवतपुराणम् | चिदम्बरकविः<br>सुकुमारकविः | राघवमाधवपाण्डवीयम्<br>श्रीकृष्णविलासः |

| | | |
|---|---|---|
| | नारायणभट्टपादः | नारायणीयम् |
| ब्रह्मवैवर्तपुराणम् | जयदेवः | गीतगोविन्दम् |

भारतस्य प्रायेण सर्वासु भाषासु रामायणस्य, महाभारतस्य, पुराणानां च योगदानं वर्तते।

## पुनरावृत्तिः (Recap)

- रामायणं इतिहासग्रन्थः भवति।
- लौकिकसाहित्ये आदिकविः वाल्मीकिः, आदिकाव्यं रामायणं च।
- अधुना रामायणे चतुर्विंशतिसहस्रं श्लोकाः सन्ति। सप्त काण्डानि च।
- याकोबीप्रभृतयः चरित्रकाराः अयोध्याकाण्डतः आरभ्य युद्धकाण्डपर्यन्तमेव वाल्मीकिना रचितमिति, बालोत्तरकाण्डे पश्चात् समायोजिते इत्यभिप्रयन्ति।
- मारतीयचरित्रकाराः सर्वाणि काण्डानि वाल्मीकिना एव रचितानि इति अभिप्रयन्ति।
- बालकाण्डे अनपत्यतया दूयमानस्य दशरथवस्थां वर्णयति।
- अयोध्याकाण्डे रामगुणकीर्तनं रामाभिषेक समारम्भादयः वर्णयति।
- आरण्यकाण्डे दण्डकारण्ये विराधराक्षसवधं, सीतापहरणादिकं च वर्णयति।
- किष्किन्धाकाण्डे बालिसुग्रीवयुद्धं, सीतान्वेषणसमारम्भाः च वर्णयति ।
- सुन्दरकाण्डे हनूमतः लङ्काप्राप्तिः, लङ्कादहनं, हनुमतः प्रत्यागमनं च वर्णयति।
- युद्धकाण्डे दुःखितं रामं प्रति सुग्रीवोपदेशः रावणवधं च वर्णयति।
- उत्तरकाण्डे विश्रवसः जननं, सीतायाः परित्यागः, पुनः सीतायाः विशुद्धिनिर्णयः, रामस्य स्वर्गारोहणादयः वर्णयति।
- पुराणानां वेदोपकारकत्वमस्ति ।
- सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितादि लक्षणोपेतं पुराणम् ।
- सृष्टिक्रियावर्णनं, काल्पनिककथानिमित्तकं, धार्मिकतत्वानां बोधकं, देवतास्तुतिरूपकं वा भवेत् पुराणम् ।
- पुराणानां कालः क्रिस्तोः पूर्व द्विशतकात् क्रिस्तोः पञ्चशतकस्य मध्ये च आसीत्।
- अष्टादश पुराणानि। मद्वयं भद्वयं बत्रयं वचतुष्टयं अनापलिङ्गकूस्कानि ।
- विष्णु-नारद-पद्म-गरुड-वराह-श्रीमद्भागवतपुराणानि सात्विकानि ।
- ब्रह्म-ब्रह्मवैवर्त-ब्रह्माण्ड-मार्कण्डेय-भविष्य-वमनपुराणानि राजसानि ।
- वायु (शिव)-लिङ्ग-स्कन्द-अग्नि-मत्स्य-कूर्मपुराणानि तामसानि ।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. गरुडं प्रति विष्णोः आराधनाक्रममधिकृत्य वर्णना वर्तते - कस्मिन् ?
2. लौकिकसंस्कृतसाहित्ये आदिकविः कः?
3. अनपत्यतया दूयमानस्य दशरथस्य कथा कुत्र वर्णयति?
4. पुराणानां कालः कः?
5. रामायणे वर्णितः मुख्यः रसः कः?
6. कः रामकथां लवं कुशं च बोधयति ?
7. रामायणे कति काण्डानि सन्ति?
8. बालिनः वधं कस्मिन् काण्डे वर्णयति?
9. केन सम्पूर्णं रामायणम् आङ्गलभाषायां विवर्तनं कृतम्?
10. कस्मिन् ब्राह्मणे पुरणानामभ्युत्पत्तिं वर्णिता ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. दुर्गासप्तशती कस्मिन् पुराणे अन्तर्भवति ?
2. रामायणे काण्डानि कानि?
3. रामायणमवलम्ब्य भासेन रचितं नाटकं किम्
4. पुराणेषु मद्वयम् इत्यनेन विवक्षितः आशयः कः ?
5. आदिपुराणमिति प्रख्यातं पुराणं किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. वायुपुराणम्।
2. रामायणस्य काण्डविषये याकोबी प्रभृतीनां मतम्।

## निर्दिष्टाभ्यासः (Assignments)

1. रामायणस्य प्राधान्यं विशदयत।
2. भारतीयसाहित्ये रामायणस्य योगदानम्।
3. पुराणानां प्रतिपाद्यविषयाः के ?

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. गरुडपुराणे।
2. वाल्मीकिः।
3. रामायणस्य बालकाण्डे।
4. क्रिस्तोः पूर्वं द्विशतकस्य क्रिस्त्वनन्तरं पञ्चशतकस्य च मध्ये।
5. करुणः।
6. वाल्मीकिः।
7. सप्त।
8. किष्किन्धाकाण्डे।
9. राल्फ् टि. एच्. ग्रिफित्।
10. शतपथब्राह्मणे।

## सूचनाग्रन्थौ (References)


1. आचार्यः लोकमणिदाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६,
2. टि.के. रामचन्द्र अय्यर्, संक्षिप्तं संस्कृतसाहित्यचरित्रम्, आर्.एस्. वाध्यार् आन्ड् सन्स्, कल्पात्ति पालक्काट्, २०१८


## अधिकवाचनाग्रन्थः (Suggested readings)


1. ए.बी. कीत्, संस्कृतसाहित्यचरित्रम्, मोत्तिलालू बनारसीदास् पब्लिषेर्स, दिल्ली, १९९०

# Unit - 3
# महाभारतं, महाभारतस्य रचनाकालः, सामान्यपरिचयश्च

## उद्देश्यानि (Learning Outcomes)

- महाभारतस्य सामान्यपरिचयः।
- इतरभाषासाहित्ये महाभारतस्य योगदानावगमनम्।
- व्यासस्य रचनापाटवं जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

पूर्वस्मिन् एकके इतरसाहित्यरूपेषु इतिहासपुराणानां स्वधीनतां अधिकृत्य चर्चां अकरोत्। इदानीं महाभारतं, महाभारतस्य रचनाकालः इत्यादिविषयानधिकृत्य पठामः। महाभारतं तु व्यासेन रचितमेव। प्रथमं तमधिकृत्य चर्चां कुर्मः।

## मुख्यपदानि (Keywords)

महाभारतम् - वेदव्यासः - द्वितीयः क्रमः भारतम् - अष्टादश पर्वाणि - कालविषये विसंवादाः - पञ्चरत्नत्वेन - यदिहास्ति तदन्यत्र - सर्वासु भारतीयभाषासु स्वाधीनम्।

## Discussion

### महाभारतम् - वेदव्यासः।

इतिहासकाव्ययोरन्यतरः भवति महाभारतम् इति ग्रन्थः। भारतस्य द्वितीयं राष्ट्रियमहाकाव्यमेव तत्। अस्य कर्ता भगवान् वेदव्यासः। अस्य ग्रन्थस्य रचनायां तिस्रः अवस्थाः आसन्। प्रथमं स्तरं 'जयम्' इति नाम्ना प्रसिद्धम्। पाण्डवानां विजयवर्णनमेव तत्र विषयः। जयग्रन्थे ८८०० श्लोकाः आसन्। द्वितीयः क्रमः भारतम् इति नाम। तस्मिन् भारतवंशसम्बन्धाः २८००० श्लोकाः। उक्तञ्च-

**चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम्।**
**उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः ।। इति।**

उपाख्यानसंयुक्तमिदं महाभारतम् अष्टादशपर्वात्मकम्। प्रथमे जयसंज्ञके व्यासः शुकवैशम्पायनादिभ्यः जयसंज्ञकं श्रावयति च। पुनः वैशम्पायनेन जनमेजाय कथितं भारतसंज्ञकम्। पुनः इदं सौना शौनकादयः श्राविताः। तदेव महाभारतसंज्ञकम्। इदानीन्दने महाभारते लक्षाधिकाः श्लोकाः सन्ति। लोकसाहित्यचरित्रे एतादृशः बृहत्तमः ग्रन्थः इतः पर्यन्तं न सञ्जातः। महत्वात् भारवत्वाच्च महाभारतमुच्यते। हरिवंशः हि महाभारतस्य खिलांशः। तस्मिन् श्रीकृष्णस्य वंशचरितं विशदयति। हरिवंशे १२००० (द्वादशसहस्रं) श्लोकाः सन्ति।

महाभारते अष्टादश पर्वाणि सन्ति। तानि आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक- स्त्री-शान्ति-अनुशासन-आश्वमेधिक-आश्रमवासिक-मौसल-महाप्रस्थानिक स्वर्गारोहण इति। मूलतः पाण्डवानां जन्मतः आरभ्य मोक्षपर्यन्ता कथा वर्णितास्ति। तत्र तत्र प्रसङ्गवशादाख्यानानि च संयोजितानि ।

महाभारतस्य निर्मितकालविषये अनेके विसंवादाः सन्ति। पराशरपुत्रेण व्यासेन रचितमेव महाभारतम् इत्यस्मिन् कार्ये एककर्तुः रचना इति वक्तुं प्रयासः वर्तते इति चरित्रकाराः। हि विविधकाले सञ्जाताः कथाः उपाख्यानानि च अस्मिन् सन्ति। अतः व्यासः इति नाम धार्मिकपरः नाम भवेत्। विव्यास वेदान् यस्मात् सः तस्मात् व्यास इति। अनन्तरगामिनः कवयः (व्यासपीठे वर्तमानाः कवयः) व्यासनाम्ना प्रख्याताः आसन्। क्रिस्तोः पूर्वं पञ्चमशतके जयरूपस्योत्पत्तिः इति, क्रिस्तोः पूर्वं चतुर्थे शतके भारतस्योत्पत्तिरिति वदन्ति। तृतीयः स्तरः, महाभारतम् इति स्तरः, क्रिस्तोः पञ्चमशतकात् पूर्वमेव संजातमिति चरित्रकाराः सूचयन्ति।

धर्मप्रतिपादकं शास्त्रमेव महाभारतम्। महाभारतं पञ्चमो वेदः इति प्रख्यातिं प्राप। ग्रन्थोऽयं बहुभिः बहुधा व्याख्यातम्। नारायणस्य भारतार्थप्रकाशः, अर्जुनमिश्रस्य भारतार्थदीपिका, नीलकण्ठस्य भारतभावदीपिका च प्रसिद्धासु टीकासु काश्चन। श्रीमद्भगवद्गीता, अनुस्मृतिः, गजेन्द्रमोक्षः, भीष्मस्तवराजः, विष्णुसहस्रनाम चेति पञ्च सन्दर्भाः पञ्चरत्नत्वेन गणयन्ति।

अस्य ग्रन्थस्य प्रधानो रसः शान्तः, वीरः चाङ्गम्। भौतिकजीवनस्य निस्सरताम् उदाहरणत्वेन संसूच्य मोक्षस्य सिद्ध्यर्थं प्रेरणां ददाति। भारतीयसंस्कृतेः विश्वकोशोऽयं ग्रन्थः। उक्तञ्च -

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।। इति।**

धर्मार्थकाममोक्षान् विशदयन् व्यासः सर्वेषां वर्णानां आश्रमाणां च प्राधान्यं पावनत्वं च सूचयन् धर्मस्य नित्यत्वं कामार्थयोरनित्यत्वं मोक्षस्य साध्यत्वं च विशदयति। रामायणमिव महाभारतमुपजीव्य सर्वासु भारतीयभाषासु अनेके ग्रन्थाः प्रादुर्भूताः। शकुन्तलोपाख्यानमाधृत्य कालिदासेन अभिज्ञानशाकुन्तलं,

नलोपाख्यानम् आधारीकृत्य श्रीहर्षेण नैषधीयमहाकाव्यं च विरचितम्। मत्स्योपाख्यानं, सावित्र्युपाख्यानमित्यनेकानि उपाख्यानानि सन्ति। कविना भासेन महाभारतकथाम् आलम्ब्य मध्यमव्यायोगः, दूतवाक्यं, कर्णभारः, ऊरुभङ्गं, पञ्चरात्रं, दूतघटोत्कचम् इत्येतानि नाटकानि रचितवान्। कैरल्यामपि अनेके ग्रन्थाः महाभारतम् उपजीव्य रचिताः सन्ति। महाभारतं उपजीव्य रचितः ग्रन्थः भवति लक्ष्मणसूरिणः भारतसंग्रहः।

**महाभारतमवलम्ब्यबहवः ग्रन्थाः प्रादुरभूवन्। कतिपयान् ग्रन्थान् सूचयामः।**

| **कविः** | **ग्रन्थस्य नाम** | **विभागः** |
|---|---|---|
| कालिदासः | अभिज्ञानशाकुन्तलम् | नाटकम्। |
| कालिदासः | रघुवंशः | महाकाव्यम्। |
| वत्सराजः | रुग्मिणीहरणम् | नाटकम्। |
| भारविः | किरातार्जुनीयम् | महाकाव्यम्। |
| वत्सराजः | त्रिपुरदाहः | नाटकम्। |
| माघः | शिशुपालवधम् | महाकाव्यम्। |
| रविवर्मदेवः | प्रद्युम्नाभ्युदयम् | नाटकम्। |
| लक्ष्मणसूरिः | भारतसंग्रहः | गद्यकाव्यम्। |
| क्षेमेन्द्रः | भारतमञ्जरी | कथा। |
| वासुदेवः | नलोदयः | महाकाव्यम्। |
| चिदम्बरः | राघवपाण्डवयादवीयम् | महाकाव्यम्। |
| शेषकृष्णः | कंसवधम् | नाटकम्। |
| हरदत्तसूरिः | राघवनैषधीयम् | महाकाव्यम्। |
| काञ्चनाचार्यः | धनञ्जयविजयम् | नाटकम्। |
| त्रिविक्रमभट्टः | नलचम्पू | चम्पू। |
| श्रीहर्षः | नैषधीयम् | महाकाव्यम्। |
| नीलकण्ठदीक्षितः | नलचरितनाटकम् | नाटकम्। |
| कृष्णानन्दः | सहृदयानन्दम् | महाकाव्यम्। |
| भट्टनारायणः | वेणीसंहारः | नाटकम्। |
| अमरचन्द्रः | बालभारतम् | महाकाव्यम्। |
| भासः | कर्णभारः | नाटकम्। |
| भासः | दूतवाक्यम् | नाटकम्। |
| देवप्रभसूरिः | पाण्डवचरितम् | महाकाव्यम्। |
| वेदान्तदेशिकः | हंससन्देशः | सन्देशकाव्यम्। |

| | | |
|---|---|---|
| अगस्त्यः | बालभारतम् | गद्यकाव्यम्। |
| लीलांशुकः | श्रीकृष्णकर्णामृतम् | महाकाव्यम्। |
| राजचूडामणिदीक्षितः | रुग्मिणीकल्याणम् | महाकाव्यम्। |
| अनन्तभट्टः | भारतचम्पूः | चम्पूः। |
| वेङ्कटाध्वरी | यादवराघवीयम् | महाकाव्यम्। |
| वेङ्कटाध्वरी | उत्तरचम्पूः | चम्पूः। |
| गोविन्दमखी | हरिवंशसारचरितम् | महाकाव्यम्। |
| भासः | अभिषेकनाटकम् | नाटकम्। |
| भासः | मध्यमव्यायोगः | नाटकम्। |

## पुनरावृत्तिः (Recap)

- महाभारतं भारतस्य द्वितीयं राष्ट्रियमहाकाव्यं भवति ।
- ग्रन्थस्यास्य रचनायां तिस्रः अवस्थाः आसन्।
- प्रथमे स्तरे जये ८८०० श्लोकाः, पाण्डवानां विजयवर्णना।
- द्वितीये स्तरे भारते भारतवंशसम्बन्धाः २४००० श्लोकाः।
- तृतीये स्तरे महाभारते उपाख्यानैः संयुक्तम्। लक्षाधिकैः श्लोकैः युक्तम्।
- आदि-सभा-वन-विराटादि अष्टादश पर्वाणि सन्ति।
- क्रिस्तोः पूर्वं पञ्चमशतकात् क्रिस्तोः परं पञ्चमशतकात् मध्ये वा रचितमिति चरित्रकाराः ।
- धर्मार्थप्रतिपादकं शास्त्रम्, महाभारतं पञ्चमो वेदः।
- प्रधानरसः शान्तः, वीररसः च।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. महाभारतस्य द्वितीये विभागे कति श्लोकाः सन्ति?
2. भारते कः कम् उपदिशति?
3. महाभारतस्य रचनास्तरे प्रथमभागस्य नाम किम्?
4. वेदव्यासः इति पदस्य कोऽर्थः?
5. पञ्चमो वेदः कः?
6. महाभारतमवलम्ब्य कालिदासेन रचितः ग्रन्थः कः?

7. इदानिन्तने महाभारते कति श्लोकाः सन्ति ?
8. महाभारतस्य अङ्गीरसः कः?
9. महाभारतं पञ्चमो वेदः कुतः ?
10. महाभारतं उपजीव्य लक्ष्मणसूरिणा रचितः ग्रन्थः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. महाभारतस्य द्वितीयं राष्ट्रियमहाकाव्यं किम्?
2. महाभारते कति पर्वाणि सन्ति? तानि कानि?
3. महाभारतमवलम्ब्य भासेन रचित: नाटकानि कानि?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।
2. जयं भारतं च।

## निर्दिष्टाभ्यासः (Assignments)

1. महाभारतस्य प्राधान्यं वर्णयत।
2. भारतीयसाहित्ये महाभारतस्य योगदानम्

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. अष्टौविंशतिसहस्रम्।
2. वैशम्पायनः जनमेजयमुपदिशति।
3. जयम्।
4. यः वेदान् विव्यास सः वेदव्यासः।
5. महाभारतम्।
6. अभिज्ञानशाकुन्तलम्।
7. लक्षाधिकाः।

8. शान्तः।
9. धर्मार्थप्रतिपादकं शास्त्रम् भवति महाभारतम्।
10. भारतसंग्रहः।

## सूचनाग्रन्थौ (References)


1. टि.के. रामचन्द्र अय्यर्, संक्षिप्तं संस्कृतसाहित्यचरित्रम्, आर्.एस्. वाध्यार् आन्ड् सन्स्, कल्पात्ति पालक्काट्, २०१८
2. आचार्यः लोकमणि दहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१६


## अधिकवाचनाग्रन्थः (Suggested readings)


1. ए.बी. कीत्त्, संस्कृतसाहित्यचरित्रम्, मोत्तिलाल् बनारसीदास् पब्लिषेर्स, दिल्ली, १९९०


SGOU

# Unit - 4
# संस्कृतसाहित्ये लक्ष्मणसूरेः योगदानम्

## उद्देश्यानि (Learning Outcomes)

- संस्कृतसाहित्ये लक्ष्मणसूरेः योगदानावगमनम्।
- लक्ष्मणसूरेः रचनाशैली अवगच्छति।
- संस्कृतसाहित्ये लक्ष्मणसूरेः प्राधान्यं जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

न केवलं भारतीयभाषासु किन्तु विश्वभाषासु अपि रामायण-महाभारत-पुराणादीनां स्वाधीनतां द्रष्टुं शक्यते। महाभारतस्य प्रसक्तिः लोकावसानपर्यन्तं संस्कृतसाहित्यमण्डले वर्तिष्यते। कालिदास-भास-भवभूतिप्रभृतयः कविश्रेष्ठाः पूर्वसूरिणां पथा सञ्चार्य साहित्यमण्डलं विज्ञानमण्डलं च प्राकाशयन्। तेषां कवीन्द्राणां मार्गे वर्तमानः कश्चन पण्डिताग्रेसरः आसीत् लक्ष्मणसूरिमहाभागः। सः कविः कलाकारः काव्यमर्मज्ञः सहृदयः प्रगल्भः अध्यापकः चासीत्।

## मुख्यपदानि (Keywords)

१८५९ वर्षे - महाभारतकथां लघ्वीचकार - अल्पसमासः स्वभावसरला च - कमनीयपदा – रचनावैदग्ध्यं - पण्डित्यप्रकर्षम्

## Discussion

लक्ष्मणसूरिमहाभागः १८५९ (ऊनषष्ठ्यधिकाष्टाशतसहस्रतमे) वर्षे आन्ध्राप्रदेशे कृष्णप्रविश्यायाम् अजायत। संस्कृतपण्डितः सः श्रीचैतन्या अक्कादम्यां वरिष्ठेन अध्यापकत्वेन कालवृत्तिं कवित्ववृत्तिं चाकरोत्। तेन महात्मना अनेके प्रबन्धाः रचिताः। सः महामहोपाध्यायबिरुदं सम्पादितवान्। तेन रचितेषु ग्रन्थेषु प्रधानाः भवन्ति नलोपाख्यानसंग्रहः, श्रीभीष्मविजयं, भारतसंग्रहः च। एभ्यः त्रयेभ्यः ग्रन्थेभ्यः महाभारतमेव मूलग्रन्थः। महाभारते अष्टादश पर्वाणि सन्ति। पूर्णतः महाभारतं छात्रेभ्यः समान्यजनेभ्यः च ज्ञातुं प्रयासः वर्तते इति ज्ञात्वा महाभारतस्य संग्रहः कविना कृतः। अपि च नलोपाख्यानसंग्रहे श्रीभीष्मविजये च कविभावनया समुल्लसिताः केचन भागाः समायोजिताः सन्ति।

लक्षश्लोकात्मिकं महाभारतं करतलामलकमिव लघ्वीचकार लक्ष्मणसूरिः अस्मिन् गद्यकाव्ये भारतसंग्रहे। कमनीयैः शब्दप्रयोगैः अर्थगम्भीरैः वाग्भिः महाभारतकथायाम् ईषदपि न्यूनतां विना गद्यकाव्यमिदं रचितवान्। कविरसौ उपमाद्यलङ्कारप्रयोगे इव शब्दालङ्कारेऽपि नितरां तत्परः। भारतसंग्रहस्य आदिपर्वणि तदर्थं बहुविधाः सूचनाः सन्ति। यथा चन्द्रवंशप्रदीपस्य प्रदीपस्य तनुजः शन्तनुः नाम राजासीत् इति। अपि च "अन्यदाचरतो मेऽन्यदाचरितम्" इति। यमकानुप्रासादीनां प्रयोगे कविः निष्णातः आसीत्। यथा "भीमस्तु देहस्य गौरवेण स्रोतः पथेन रसातलं प्रापितस्तत्र दंशद्भिर्नागैः निवर्तितविषमूर्च्छः सपदि सुप्तोत्थितः इवोत्तिष्ठन् स्वमातामहस्य मातामहेन वासुकिनानुमतः कुण्डाष्टकगतान् दिव्यान् रसान् पीत्वा तत्रैव सुखं सुष्वाप"।

कवेः लक्ष्मणसूरेः काव्यशैली तु अल्पसमासः स्वभावसरला च भवति। सर्वान् हठादाकर्षयति सा शैली। अर्थगम्भीरा भाषारीतिमुपयुक्तवान्। अलङ्कारप्रयोगे कविः समर्थः आसीत्। यथा 'भीमसेनः कौरवाणां मनसि निखातः शङ्कुरिव, धर्मपुत्रः शारदे राकाचन्द्र इव सर्वेऽपि धार्तराष्ट्राः भीमदर्शने महोरगाक्रान्ताः इव अवर्तन्त'। एवमनेकानि उदाहरणानि सन्ति।

लक्ष्मणसूरेः गद्यकाव्ये दृश्यमाना कल्पना कमनीयपदा प्रसादगुणगुम्भिता मधुरमधुरा च भवति। यथा द्रौपदीवर्णनावसरे 'अथ या कन्या, सा कृष्णा नाम वरवर्णिनी। तस्याः शरीरम् इन्दीवरसवर्णवर्णमुत्पलसगन्धमाहार्यशोभानपेक्षिलावण्यमनभ्यन्तरं च यौवनप्रतियोगिनोऽवस्थान्तरस्य। किं बहुना? यस्य सा गृहिणी स उर्वशीमपि तृणाय मन्येत। सम्प्रति तस्याः स्वयंवर इति द्रुपदेनाहूताः सर्वेऽपि क्षत्रियाः अहंपूर्विकया तत्पुरीमावृण्वन्ति विवृण्वन्ति चाशयं तां स्वहस्तगतामिव' इति ।

संक्षिप्तीकरणे लक्ष्मणसूरेः वैदग्ध्यं सीमातीतमेव। विस्तृतं कार्यं साहित्यनिर्भरया भाषया संक्षिप्य अवतर्तुं अस्मिन् पाटवं वर्तते। कर्णोत्पत्तिः, मात्रा तस्य परित्यागः, सूतस्य हस्ते मञ्जुषायां प्राप्तिः, सूतपुत्रेण पोषणादिकं, दुर्योधनस्य बन्धुजनप्राप्तिं च एकेन वाक्येन वर्णयति। यथा "अत्रान्तरे पूर्वं तु दुर्वससो मन्त्रं परीक्षितुमाहूतेनादित्येन कुन्त्यां सद्य एवोत्पादितः कवची कुण्डली च कर्णो नाम, पुनरपि कन्यात्वं प्रपन्नयापि तथा तदात्मनो दूषणं मन्यमानया मञ्जुषायां पिधाय जले प्रक्षिप्तो यदृच्छया स्नातुमागतेन सूतेन गृहीतो वसुषेण इति कृतनामधेयो वर्धमानः सन् कालेन प्राप्तयौवनो भूत्वा धार्तराष्ट्राणां पारयणं बभूव" इति।

स्पष्टतायां भावाभिव्यक्तौ कोमलकल्पनायां विचारवैशद्ये चास्य कवेः ग्रन्थाः संस्कृतसाहित्ये प्रमुखं स्थानं वहन्ति। अनितरसाधारणं पाण्डित्यमस्मिन् कवौ वरीवर्ति। सम्पूर्णाः महाभारतकथाः कविः ज्ञात्वा ग्रन्थतल्लजत्रयेण समस्तं सहृदयमण्डलं तोषयति। संस्कृतसाहित्ये विराजमानः भीष्माचार्यः भवति लक्ष्मणसूरिः। तस्य शोभा काव्यद्वारा साहित्यमण्डले विकरन् सः १९२८ (अष्टाविंशत्यधिकनवशतसहस्रतमे) वर्षे देवभूयं गतः।

## पुनरावृत्तिः (Recap)

- संस्कृतसाहित्ये लक्ष्मणसूरिः अत्युत्तमं स्थानं वहति।
- लक्ष्मणसूरिः महाभारतमवलम्ब्य कतिपयान् ग्रन्थान् निर्ममे।
- तेषु ग्रन्थेषु भारतसंग्रहः, श्रीभीष्मविजयं, नलोपाख्यानसंग्रहः च प्रसिद्धाः।
- पाण्डित्ये प्रतिभायां काव्यविशकलने चायं कविः अग्रगण्यः भवति।
- अलङ्कारप्रयोगे कथासंक्षिप्तीकरणे चास्य कवेः पाटवं सीमातीतमेव।
- संस्कृतसाहित्ये कवेः योगदानं महदेव।
- कविसार्वभौमः अयं कविः १९२८ वर्षे दिवमगात्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. लक्ष्मणसूरिमहाभागः कदा कुत्र अजायत ?
2. सः अध्यापनवृत्तिं कुत्र चकार ?
3. कस्मिन् वर्षे सः देवभूयं गतः ?
4. लक्ष्मणसूरेः काव्यशैली कीदृशी

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. लक्ष्मणसूरिणा रचिताः ग्रन्थाः के?

## निर्दिष्टाभ्यासः (Assignments)

1. संस्कृतसाहित्ये लक्ष्मणसूरेः भाषाप्रयोगवैदग्ध्यं शैली योगदाञ्च विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. १८५९ (ऊनषष्ठ्यधिकाष्टाशतसहस्रतमे) वर्षे आन्ध्राप्रदेशे कृष्णप्रविश्यायाम् अजायत।
2. सः श्रीचैतन्या अक्कादम्याम् अध्यापकवृत्तिं चकार।
3. १९२८ (अष्टाविंशत्यधिकनवशतसहस्रतमे) वर्षे देवभूयं गतः।
4. अल्पसमासः स्वभावसरला च।

## सूचनाग्रन्थौ (References)


1. टि.के. रामचन्द्र अय्यर्, संक्षिप्तं संस्कृतसाहित्यचरित्रम्, आर्.एस्. वाध्यार् आन्ड् सन्स्, कल्पात्ति पालक्काट्, २०१८
2. आचार्यः लोकमणि दहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१६


## अधिकवाचनाग्रन्थाः (Suggested readings)


1. ए.बी. कीत्, संस्कृतसाहित्यचरित्रम्, मोत्तिलाल् बनारसीदास् पब्लिषेर्स, दिल्ली, १९९०

# BLOCK-4

# भारतसङ्ग्रहः - आदिपर्वणः समग्रमध्ययनम्

SGOU

# Unit - 1
# खण्डिका: 1 - 11

## उद्देश्यानि (Learning Outcomes)

- भारतसंग्रहस्य समग्रमध्ययनम् ।
- भारतसंग्रहस्य आदिपर्वणः कथासारम् अवगच्छति।
- इतिहासविषये उद्बोधनम्।
- संस्कृतगद्यसाहित्यपरिचयः ।

## प्राग्व्यपेक्षाः (Prerequisites)

अयि पठितारः,

अस्मिन् पत्रे चत्वारः खण्डाः। चतुर्थः खण्डः भारतसंग्रहस्य आदिपर्व। अत्र चत्वारि एककानि। प्रथमम् एककम् - पञ्च पाण्डवानाम् एकोत्तरशतं कौरवाणां च उत्पत्तिः तथा भीमं प्रति दुर्योधनादीनां विरोधश्च। भारतसंग्रहे तान् विषयान् अधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

अनुग्रहाय - भीष्माचार्यः - धृतराष्ट्रं - कुन्ती - माद्री - स्त्रीव्यतिकरनिमित्तः - धृतराष्ट्रस्य राजात्वं - त्रिवर्गप्रसूतिः - प्रतीच्छेमं मन्त्रम् - घृतपूर्णेषु कुण्डेषु - क्षमासारचक्रवर्तिलक्षणोपेतः - सत्येन शौचेन दमेन विनयेन - कृतकृत्य इव स्ववर्ग्यैः।

## Discussion

**मङ्गलश्लोकः -**

**अनुग्रहाय लोकानामवतीर्णायविष्णवे।**

**क्लेशापहाय कृष्णायाः पार्थसारथये नमः।**

| | | |
|---|---|---|
| **अन्वयः** | - | **अन्वयार्थः** |
| लोकानाम् अनुग्रहाय | - | प्रजानाम् अनुग्रहार्थम् |
| कृष्णायाः क्लेशापहाय | - | द्रौपद्याः क्लेशदूरीकरणाय च |
| अवतीर्णाय विष्णवे | - | अवतरणं कृते विष्णुभगवते |
| पार्थसारथये नमः | - | श्रीकृष्णाय नमः। |

**सारः -** समस्तजगताम् अनुग्रहाय अवतीर्णाय विष्णुदेवाय द्रौपद्याः दुरितदूरीकरणाय अवतीर्णाय श्रीकृष्णाय नमः। (विष्णोः अवतारेषु अन्यतमः भवति श्रीकृष्णः)

**विग्रहः -** पार्थस्य (अर्जुनस्य) सारथिः पार्थसारथिः, तस्मै पार्थसारथये।

पार्थसारथये नमः **-** नमः इत्यस्य योगे चतुर्थी।

**गद्यम् - १**

**देवव्रतः भीष्माचार्यः बभूव।**

अस्ति कुरुषु हस्तिनाख्यं नगरम्। तत्र चन्द्रवंशप्रदीपस्य प्रतीपस्य तनुजः शन्तनुर्नाम राजासीत्। तस्य गङ्गायां देवव्रतो नाम पुत्रो जज्ञे। सः प्राप्तयौवनोऽपि पितुरपेक्षया यावज्जीवं ब्रह्मचर्यम् एवात्मनोऽवस्थानं प्रतिजज्ञे। ततः सः भीष्मोऽभवत्। तेन तुष्टा पिता तस्मै स्वच्छन्दमरणं वरं दत्वा स्वयं सत्यवतीं नाम दासकन्यां परिणीय, तस्यां विचित्रवीर्याभिधमात्मजमुत्पाद्य स्वयं कालधर्मेणायुज्यत।

**व्याख्या - अस्तीति।**

नगरं नगरी। चन्द्रवंशप्रदीपः चन्द्रवंशस्य प्रदीपः, चन्द्रवंशालङ्कारभूतः। प्रदीपः प्रदीपो नाम। तनुजः पुत्रः। नाम नामधेयम्। पितुरपेक्षया पितुः + अपेक्षया। अत्र पिता शन्तनुः। पितुः तातस्य। अभवत् भू-पर-लङ्-प्र पु-ए व। अभवत् - अभवताम् - अभवन्। तस्मै भीष्माय। तस्मै द-पु-च-ए व। तस्मै – ताभ्याम् - तेभ्यः। तस्मै दत्वा इत्यत्र दाधातोः योगात् चतुर्थी।

**संक्षिप्तः आशयः -** कुरुदेशे हस्तिनपुरं नाम नगरमस्ति। तत्र चन्द्रवंशतिलकः प्रदीपः नाम राजा आसीत्। तस्य पुत्रः आसीत् शन्तनुः। शन्तनोः भार्या भवति गङ्गा। शन्तनोः गङ्गायाः च जातः पुत्रः भवति देवव्रतः। यदा सः युवा बभूव, तदा पितुः इच्छानुसारम् आजीवं ब्रह्मचर्यमनुष्ठातुं प्रतिज्ञां कृतवान्। कठिनप्रतिज्ञां कृतवान् इत्यतः सः भीष्मः इति नाम्ना प्रथितो बभूव। सन्तुष्टः पिता शन्तनुः तस्मै स्वच्छन्दमरणं वरं (यदा मरणमिच्छति तदा मरणमस्तु इति आग्रहानुसारं जीवितुं शक्यते) अदात्। सः धीवरकन्यां सत्यवतीं परिणीतवान् । तयोः कश्चन पुत्रः अजायत। सः भवति विचित्रवीर्यः। कतिपयवर्षानन्तरं राजा ममार।

**गद्यम् - २**

**विचित्रवीर्यस्यमरणं विदुरोत्पत्तिश्च।**

भीष्मस्तु बालस्य भ्रातू राज्यं दधत्तदनु यौवनारूढं तं राजानं कृत्वा काशीराजसुताभ्यां गृहमेधिनं च चकार। तस्मिन्नपि नातिचिरेण कालेनोपरते, कुलवृद्धिमिच्छुः सत्यवती शान्तनवानुमत्या पाराशर्यमात्मनः कानीनं पुत्रं व्यासं ज्येष्ठायां स्नुषायामम्बिकायां सन्तानार्थं नियोजयामास। सा तु तस्यासौम्येन रूपेण बीभत्समाना स्वचक्षुषी पिधाय तमुपजगाम। तदनुरूप एव तस्यां पुत्रो जज्ञे। तं धृतराष्ट्रमाहुः। तेन पौत्रेणापरितुष्टा सा दाशेयी कनिष्ठायां स्नुषायामम्बालिकायां पुनरपि तं नियोजयामास। सा तु तत्समागमे हरिणीभूतेवाभवत्। तत्सरूप एव तस्यां पुत्रो बभूव। सापि पाण्डुरित्येवाभ्यधायि। पुनश्चानभिमते तत्संगे श्वश्र्वा नियुक्ता सा द्वितीया आत्मनो भुजिष्यां शूद्रामलङ्कृत्य प्राहिणोत्। सुतरां दुर्लभेन तत्समागमेन कुतूहलिन्यां तस्यां विदुरनाम्ना सर्वगुणसम्पन्नः सुतो जातः।

**व्याख्या - भीष्म इति।**

भ्रातू राज्यम् - भ्रातुः + राज्यम्। दधत् परार्थे अरक्षयत्। गृहमेधिनं गृहास्थाश्रमं कुर्वन्तम्। काशीराजसुते पाणिग्रहणं कारयित्वा। कालेनोपरते कालेन + उपरते। उपरते मरणं गते। शान्तनवानुमत्या शान्तनवस्य अनुमत्या। शन्तनोः अपत्यं पुमान् शान्तनवः। कन्यायाः अपत्यं पुमान् कानीनः। पराशरस्यापत्यं पुमान् पाराशरः। पाराशरः व्यासः। नियोजयामास नियुक्तवती। रूपेण आकृतिना (सौन्दर्येण)। बीभत्समाना जुगुप्सायमाना। पिधाय अपिधाय (निमीलनं कृत्वा)। स्नुषा पुत्रभार्या। 'अपिधाय' इत्यत्र अकारस्य लोपे पिधाय इति रूपम्। 'वष्टिभागुरिः ...' इति नियमेन। तस्याम् अम्बिकायाम्। धृतराष्ट्रः इति नाम। पुत्रस्य पुत्रः पौत्रः। दाशेयी दाशकन्या सत्यवती। दाशस्य अपत्यं स्त्री दाशेयी। पुनरपि पुनः + अपि। पुनः मुहुः। हरिणीभूतेवाभवत् - हरिणीभूता + इव + अभवत्। हरिणीभूता हरिणी इव सम्भ्रान्ता (विवर्णा)। बभूव – भू

पर-लिट्-प्र पु-ए व। बभूव बभूवतुः बभूवुः। पाण्डुरित्येवाभ्यधायि - पाण्डुः + इति + एव + अभ्यधायि। अभ्यधायि ख्यातः। भर्तुः माता श्वश्रूः, तया श्वश्र्वा। भुजिष्यां दास्याम्। दुःखेन लब्धुं योग्यं दुर्लभम्।

**संक्षिप्तः आशयः -** भीष्मः बालस्य सोदरस्य विचित्रवीर्यस्य राज्यं स्वयं संरक्षितवान्। यदा सोदरः युवा अभवत् तदा तं राजात्वेन अभिषेकं चकार। पुनः काशीराजस्य पुत्रीभ्याम्, अम्बिका - अम्बालिकाभ्यां च सह विवाहं कारयामास। किन्तु अल्पेन कालेन विचित्रवीर्यः मरणं प्राप। वंशवर्धनमभिलषन्ती सत्यवती भीष्मस्यानुमत्या कानीनं स्वपुत्रं व्यासं स्नुषायाम् अम्बिकायां पुत्रोत्पादनाय प्रेरितवती। अम्बिका तु व्यासस्य विरूपे प्रकृतौ जुगुप्साम् अनुभूय नेत्रे पिधाय अवर्तत। अतः तस्यां जातः धृतराष्ट्रः अन्धः आसीत्। तेन असन्तुष्टा सत्यवती व्यासम् अम्बालिकायां सन्तानोत्पादनाय नियुक्तवती। अम्बालिका तत्समागमे हरिणीभूता इवावर्तत। तस्यां जातः पुत्रः भवति पाण्डुः। तेनापि असन्तुष्टा सत्यवती पुनरपि अम्बालिकां प्राप्तुं व्यासं नियुक्तवती। सा स्वसेविकां शूद्रां तदर्थं प्रेरितवती। सेविका अतितात्पर्येण व्यासं स्वीचकार। तस्यां शूद्रायां सर्वगुणोपेतः विदुरः नाम पुत्रः अजायत।

**गद्यम् - ३**

**धृतराष्ट्रस्य भार्या गान्धारी, पाण्डोः भार्याद्वयं कुन्ती माद्री च।**

ज्येष्ठस्य जात्यान्धतया, कनिष्ठस्य पारवशतया च मध्यमः पाण्डुरेव राजा बभूव। आम्बिकेयस्तु सुबलकन्यां गान्धारीं भार्यां लेभे। सापि तादृशाय वरायात्मानं पितृभ्यां दित्सितं यदा शुश्राव, तदैव "पत्यै ममासूया मा भूत्" इति स्वे अक्षिणी अपि पटैः सम्यग्बध्वा स्वयमप्यन्धेव भूत्वा पतिव्रतात्वमन्वर्थयामास। पाण्डोस्तु कुन्ती माद्री चेति द्वे भार्ये बभूवतुः ।

**व्याख्या - ज्येष्ठस्येति।**

पारवशतया शूद्रपुत्रत्वेन। अम्बिकायाः अपत्यं पुमान् आम्बिकेयः (धृतराष्ट्रः)। पितृभ्यां मातृपितृभ्याम्। तदैव तदा + एव। पत्यै असूया मा भूत् इत्यत्र असूयायाः योगे चतुर्थी। पत्यै इति।

**संक्षिप्तः आशयः -** सत्यवत्याः पुत्रेषु मध्यमः पाण्डुः राजा बभूव। धृतराष्ट्रः सुबलपुत्रीं गान्धारीं विवाहितवान्। यदा पितरौ तां गान्धारीं धृतराष्ट्राय दातुं निश्चितौ तदा सा पत्यै ममासूया मा भूत् इति विचिन्त्य वस्त्रैः नेत्रे बध्वा अन्धेव बभूव। पाण्डोः भार्याद्वयं वर्तते कुन्ती, माद्री च।

**गद्यम् - ४**

**किन्दममहर्षेः शापः।**

एकदा स भूपो महता बलेन मृगयार्थी सभार्यो वनमगच्छत्। स तत्र तत्र मृगान्वराहान्महिषानन्यांश्च वन्याञ्श्वापदान्घ्नन् क्रीडतः हरिणमिथुनस्य पुमांसं स्वशरस्य यदृच्छया शरव्यम् अकरोत्। स च तेन बलवन्मर्मणि ताडितस्तन्मृगरूपं विहाय तापसवेषेण सव्यथमिदमाह भो राजन्, अहं किल किन्दमो नाम महर्षिः स्वच्छन्दभोगकाम्यया द्वन्द्वधर्माहमेवम् अचरम्। ईदृशे मयि कमपराधलवमुत्प्रेक्ष्य प्रहृतवानसि। न हि निरपराधो विशेषतो माननीयो जनो वा अहिंसयैव प्राणयात्रां वर्तयन्मृगो वा पीडयितुं ते साम्प्रतम्। हिंस्रस्य दमनाय हि राज्ञां शस्त्रम्। न तु कृपणजनक्लेशाय। यदेवमनाकलय्य मामवधीस्तस्मात् स्त्रीव्यतिकरनिमित्त एव तवापि मृत्युरस्तु इति शप्त्वा विरतासुरभूत्।

**व्याख्या - एकदेति।**

बलेन सैन्येन। भार्यया (भार्याभ्यां) सह वर्तते इति सभार्यः। वराहः सूकरः। वन्याञ्श्वापदान् वन्यान् + श्वापदान्। वने भवान् शुनकादि जन्तून्। शरण्यं शरपतनयोग्यम्। ताडितस्तन्मृगरूपम् - ताडितः + तद् + मृगरूपम्। ताडितः पीडितः। महर्षिः महान् असौ ऋषिः च। अचरम् अचलम्। उत्प्रेक्ष्य संशय्य। मानयितुं योग्यः माननीयः। शस्त्रम् आयुधम्। कृपणजनक्लेशाय साधुजनान् क्लेशयितुम्। अनाकलय्य चिन्तां विना। मामवधीस्तस्मात् - माम् + अवधीः + तस्मात्। अवधीः हन्-हिंसायां-पर-लुङ्-म पु-ए व। अवधीः (त्वं) वधम् अकरोः।

**संक्षिप्तः आशयः -** एकदा राजा पाण्डुः सभार्यः मृगयार्थं वनमगच्छत्। मृगयामध्ये यदृच्छया क्रीडितस्य हरिणमिथुनस्य पुमांसं जघान। तदा मृगरूपं विहाय सः हरिणः तापसवेषेण एवमवदत्। हे राजन्, अहं किन्दमः नाम महर्षिः। स्वच्छन्दभोगकाम्यया मृगरूपेण अवर्तम्। केन कारणेन त्वं माम् अवधीः। निरपराधिनां हननं न युक्तम्। राज्ञां शस्त्रं हिंस्रजन्तूनां दमनाय। न तु साधुजनद्रोहाय। अतः स्त्रीस्पर्शनेनैव तव मृत्युरस्तु इति शशाप। किन्दमः मृतश्च।

**गद्यम् - ५**

**पाण्डोः पश्चात्तापः धृतराष्ट्रस्य राजात्वं च।**

तच्छ्रुत्वा राजा व्यचिन्तयत्- 'किमिदमन्यदाचरतो मेऽन्यदापतितम्। न हि निरङ्कुशः कार्यमकार्यं विमृशति। ईश्वरो हि पुरुषः परस्य सुखदुःखे न संवेदयते, नाप्यात्मनो हिताहिते पश्यति। मदान्धो गज इव परिभ्रमन्यत्र कुत्रापि व्यसनमहागर्ते निपत्य सीदति। मदस्य मूलं प्रभुत्वं, न तु मद्यम्। अतस्तत्क्षपणेन तपसैवायुषः शेषो मे

यापयितव्यो, न तु भोगेन' इति व्यवसितमतिरतीव दुःखितं स्वं परिवारं कथं कथमपि नगराय निर्वर्तयामास। ततश्च नागरैरभ्यर्थितो धृतराष्ट्रः स्वपित्रा गाङ्गेयेन, कनीयसा भ्रात्रा विदुरेण चानुमतः स्वयं राज्यमकरोत् ।

**व्याख्या - तदिति।**

राजा पाण्डुः। आचरतः कुर्वतः। निरङ्कुशः नियन्त्रणरहितः। सुखं च दुःखं च सुखदुःखे। व्यसनमहागर्ते अगाधे दुःखगर्ते। प्रभुत्वम् अधिकारभावः। तत्क्षपणेन तस्य नाशकारणेन। तपसा तपोऽनुष्ठानेन। गाङ्गेयेन भीष्मेण।

**संक्षिप्तः आशयः -** किन्दममहर्षेः शापेन दुःखितः पाण्डुः एवम् अचिन्तयत्। एकं कार्यं चिन्तितम्। अन्यत् सम्भूतम्। अहं कार्यमकार्यं च न चिन्तयामि। अधिकारी (ईश्वरः पुरुषः) अन्यस्य सुखं दुःखं न जानाति। हिताहितं न चिन्तयति। मत्तगज इव महत्यां विपदि पतति। मदस्य कारणं प्रभुत्वमेव। न तु मद्यम्। अतः मम शिष्टं कालं तपश्चरणमेव युक्तम् इति। सः राजा स्वपरिवारान् नगराय गन्तुं प्रेरितवान्। जनैः अभ्यर्थितः धृतराष्ट्रः भीष्माचार्येण अनुजेन विदुरेण चानुमतः हस्तिनपुरस्य राजा बभूव।

**गद्यम् - ६**

**कुन्ती दुर्वाससमुनिपरिचरणवृत्तान्तंपाण्डवे निवेदयति।**

पाण्डुस्तु तादृशे व्यसनेऽभ्यनुवर्तमानाभ्यां ताभ्यां भार्याभ्यां सह मुनिजनोचितया वृत्या तत्रैव नियमपरः कालं गमयन् राज्यादपि परां निर्वृतिमवाप। स कदाचित्पौरमुखेन प्रजावतीम् अन्तर्वत्नीमवगत्य क्षुभितमतिः स्वयमपि पुत्रीयन् रहसि ज्येष्ठां भार्यां कुन्तीमिदवोचत् 'अयि श्रूयते हि बहवो दुश्चरेण तपसाप्यसाध्यं लोकं प्रजया साधितवन्तः' इति। पितरोऽपि पुत्रवतैवन्युप्ते जलाञ्जलौ कुतुकिनो भवन्ति। उत्सङ्गगतमर्भकमुपलालयंस्तदालिङ्गनकलभाषिताद्यभिज्ञो यो न भवतितस्यैवान्यदन्यद्रम्यं भवति न तु तस्वादं विदुषः। अहं त्वेवमुभयलोकसुखसाधारणेऽप्यपत्ये स्वदोषेण निराशस्त्रिशङ्कुरिव निरालम्बः संवृत्तोऽस्मि। धारयस्व माम्। पुंसः कल्पलता खलु त्रिवर्गप्रसूतिगृहिणी। स्त्रीणां निसर्गसिद्धा हि निपुणता, दक्षता, उपायज्ञता च। तद्भद्रे, अनन्यगतिकं मां पुन्नाम्नो नरकात् त्रायस्व' इत्यश्रूणि मुजंस्तयोचे 'नाथ, श्रूयतां किञ्चित्। पुरा पितुर्गृहे वर्तमानायां मयि तपसेवाक्षमया च ज्वलन् इव ज्वलन्नात्रेयो दुर्वासाः नाम महर्षिः यदृच्छायागतः सत्कृतो मम पितरमपृच्छत् 'अत्रैव चिरं स्वच्छन्देन वस्तुमागतोऽस्मि। तदनुमन्यतां भवान्' इति। तेन तथेत्यभ्युपेत्य तस्य शुश्रूषार्थमहं नियोजिता। तस्य मुनेर्दुराराध्यतया भृशमुद्विग्ना महता प्रयासेनासिधाराव्रतमिव चरन्ती तं चिरं पर्यचरम्। स कदाचित् भगवान्मामिदमभाषत-

**व्याख्या - पाण्डुरिति।**

भार्याभ्यां सह कुन्तीमाद्रीभ्यां साकम्। भार्याभ्यां सह इत्यत्र सह इत्यव्ययस्य योगे तृतीयाविभक्तिः। निर्वृतिं सुखम्। प्रजावती राज्ञी। अन्तर्वत्नी गर्भिणी। क्षुभिता मतिः यस्य सः क्षुभितमतिः। पुत्रीयन् पुत्रम् आत्मीयम् अभिलषन्। ममैकः पुत्रः अस्तु इत्यभिलषन्। तपसाप्यसाध्यम् - तपसा + अपि + असाध्यम्। तपश्चरणेनापि सम्पादितुमसाध्यम्। पुत्रवता पुत्रसहितेन पित्रा। न्युप्ते दीयमाने। कुतुकिनः तत्पराः। उत्सङ्गगतम् अङ्कप्राप्तम्। अर्भकं शिशुम्। उपलालयंस्तदालिङ्गनकलभाषिताद्यभिज्ञः उपलालायन् + तदालिङ्गनकलभाषितादि + अभिज्ञः। कलभाषितं मधुरभाषणम्। तस्यैवान्यदन्यद्रम्यम् तस्य + एव + अन्यत् + अन्यत् + रम्यम् । उभयलोकसुखसाधारणे - इहलोके परलोके च सुखदायके। अपत्ये पुत्रे (सन्ततौ)। अस्मि भवामि । अस्मि - अस भुवि-पर-लट्-उ पु-ए व। अस्मि - स्वः- स्मः। धारयस्व धृञ् धारणे-उभ-णिचि-लोट्-म पु-ए व। धारयस्व - धारयेथाम् - धारयध्वम्। धारयस्व संरक्ष। पुंसः पुरुषस्य। त्रिवर्गप्रसूतिः धर्मार्थकामादायिका। उपायज्ञता उपायं ज्ञातुं वर्तमानं सामर्थ्यम्। त्रायस्व संरक्ष। त्रायस्व त्रैङ् पालने-आत्म-लोट्-म पु-ए व। त्रायस्व - त्रायेथाम् - त्रायध्वम्। अश्रूणि मुञ्चन् तया ऊचे कर्मणिप्रयोगः। सा अश्रूणि मुञ्चन्तम् उवाच - कर्तरिप्रयोगः। श्रूयताम् आकर्ण्यताम्। श्रूयताम् श्रु श्रवणे-आत्म-लोट्-प्र पु-ए व। श्रूयताम् - श्रूयेताम् - श्रूयन्ताम्। पितुर्गृहे वर्तमानायां मयि सतिसप्तमीप्रयोगः। यदा अहं पितुः गृहे अवर्तं तदा। तपसेवाक्षमया - तपसा + इव + अक्षमया। तपसा इव ज्वलन् अक्षमया च ज्वलन्। अत्रेः अपत्यं पुमान् आत्रेयः। वस्तुं वासं कर्तुम्। तदनुमन्यतां - तदर्थमनुमतिं ददातु। अहं नियोजिता मां नियुक्तवान्। नियमेन निष्ठया। असि खड्गः। असिधाराव्रतम् अनुष्ठातुं प्रयासयुक्तम्। अभाषत अवदत्। भाष व्यक्तायां वाचि-आत्म-लङ्-प्र पु-ए व। अभाषत - अभाषेताम् - अभाषन्त ।

**संक्षिप्तः आशयः -** तापसरूपेण वने पाण्डुः सुखम् उवास। एकदा पौरमुखेन राज्ञी गान्धारी गर्भवती इति श्रुत्वा क्षुभितचित्तः बभूव। सः रहसि कुन्तीमाहूय एवमवदत्। तपसापि असाध्यं लोकं वशीकर्तुं पुत्रेण साध्यते। पितरः अपि, पुत्रवता पित्रा सन्तुष्टाः भवन्ति। पुत्रलाभेन यद् सौभाग्यं लभते, तत्तुल्यः अन्यः हर्षः लोके न लभते। मम दोषेण अहम् अपुत्रः निरालम्बः च समाजायत। अतः मां संरक्ष। धर्मार्थकामदायिका भवति भार्या। स्त्रीषु स्वाभाविकरीत्या निपुणता दक्षता उपायज्ञता च वर्तते। अतः निरालम्बं मां पुन्नाम्नः नरकात् त्रायस्व इति सविषादम् अवदत्। तदा कुन्ती एवमवदत् अयि नाथ, यदा अहं पितुर्गृहे अवसं तदा एकदा दुर्वासाः नाम महर्षिः अत्रागतवान्। सः क्षिप्रकोपी क्षमारहितः च भवति। चिरं पितुः गृहे उषितुं सोऽभलषतीति पितरमुवाच। तथा अस्तु इति पित्रा अनुमतिं चादात्। अपि च तस्य शुश्रूषार्थं पिता मां नियुक्तवान्। महता क्लेशेन उत्कण्ठाकुलया मया अतीव श्रद्धया भक्त्या च सः महर्षिः सेवितः। तेन सन्तुष्टः महर्षिः मामवदत्।

**गद्यम् - ७**

**महर्षेः भाषणं मन्त्रदानं मन्त्रफलं पाण्डवानामुत्पत्तिश्च।**

'वत्से पृथे, मया बहुतरं क्लेशितापि स्वयमखिन्नैव मामुपास्से। न किञ्चिदपि तव वैमनस्यं लक्षये। तव शौचेनानालस्येन चातितरां प्रीये। न हि मादृशस्य कोपः प्रसादो वा निष्फलो भवितुम् अर्हति। अत प्रतीच्छेमं मन्त्रम्। अनेन यां देवतामाह्वयसि सा सद्य एव तव मनोरथं पूरयिष्यति' इति प्रसन्नस्तं मन्त्रं मयि सङ्क्रामयामास। 'यदि मन्यसे तमधुनोपयोक्ष्ये, कां वा देवतामुपस्थास्ये' इति निवेदयन्ती सा तदनुमत्या वैवस्वतं धर्मराजमुपास्य तदनुग्रहेण युधिष्ठिराख्यं पुत्रमसूत। स च स्वगुणेन पश्चादजातशत्रुरिति च प्रपथे। वायोः प्रसादात् भीमसेनाख्यं पुत्रमविन्दत, यं वृकोदर इति भीम इति च वदन्ति। इन्द्रप्रसादादर्जुनाख्यं लेभे। स च उत्तरफाल्गुन्योर्जातः इति फल्गुनः इति चोच्यते। पाण्डोः तस्यापरा भार्या माद्र्यपि तन्मन्त्रेणैवाश्विप्रसादाद्यमलौ नकुलसहदेवाख्यौ सुतावसूत। एवं पञ्चपाण्डवा अजायन्त।

**व्याख्या - वत्स इति।**

बहुतरम् अधिकम्। उपास्से त्वम् उपासनं कृतवती। वैमनस्यं विमुखताम्। अतितरां नितराम्। प्रीये सन्तुष्टः भवामि। मादृशस्य मम सदृशस्य। प्रतीच्छ स्वीक्रियताम्। मन्त्रः वेदभेदः। आह्वयसि आह्वानं करोषि। अधुना इदानीम्। उपस्थास्ये मया उपासनं करणीयम्। विवस्वतः अपत्यं पुमान् वैवस्वतः। विवस्वान् सूर्यः। तदनुमत्या तस्य अनुमत्या। प्रपथे प्रसिद्धिं प्राप। अविन्दत अलभत। विद्लृ लाभे-आत्म-लङ्-प्र पु-ए व। अविन्दत - अविन्देताम् - अविन्दन्त। लेभे डुलभष् प्राप्तौ-आत्म-लिट्-प्र पु-ए व। लेभे - लेभाते - लेभिरे। उत्तरफल्गुनि उत्तरफल्गुनिनक्षत्रे। यमलौ सहजातौ। एवम् एवं रीत्या।

**संक्षिप्तः आशयः** - महर्षिः दुर्वासाः कुन्तीमेवमवदत्। हे कुन्ति, मया क्लेशिता अपि त्वं मां यथावत् परिचर्यामकरोः। ईषदपि वैमुख्यं न प्रकटिता। तव भक्तौ अहं सन्तुष्टः भवामि। ममानुग्रहः कोपः वा कदापि निष्फलं न भविष्यति। इमं मन्त्रं स्वीक्रियताम्। अनेन मन्त्रेण यां देवतां उपास्यते सा देवता तवाग्रहं सफलं करिष्यति इत्युक्त्वा मन्त्रं कुन्त्यां संक्रमयामास। कुन्ती तु पाण्डोरनुवादेन सूर्यसुतं धर्मराजम् उपास्य, युधिष्ठिरं नाम सुतमसूत। सः पश्चात् अजातशत्रुरिति विख्यातो बभूव। पुनः वायोः सकाशात् भीमाय जन्म अदात्। इन्द्रस्य प्रसादात् अर्जुननामकं पुत्रं लेभे। पाण्डोः अपरा भार्या अपि अनेन मन्त्रवैभवात् अश्विनिदेवौ सन्तोष्य सहजाताभ्यां नकुलसहदेवाभ्यां जन्म अदात्। एवं पञ्च पाण्डवाः अजायन्त।

**गद्यम् - ८**

**एकोत्तरशतं धार्तराष्ट्राः।**

गान्धारी तु संवत्सरत्रयं गर्भं धार्यमाणा, कुन्त्या ज्येष्ठं पुत्रं जातः यदा शुश्राव, तदैवामर्षेण स्वोदरमश्मना घ्नती मांशपेशीमसूत। तत्क्षणमागतस्य भगवतो द्वैपायनस्याज्ञया तां पेशीमेकोत्तरशतधा विभज्य, घृतपूर्णेषु कुण्डेषु पृथक् पृथङ्निधाय, शीतेन जलेन प्रतिदिनं च निषिच्य रक्षितवती सा कालेन दुर्योधनप्रमुखान् शतमात्मजान् दुश्शलाख्यामवरजां कन्यां चाविन्दत। धृतराष्ट्रस्तु स्वभार्यायामासन्नप्रसवायां युयुत्सुनामात्मजं वैश्यायामुत्पादयामास। एवं धार्तराष्ट्राः एकोत्तरशतमासन् ।

**व्याख्या - गान्धारीति।**

संवत्सरत्रयं वर्षत्रयपर्यन्तम्। अश्मना पाषाणेन। घ्नती विदारयती। भगवतः ईश्वरस्य। भगवतः त-पु-ष-ए व। भगवतः - भगवतोः - भगवताम्। कुण्डं स्थाली। अवरजा कनिष्ठसोदरी। आसन्नप्रसवायां भार्यायाम् - यदा भार्यायाः प्रसवम् आसन्नं भवति तदा। धार्तराष्ट्राः धृतराष्ट्रस्य अपत्यानि धार्तराष्ट्राः।

**संक्षिप्तः आशयः** - गान्धारी वर्षत्रयं गर्भं दधार, किन्तु नासूत। कुन्त्याः प्रसववार्तां श्रुत्वा सा अमर्षेण स्वस्याः उदरं विदारयामास। सा एकं मांसपिण्डमसूत। तदा तत्रागतस्य व्यासस्य उपदेशमनुसृत्य तन्मांसपिण्डं एकोत्तरशतधा विभजनं चकार। पुनः एकैकं भागं घृतपूर्णासु स्थालीसु स्थापयित्वा प्रतिदिनं शीतेन जलेन निषिच्य संरक्षयामास। कालेन दुर्योधनप्रमुखाः शतं पुत्राः, दुश्शलानामिकां पुत्रीं च संजाताः। यदा गान्धारी आसन्नप्रसवा जाता तत्काले धृतराष्ट्रः कस्याञ्चन वैश्यस्त्रियां युयुत्सुनामकाय पुत्राय जन्म अदात्।

**गद्यम् - ९**

**पाण्डोः मरणम्, पाण्डवानां हस्तिनपुर्यागमनम्।**

अथ कदाचिद्दैवस्य दुर्निवारतया बलान्माद्रीमुपगम्यायुषोऽन्तमुपगतवति पाण्डौ, तस्यां च तन्मार्गमेवानुसृतवत्यां विदितवृत्तान्ता कुन्ती चिरं विलप्य तौ दम्पती विधिना संस्कार्य, मुनिजनसहिता बालकैः सह शनैः शनैः कतिपयैः दिवसैः स्वपुरमेव प्रपेदे। तत्रामानुषरूपांस्तानवलोक्य नागराः तर्कयन्ति स्म 'केयं सुन्दरी शोभनापि शोच्यतमा दृश्यते। कोऽयमस्याः पृष्ठतो मूर्ती धर्म इव क्षमासारचक्रवर्तिलक्षणोपेतश्च लक्ष्यते। अथ कोऽयमपरः आकृत्या मृगेन्द्रगामी। अहो शौर्यराशिरयम्। कश्चायमुदात्तस्वभावो भाति। नूनमयं युवा भवन् साक्षात्मघवतोऽपि च प्रतियोद्धा स्यात्। तथा हि अस्य धैर्यलक्ष्मीर्लक्ष्यते। कौ चैतावश्विनाविव रूपवन्तौ। किमनयोर्निमग्ना दृष्टिः पुनरुद्धर्तुमपि न पार्यते। नूनमेते देवताप्रसादाल्लब्धा पाण्डुपुत्राः' इति निश्चयन्तेन तर्केण कुतूहलिताः महता कोलाहलेन तानेवान्वधावन्। तत्रैवान्तर्हितेषु तपस्विषु, तदागमेन मुदितो राजा वैचित्रवीर्यस्तान् स्वगृहमानीयानुजस्य विपत्या दुःखितोऽपि तल्लाभेन निर्वृतस्तान् पुत्रनिर्विशेषं पोषयामास ।

**व्याख्या - अथेति।**

कदाचिद्दैवस्य - कदाचित् + दैवस्य। तत्रामनुषरूपांस्तानवलोक्य तत्र + अमानुषरूपान् + तान् + अवलोक्य। अमानुषरूपान् असाधारणसौन्दर्ययुक्तान्। तर्कयन्ति स्म अतर्कयन्। स्म योगे भूते लट्। केयम् का + इयम्। कोऽयम् - कः + अयम्। महागजेन्द्रगामी महागजेन्द्रस्य गमनमिव गमनं यस्य सः महागजेन्द्रगामी। शौर्यस्य राशिः शौर्यराशिः। शौर्यशाली। कश्चायम् कः + च + अयम्। मघवा इन्द्रः। चैतावश्विनाविव च + एतौ + अश्विनौ + इव। पुनरुद्धर्तुम् पुनः + उद्धर्तुम्। उद्धर्तुं प्रतिनिवर्तुम्। देवताप्रसादाल्लब्धाः - देवताप्रसादात् + लब्धाः। देवतानाम् अनुग्रहेण प्राप्ताः। कुतूहलिन्यः तात्पर्ययुक्ताः। तत्रैवान्तर्हितेषु तपस्विषु - सति सप्तमीप्रयोगः। यदा तपस्विजनाः तत्रैवान्तर्हिताः तदा। वैचित्र्यवीर्यस्तान् वैचित्र्यवीर्यः + तान्। वैचित्र्यवीर्यः धृतराष्ट्रः।

**संक्षिप्तः आशयः -** एकदा पाण्डुः माद्रीमुपगन्तुं यतते किन्दमशापेन सः मृतोऽभवत्। माद्र्यपि मरणं प्राप। कुन्ती विललाप। तयोः संस्कारादिकं विधिप्रकारं चकार। पुनः कुन्ती मुनिजनैः सह पाण्डवैः सह स्वपुरमगच्छत्। नगरवासिनः कुन्त्याः सौन्दर्यं, तामनुगच्छतः चक्रवर्तिलक्षणयुक्तं धर्मराजम् इव वर्तमानं युवानं, शौर्यराशिं युवानं, इन्द्रस्य पराक्रमतुल्यं युवानं, सौन्दर्यतुल्यौ युवानौ च वीक्ष्य एते कुन्ती, पाण्डुपुत्राः च भवन्ति इति निश्चितवन्तः। धृतराष्ट्रस्तु अनुजस्य विपदि दुःखितोऽपि पाण्डुपुत्राणां लाभेन सन्तुष्टः सन् तान् पुत्रतुल्यं पोषयामास।

**गद्यम् - १०**

**धर्मपुत्रस्य स्वभावमहिमा।**

अथ यथाकालमुपनीतेषु, वर्धमानेषु सर्वेषु च कुमारेषु युधिष्ठिरस्य सत्येन शौचेन दमेन विनयेन अन्यैश्च गुणैर्बाह्या आभ्यन्तराश्च जनाः शारद इव राकाचन्द्रे तस्मिन्ननुरागं दधुः। तदसहमानो दुर्योधनः स्वयं राज्यलोभात् दुष्टामेव मतिं तस्मिंश्चकार। तद्भ्रातरः दुश्शासनादयोऽपि तमेवान्ववर्तन्त। अजातशत्रुस्तु जानन्नपि तेषां हृदयं सहजया क्षमया स्वयं तेषु वत्सल इव बभूव। कालम् अनतिक्रम्य यथाकालम्। तस्मिंश्चकार तस्मिन् + चकार। दुश्शासनादयोऽपि - दुश्शासनादयः + अपि। दुर्योधनस्य कनिष्ठः भवति दुश्शासनः।

**व्याख्या - अथेति।**

अजातशत्रुस्तु - अजातशत्रुः + तु। अजातशत्रुः युधिष्ठिरः।

**संक्षिप्तः आशयः -** सर्वे कुरुपाण्डवाः धृतराष्ट्रेण पोषिताः। युधिष्ठिरः सत्यसन्धः विनयशाली सर्वगुणोपेतः सर्वेषां प्रियङ्करश्च। दुर्योधनादयः युधिष्ठिरं नेच्छन्ति। युधिष्ठिरः दुर्योधनादीनां दुष्टचिन्ताः जानन्नपि सहजया क्षमया अवर्तत।

**गद्यम् - ११**

**सुयोधनः भीमवधाय यतते।**

वृकोदरस्तु तेषां दुराशयममृष्यमाणस्तानाहारविहारादिके सर्वस्मिन्नप्यवसरे हेलयैव मर्दयन्नतिप्रगल्भतया तैरनभिभूतश्च सन् हृदि निखातः शङ्कुरिव तेषां संजज्ञे। तस्य निभृतवधोपायं चिन्तयन् स पापः सुयोधनो जलक्रीडाच्छलेन भागीरथीं नीत्वा, तत्र विषसंस्पृष्टमन्नं तस्मै प्रदाय्य, तेन मूर्छितं तं दृढं बद्ध्वा, स्रोतसि प्रक्षिप्य, कृतकृत्य इव स्ववर्ग्यैः समं पुरमवाप। तदविद्वांसो युधिष्ठिरादयस्तु भ्रातुरदर्शनेन परेभ्यः पापमाश-ङ्कमानास्तत्र तत्र विचिन्त्य मात्रा सह विषीदन्तो विदुरेणाश्वासिता अपि भृशमार्तिमभजन्त।

**व्याख्या - वृकोदर इति।**

वृकोदरस्तु - वृकोदरः + तु। वृकस्य उदरम् इव उदरं यस्य सः वृकोदरः। वृकोदरः भीमः। हेलयैव - हेलया + एव। हेला क्रीडा। शङ्कः आणिः। निभृतवधोपायं रहस्यवधोपायम्। विषसंस्पृष्टम् विषमिश्रितम्। बद्ध्वा बन्धनं कृत्वा। बद्ध्वा क्त्वान्तमव्ययम्। अविद्वांसः अज्ञातवन्तः। विचिन्त्य अन्वेषणं कृत्वा।

**संक्षिप्तः आशयः -** भीमः सुयोधनादीनां रीतौ असहिष्णुः भूत्वा भक्षणसमये क्रीडादिषु च क्रीडाव्याजेन सुयोधनादीन् ताडितवान्। किन्तु अतिसामर्थ्येन तैरनभिभूतः बभूव। कौरवेभ्यः भीमः हृदि पतितः आणिरिवावर्तत। सुयोधनः रहसि भीमस्य वधोपायम् अचिन्तयत्। एकदा जलक्रीडाव्याजेन भीमं गङ्गामानीय तस्मै विषमिश्रितमन्नम् अदात्। तेन मोहमुपगतं तं सुदृढं बद्ध्वा नद्यां निचिक्षेप। पुनः कृतकृत्य इव स्ववर्गैः साकं पुरं प्राप। भ्रातरं भीममदृष्ट्वा युधिष्ठिरादयः परिभ्रान्ताः बभूवुः। विदुरेण आश्वासिता अपि सर्वे कुन्त्या मात्रा सह दुःखमनुबभूवुः।

## संक्षिप्तीकरणम्

कुरुदेशे हस्तिनाख्यं नगरमस्ति। तत्र चन्द्रवंशस्य राज्ञः प्रदीपस्य पुत्रः भवति शन्तनुः नाम राजा। तस्य गङ्गायां जातः पुत्रः भवति देवव्रतः। स एव भीष्माचार्यः। शन्तनुः पुनः दाशकन्यां सत्यवतीं परिणीतवान्। तस्यां विचित्रवीर्यः नाम पुत्रः अजायत।

विचित्रवीर्यस्य भार्ये भवतः अम्बिका अम्बालिका च। विचित्रवीर्यस्य मरणानन्तरं कुलाभिवृद्ध्यर्थं सत्यवती आत्मनः पराशरात्मजं व्यासं ज्येष्ठायां स्नुषायां पुत्रोत्पादनार्थं प्रेरितवती। व्यासस्य प्रकृतौ असन्तुष्टा अम्बिका नेत्रे पिधाय व्यासमुपजगाम। तदा जातः भवति धृतराष्ट्रः। सः अन्धः आसीत्। पुनः सत्यवती

अम्बालिकायां पुत्रोत्पादनार्थं प्रेरितवती। अम्बालिका तु हरिणीभूतेव अभवत्। तस्यां पाण्डुः अजायत। पुनरपि सत्यवत्या प्रेरिता अम्बालिका स्वसेविकां शूद्रामलङ्कृत्य प्रेषितवती। तस्यां शूद्रायां जातः भवति सर्वगुणोपेतः विदुरः।

ज्येष्ठस्य अन्धत्वात् कनिष्ठस्य शूद्रत्वात् च पाण्डुः राजा बभूव। धृतराष्ट्रः सुबलकन्यां गान्धारी परिणीतवान्। भर्ता अन्धः इति ज्ञात्वा सा पत्यै ममासूया मा भूत् इति विचार्य वस्त्रैः नेत्रे सुदृढं बद्ध्वा अन्धेव अवर्तत। पाण्डोः भार्ये भवतः कुन्ती माद्री च।

एकदा मृगयार्थं गतः पाण्डुः यादृच्छिकया हरिणरूपेण वर्तमानं किन्दममहर्षिं हतवान्। स्त्रीस्पर्शेन तवापि मरणमस्तु इति शापं च पाण्डुः सम्पादितवान्। तेन दुःखितः पाण्डुः तापसरूपेण कानने सभार्यः सन् उषितुं निश्चिकाय। धृतराष्ट्रः राजा बभूव।

एकदा पौरमुखेन गान्धारी गर्भवती इति ज्ञात्वा पाण्डुः दुःखितः सन् पुत्रदुःखात् येन केनापि प्रकारेण तं रक्षितुं कुन्तीं प्रार्थितवान्। तदा तस्याः पितुर्गृहे सम्भूतं दुर्वाससः आगमनं, कुन्त्याः परिचरणं, सन्तुष्टेन महर्षिणा दत्तं मन्त्रं चाधिकृत्य सूचितवती। कां देवताम् आह्वयति सा मनोरथं पूरयिष्यति इत्युक्त्वा पाण्डोरनुमत्या सूर्यपुत्रं धर्मराजमुपास्य युधिष्ठिरम् असूत। पुनः वायोः सकाशात् भीमम्, इन्द्रस्य प्रसादात् अर्जुनं च पुत्रत्वेन लब्धम्। माद्री तु तेनैव मन्त्रेण अश्विनीदेवं उपास्य यमलौ नकुलसहदेवौ पुत्रत्वेन लेभे। एवं पञ्च पाण्डवाः जाताः।

वर्षत्रयं गर्भं धारयमाणा गान्धारी पाण्डोः पुत्रः जातः इति वार्तां ज्ञात्वा अमर्षेण स्वोदरं अश्मना विकीर्य काञ्चन मांसपेशीमसूत। तदा तत्रागतस्य व्यासस्य उपदेशानुसारं तां मांसपेशीं एकोत्तरशतधा विभज्य घृतपूर्णेषु पात्रेषु निचिक्षेप। प्रतिदिनं तानि पात्राणि शीतजलेन निषिच्य संरक्षितुम् अवदत्। क्रमेण दुर्योधनादयः शतं पुत्राः, एका कनिष्ठा सोदरी च अजायन्त। एवम् एकोत्तरशतं धार्तराष्ट्राः आसन्। गान्धारी यदा आसन्नप्रसवा अवर्तत तदा धृतराष्ट्रः कस्याश्चन वैश्यस्त्रियां युयुत्सुः नामकाय पुत्राय जन्म अदात्।

'एकदा पाण्डुः माद्र्या सह रतिक्रीडे उत्सुके सति किन्दममहर्षेः शापबलात् मरणं प्राप। माद्र्यपि भर्तारमनुजगाम। दुःखिता कुन्ती तयोः संस्कारादिकं कारयामास। पुनः पञ्चपुत्राभ्यां सह स्वपुरीमागच्छत्। धृतराष्ट्रः तान् यथोचितं स्वीकृत्य पुत्रतुल्यं पोषयामास। धृतराष्ट्रः सर्वेषां (पाण्डवानां कौरवाणां च) उपनयनादिकं कारितवान्। युधिष्ठिरस्य स्वभावे जनाः सर्वे सन्तुष्टाः अभवन्। सुयोदनादयः तदसहमानाः अभवन्। भीमस्तु क्रीडाव्याजेन मध्ये मध्ये कौरवान् पीडितवान्। कौरवाणां मनसि पतितः आणिरिवाभूत् भीमः। अतः भीमं रहसि हन्तुं निश्चितवान् सुयोधनः क्रीडाव्याजेन तं गङ्गां नीत्वा विषमिश्रितमन्नं दत्वा मूर्च्छितं कारयामास। मूर्च्छितं भीमं सुदृढं बद्ध्वा नद्यां प्रक्षिप्तवान्। कृतकृत्यः इव स्वपुरी प्राप। पाण्डवाः सोदरं भीमम् अदृष्ट्वामात्रा सह दुःखिताः अभूवन्।

## पुनरावृत्तिः(Recap)

- देवव्रतः भीष्माचार्यः बभूव ।
- विचित्रवीर्यस्य मरणं, विदुरस्य जननम्।
- धृतराष्ट्रस्य भार्या गान्धारी, पाण्डोः भार्याद्वयं कुन्ती माद्री च आस्ताम्।
- किन्दममहर्षेः शापः।
- पाण्डोः पश्चात्तापः, धृतराष्ट्रः हस्तिनपुरस्य राजा बभूव।
- कुन्ती दुर्वाससमुनिपरिचरणवृत्तान्तं पाण्डवे निवेदयति।
- महर्षेः भाषणं मन्त्रदानं मन्त्रफलं, पाण्डवानां जननम्।
- एकोत्तरशतं धार्तराष्ट्राः समाजयन्त।
- पाण्डोः मरणम्, पाण्डवानां हस्तिनपुर्यागमनम्।
- धर्मपुत्रस्य स्वभावमहिमा।
- सुयोधनः भीमवधाय यतते।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. स्त्रीव्यतिकरनिमित्त एव तवापि मृत्युरस्तु - कस्येदं शापः ?
2. विचित्रवीर्यस्य माता का ?
3. कति धार्तराष्ट्राः ?
4. कः दाशकन्यां परिणीतवान्?
5. सा तु तत्समागमे हरिणीभूतेवाभवत् - का?
6. त्रिवर्गफलप्रसूतिः का?
7. धृतराष्ट्रस्य पुत्री का?
8. पाण्डोः भार्ये के?
9. कः अजातशत्रुरिति विख्यातः ?
10. इन्द्रप्रसादात् जातः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. युयुत्सुः कः ?
2. माद्री कदा ममार ?
3. जनाः शारद इव राकाचक्रे तस्मिन्ननुरागं चक्रुः - कस्मिन्?
4. 'तस्य निभृतवधोपायं चिन्तयन् सः' कः चिन्तयति ? कस्य वधोपायः ?
5. मात्रा सह विषीदन्तः विदुरेणाश्वासिता भृशमार्तिमभजन्त के ? कारणं किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. देवव्रतः कथं भीष्मः अभवत्?
2. पाण्डुः कुन्तीमाहूय रहसि किमुवाच?
3. कथं धार्तराष्ट्राणानुत्पत्तिः संजातम्?
4. किन्दममहर्षेः शापवृत्तान्तं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

प्रथमैककस्य कथासारं लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. किन्दमस्य।
2. सत्यवती।
3. एकोतरशतम्।
4. शान्तनुः।
5. अम्बालिका।
6. कुन्ती माद्री च।
7. भार्या।
8. युधिष्ठिरः।
9. अर्जुनः।

SGOU

| 10. दुश्शला। |
|---|

## सूचनाग्रन्थौ (References)


1. लक्ष्मणसूरिः, भातरसंग्रहः, व्याख्या-शङ्कररामशास्त्री, श्रीबालमनोरमा प्रस्, १९६१।
2. लक्ष्मणसूरिः, भारतसंग्रहः, श्रीचैतन्या अकादमी, कृष्ण, आन्ध्राप्रदेशः।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. लक्ष्मणसूरिः, भारतसंग्रहः, आदिपर्वः, कुप्पुस्वामि शास्त्रि रिसर्च इन्स्टिट्यूट्ट, चेन्नै, २०१७।
2. Lakshmanasuri. Bharata Sangraha-Adi parva, C Sankararama sastri, Kuppuswami Sastri Research Institute, Chennai 2017

# Unit - 2
# खण्डिकाः 12 - 15

## उद्देश्यानि (Learning Outcomes)

- इतिहासादीनां उद्बोधनम्।
- नूतनपदावलीं जानाति।
- आशयावगमनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

अयि पठितारः
लक्ष्मणसूरिणा रचितं भारतसंग्रहे प्रथमे एकके पञ्च पाण्डवानाम् एकोत्तरशतं कौरवाणां च उत्पत्तिः तथा भीमं प्रति दुर्योधनादीनां विरोधश्च सूचितम्। अतः सुयोधनः भीमवधाय यतते। तदनन्तरं किं संभूतमिति पश्यामः।

## मुख्यपदानि (Keywords)

वासुकिना - कवची - कुण्डली च - मातुलः शकुनिः - कृपाद्वेदान् - भारद्वाजो द्रोणः - विद्याविरोधिनि - निद्रालस्ये - सव्यासचीति प्रथितः।

## Discussion

**कुरुपाण्डवानाम् आयोधनाभ्यासः।**

**गद्यम्-१२**

**पातालतः भीमस्य प्रत्यागमनम्।**

भीमस्तु देहस्य गौरवेण स्रोतपथेन रसातलं प्रापितस्तत्र दंशद्भिर्नागैर्निवर्तितविषमूर्च्छः सपदि सुप्तोत्थित इवोपतिष्ठन् स्वमातामहस्य मातामहेन वासुकिनानुमतः कुण्डाष्टकगतान् दिव्यान् रसान् पीत्वा तत्रैव सुखं सुष्वाप। ततश्चाष्टमेऽहनि प्रबुद्धस्तत्परिजनैरूर्ध्वं नीतो रसपानोचितः नागायुतबलः स्वभवनं प्राप्य सर्वं मात्रादिभ्यो यथावृत्तमकथयत्। ततः प्रभृति ते सर्वेऽपि महोरगाक्रान्ता इव गृहे सर्वदा च सातङ्का एव न्यवसन्।

**व्याख्या - भीम इति।**

स्रोतसः पन्थाः स्रोतपथः, तेन स्रोतपथेन। नदीमार्गेण। दंशद्भिर्नागैः नागानां सर्पाणां दंशनैः। सुप्तोत्थितः पूर्वं सुप्तः पश्चात् उत्थितः। मातुः पिता मातामहः। कुण्डाष्टकगतान् अष्टेषु घटेषु वर्तमानान्। सुष्वाप स्वापमकरोत्। अहनि दिने। नीतः आनीतः।नागायुतबलः अयुतानां (दशसहस्राणां) गजानां बलयुक्तः। यथावृत्तं यथासम्भूतम्। महोरगाक्रान्तः महासर्पेण आक्रमितः। सातङ्काः दुःखेन सहिताः।

**संक्षिप्तः आशयः** - भीमः शरीरभारेण नदीमार्गेण पातालं प्राप। तत्र वर्तमानाः सर्पाः तं दंशितवन्तः। तदा शरीरस्थं विषं नष्टमभूत्। सः पूर्वं सुप्तः पश्चात् उत्थित इव स्वमातामहस्य मातामहं वासुकिं प्राप। तस्य वासुकेरनुमत्या अष्टेषु घटेषु वर्तमानान् दिव्यान् रसान् पपौ। ससुखं सुष्वाप। अष्टमे दिने उत्थाय वासुकेः परिजनैः सह गङ्गां प्राप्य अतीव बलशाली भूत्वा स्वभवनं प्राप। वृत्तान्तं सर्वं मात्रादिभ्यः कथितवान्। ततः प्रभृति महोरगेण आक्रमितः इव सर्वे दुःखेन अवसन्।

**गद्यम्-१३**

**सूर्यपुत्रस्य कर्णस्य वृत्तान्तः।**

अत्रान्तरे पूर्वं तु दुर्वाससो मन्त्रं परीक्षितुमाहूतेनादित्येन कुन्त्यां सद्य एवोत्पादितः कवची कुण्डली च कर्णो नाम, पुनरपि कन्यात्वं प्रापन्नयापि तया तदात्मनो दूषणं मन्यमानया मञ्जूषायां पिधाय जले प्रक्षिप्तो यदृच्छया स्नातुमागतेन सूतेन गृहीतो वसुषेण इति कृतनामधेयो वर्धमानः सन् कालेन प्राप्तयौवनो भूत्वा धार्तराष्ट्राणां परायणं बभूव। सः, सौबलो मातुलः शकुनिः, भ्राता दुश्शासनश्चेते त्रयो दुरात्मनो दुर्योधनस्य सर्वस्मिन्नपि समये दुर्नयबीजोपक्षेपहेतवो बभूवुः।

**व्याख्या - अत्रेति।**

तु तावत्। परीक्षितुमाहूतेनादित्येन परीक्षितुम् + आहूतेन + आदित्येन। आहूतेन आहूय आगतेन। कवची कवचमस्यास्तीति। उरःच्छदः कवचः। प्रपन्नयापि - प्रपन्नया + अपि। प्रपन्ना प्राप्ता। मञ्जूषा पेटिका। पिधाय अपिधाय। पिधानं कृत्वा। अपिधाय इत्यत्र 'वष्टि भागुरि....' इत्यादिना अकारस्य लोपः। स्नातुं स्नानाय। कृतं नामधेयं यस्मै सः कृतनामधेयः। नामकरणं कृत्वा। प्राप्तं यौवनं येन सः प्राप्तयौवनः। दुश्शासनश्चैते – दुश्शासनः + च + एते। दुर्नयबीजोपक्षेपहेतवः दुर्नयबीजस्य उपक्षेपे वितरणे हेतवः कारणानि।

**संक्षिप्तः आशयः** - पूर्वं दुर्वासमहर्षिणा दत्तं मन्त्रं परीक्षितुकामा कुन्ती आदित्यमाहूतवती। आदित्येन कुन्त्यां जातः पुत्रः भवति कर्णः। जन्मना सः कवची कुण्डली चावर्तत। कुन्त्यै कन्यात्वं लब्धम्। तथापि भाविनि दूषणं भवेदिति चिन्तया शिशुं कस्याश्चन मञ्जूषायां पिधाय नद्यां प्रक्षिप्ता। स्नातुमागतः सुतः तां पेटिकां गृहीत्वा

शिशुं वसुषेणः इति नामकरणं कृत्वा पोषितवान्। यदा सः युवा बभूव तदा धार्तराष्ट्राणां प्रियङ्करः बभूव। दुर्योधनस्य दुर्नयस्य कारणभूताः त्रयः जनाः सन्ति। ते कर्णः, दुर्योधनस्य मातुलः शकुनिः, भ्राता दुश्शासनश्च भवन्ति।

**गद्यम् - १४**

**कुरुपाण्डवानां वेदगुरुः कृपाचार्यः, धनुर्वेदाचार्यः द्रोणचार्यश्च।**

अथोभये च ते कुमाराः शारद्वतात्कृपाद्वेदानधीयानाः कदाचिदाक्रीडे क्रीडन्तः कस्मिंश्चिन्निरुदके दुरवतरे च कूपे पतितां वीडामाहर्तुमशक्नुवन्तो यदा पश्यन्ति, तदा यादृच्छिकः कश्चिद्ब्रह्मणस्तत्रैत्य 'भोः कुमाराः, पश्यत मे कौशलम्' इत्युक्त्वा तेषां समक्ष स्वां मुद्रां च तत्र प्रास्य, तद्वयं च लघुनैषिकास्त्रेणोद्दधार। ततो विस्मितैस्तैनिवेदितो भीष्मस्तमाहूय पृच्छंस्तेनोचे 'अहं नाम भारद्वाजो द्रोणः, तत्र भवतोऽग्निवेशस्य अन्तेवासी, भगवतो जामदग्न्यादधिगतनिखिलास्त्रशस्त्रकलापः, शारद्वतस्य कृपस्य भगिनीपतिश्चास्मि। सर्वशास्त्रेषु विशेषतो धनुर्वेदे पारदृश्वानं मामाहुः। सोऽहमिदानीं वृत्तिकामः आगतोऽस्मि इति। तेन तुष्टो शान्तनवो विशेषज्ञानार्थितया पौत्राणां तस्याचार्यकं दत्वा, सर्वानपि तांस्तस्मिन्नर्पयामास।

**व्याख्या - अथेति।**

कुमाराः कुरुपाण्डवकुमाराः। शरद्वतस्यापत्यं पुमान् शारद्वतः (कृपः)। अधीयानाः पठितवन्तः। आक्रोडे उद्याने। कस्मिंश्चिन्निरुदके - कस्मिंश्चित् + निरुदके। निरुदके जलाभावे। वीडा 'कुट्टि' इति केरल्याम्। मे मम। मुद्राम् अङ्गुलीयकम्। प्रास्य विमुच्य। इषिकास्त्रेण तृणास्त्रेण। उद्दधार उद्धृत्य गृहीतम्। विस्मितैः निवेदितः कर्मणिप्रयोगः। विस्मिताः ते निवेदितवन्तः कर्तरिप्रयोगः। पृच्छंस्तेनोचे पृच्छन् + तेन + ऊचे। भीष्मः तं ब्राह्मणमपृच्छत्। तदा सः ब्राह्मणः उवाच। भरद्वाजस्यापत्यं पुमान् भारद्वाजः। भरद्वाजपुत्रः द्रोणः। अन्तेवासी शिष्यः। जामदग्निः परशुरामः। पारदृश्वानं पण्डितम्। वृत्तिकामः प्रवृत्तिकामः। वृत्तिः कामं यस्य सः वृत्तिकामः। वृत्तिकामः इत्यत्र 'तुम्काममनसोरपि' इत्यनेन तुमुन्नन्तस्य मकारस्य लोपः स्यात्। पौत्रः पुत्रस्य पुत्रः। तांस्तस्मिन्नर्पयामास तान् + तस्मिन् + अर्पयामास ।

**संक्षिप्तः आशयः** - कुरुपाण्डवकुमारान् शरद्वतपुत्रः कृपाचार्यः वेदान् अध्यापयामास। एकदा उद्याने ते क्रीडन्तः आसन्। तदा क्रीडोपकरणमेकं जलरहिते दुरवतरे कूपे पपात। तमुपकरणं कुट्टीं ग्रहीतुं ते प्रयत्नमकुर्वन्। किन्तु न सफलमभूत्। तदा कश्चन ब्राह्मणः आगत्य मम कौशलं पश्यत इत्युक्त्वा स्वस्याङ्गुलीयकं कूपे प्रास्य तृणास्त्रैः क्रीडोपकरणमङ्गुलीयकं च कूपादुद्धृतवान्। सर्वे विस्मिताः अभूवन्। भीष्माचार्यः वृत्तान्तमिदं ज्ञात्वा भवान् कः इत्यपृच्छत्। स ब्राहमणः एवमवदत्। अहं भरद्वाजपुत्रः द्रोणः भवामि। अग्निवेशस्य शिष्यः,

कृपाचार्यस्य भगिनीपतिः च। परशुरामात् सर्वाः आयुधविद्याः पठितवान्। सर्वशास्त्रपारंगतः विशिष्य आयुधविद्यायाम् अग्रेसरः इति जनाः मां वदन्ति। एतत् श्रुत्वा भीष्माचार्यः द्रोणम् आचार्यपदव्यां स्थाप्य पौत्रान् आयुधाभ्यसनाय नियुक्तवान् ।

**गद्यम् - १५**

**कुरुपाण्डवानां आयुधाभ्यसनम्।**

तस्माद्गुरोरधीयन्नर्जुनः सर्वानपि सब्रह्मचारिणो मेधया प्रतिभया चातिशिश्ये। विद्याविरोधिनी निद्रालस्ये सर्वथापि विजित्य अहर्निशं शिक्षायामुत्सुकोऽभूत्। ततश्च तं गुडाकेशं वदन्ति। गुरुवद् गुरुपुत्रेऽश्वत्थाम्न्यपि वृत्तिं दधान ऐदंपर्येण तौ शुश्रूषते स्म। ततश्च समानवृत्तेरपि गुरोः कृपा कुलवधूरिवाव्यभिचारिणी तमेव शिश्रिये। गुरुणा अनुक्तमप्यर्थमूहेन निश्चिन्वन्स्वयमेव शिक्षमाणो दक्षिणेनेव सव्येन बाहुनाप्यस्त्रप्रयोगे लघुहस्ततामवाप। ततः सव्यसाचीति प्रथितोऽभूत्। एकदा गङ्गाजले ग्राहेण गृहीतं गुरुं झटिति मोचयंस्ततो ब्रह्मास्त्रं पारितोषिकं जग्राह। भीमस्तु पार्थेषु द्वितीयोऽपि गदायुद्धेऽद्वितीयो बभूव। अथ सदसि माणवकेषु स्वस्वशिक्षापाटवं दर्शयत्सु सव्यसाची स्वकौशलदर्शनेन सर्वानपि प्राश्निकान् विस्मापयामास। कर्णस्तु तदसहमानस्तेन यत्प्रयत्नकृतं तल्लाघवेन कुर्वन् पस्पर्धे। कथमराज्ञस्तव राजपुत्रेण सह सङ्घर्षः इति तमिधिक्षिपति भीमसेने, स्वपक्षधुर्यतया तस्मिन् कृतव्यपाश्रयो तं सूतपुत्रमङ्गराज्येऽभ्यषिञ्चत्।

**व्याख्या - तस्मादिति।**

सब्रह्मचारिणः सतीर्थ्याः। विजित्य जित्वा। गुडाकेशः निद्राजितः। गुरुपुत्रेऽश्वत्थाम्न्यपि गुरुपुत्रे + अश्वत्थाम्नि + अपि। द्रोणपुत्रः भवति अश्वत्थामा। वृत्तिं दधानः परिगणयन्। गुरौ भक्तिरिय गुरुपुत्रेऽपि भक्तिं प्रकटयन् अवर्तत। अव्यभिचारिणी स्खालित्यरहिता। निश्चिन्वन् चिन्तयन्। दक्षिणेनेव दक्षिणेन + इव। दक्षिणेन दक्षिणकरेण। सव्येन वामेन। लघुहस्तता कृतकृत्यता। सव्यसाची वामकरेणापि तिर्यक् अस्त्रप्रयोगपटुः। ग्राहः नक्रः। मोचयंस्ततः - मोचयन् + ततः। जग्राह गृहीतम्। ग्रह उपादाने-पर-लिट्-प्र पु-ए व। जग्राह - जगृहतुः - जगृहुः। पार्थेषु पाण्डवेषु। पृथायाः अपत्यं पुमान् पार्थः। माणवकेषु बालकेषु। प्राश्निकान् परीक्षकान्। पस्पर्ध स्पर्धां चकार, मत्सरितवान्। राजपुत्रेण सह इत्यत्र सह इत्यव्ययस्य योगे तृतीया। अधिक्षिपति भीमसेने सतिसप्तमीप्रयोगः। यदा भीमसेनः अधिक्षेपं चकार तदा। स्वपक्षधुर्यतया स्वपक्षस्य नेतृत्वं वहेदिति चिन्तया। अभ्यषिञ्चत् अभिषेकं चकार ।

**संक्षिप्तः आशयः -** कुरुपाण्डवान् द्रोणाचार्यः धनुविद्याम् अध्यापितवान्। तेषु अर्जुनः मेधया प्रतिभया च सर्वान् अतिशिश्ये। निद्राम् आलस्यं च विहाय अर्जुनः अहर्निशं धनुर्विद्यायामुत्सुकः अभूत्। गुरोः प्रियङ्करः बभूव। गुरुणा अनुक्तमपि कार्यम् ऊहेन निश्चिन्वन् आयुधविद्यायां नितरां प्रवीणः बभूव। सः सव्यसाची इत्यपरेण नाम्ना विख्यातो बभूव। एकदा स्नानाय गतं गुरुं कश्चन नक्रः गृहीतवान्। अर्जुनः नक्रात् गुरुं विमोच्य

गुरोः सकाशात् ब्रह्मास्त्रं पारितोषिकत्वेन स्वीकृतवान्। भीमः गदायुद्धे अद्वितीयः आसीत्। सदसि बालकानां शिक्षापाटवप्रदर्शनसमये अर्जुनः सर्वान् परीक्षकान् अद्भुतपरतन्त्रान् कारयामास। तदा कर्णः आगत्य अर्जुनेन कृतं युद्धपाटवम् अनायासेन कर्तुं तत्परः इति कथितवान्। तदा अराज्ञस्तव राजकुमारेण सङ्घर्षः कथम् इति भीमः कर्णं परिहसितवान्। एतच्छ्रुत्वा दुर्योधनः कर्णम् अङ्गराज्ये अभिषेकं कृतवान्।

### संक्षिप्तीकरणम्

विषमिश्रितभक्षणेन मूर्च्छितः भीमः नद्या नीयमानः पातालं प्राप। नागानां दंशनेन विनष्टविषमूर्च्छः सन् स्वमातामहस्य मातामहेन वासुकिना अनुमतः दिव्यान् रसान् पीत्वा सुखं सुष्वाप। अष्टमे दिने नागायुतबलः सन् स्वभवनं प्राप्य सर्वाणि कार्याणि मात्रादिभ्यो न्यवेदयत्।

अत्रान्तरे सूतेन पोषितः कर्णः कौरवपक्षसहायी बभूव। कर्णः, दुर्योधनस्य मातुलः शकुनिः, भ्राता दुश्शासनश्च दुर्योधनस्य दुराचरणस्य हेतुभूताः बभूवुः। एकदा यादृच्छिकरूपेण सम्प्राप्तं द्रोणाचार्यं भीष्मः कुरुपाण्डवानां धनुर्वेदाचार्यं कारितवान्। कृपाचार्यः कुरुपाण्डवानां वेदाचार्यः चाभवत्। धनुर्वेदे पारदृश्वा द्रोणाचार्यः सर्वान् कुमारान् धनुर्विद्यां समानरूपेण पाठितवान्, किन्तु अर्जुनः सर्वान् सतीर्थ्यान् मेधया प्रतिभया च अधिशिश्ये। अर्जुनः दिनरात्रं निद्राम् आलस्यम् च विहाय पठने उत्सुकोऽभवत्। सः गुडाकेशः, सव्यसाची इत्यादिभिः नामभिः विख्यातो बभूव ।

भीमः गदायुद्धे अद्वितीयः बभूव। सदसि बालकानां स्वस्वपाटवानां प्रदर्शनावसरे अर्जुनस्य पाटवप्रदर्शनं सर्वान् अद्भुतपरतन्त्रान् कारयामास। तदा अर्जुनेन सप्रयासं क्रियमाणा विद्या प्रयासं विना अहं करिष्यामि इत्युक्त्वा कर्णः सदसि आगतवान्। अराज्ञस्तव स्पर्धा राजकुमारेण कथं भवति इत्युक्त्वा भीमः कर्णं परिहसितवान्। तदा दुर्योधनः कर्णम् अङ्गराज्ये अभिषिक्तवान्।

## पुनरावृत्तिः (Recap)

- पातालतः भीमः अष्टमे दिने उत्थाय वासुकेः परिजनैः सह गङ्गां प्राप्य अतीव बलशाली भूत्वा स्वभवनं प्राप।
- सूर्यपुत्रस्य कर्णस्य जन्मवृत्तान्तम्।
- कुरुपाण्डवकुमारान् शरद्वतपुत्रः कृपाचार्यः वेदान् अध्यापयामास।
- भीष्माचार्यः द्रोणम् आचार्यपदव्यां स्थाप्य पौत्रान् आयुधाभ्यसनाय नियुक्तवान् ।
- कुरुपाण्डवान् द्रोणाचार्यः धनुविद्याम् अध्यापितवान्।
- तेषु अर्जुनः मेधया प्रतिभया च सर्वान् अतिशिश्ये।
- अर्जुनःगुरोः प्रियङ्करः बभूव।
- भीमः गदायुद्धे अद्वितीयः आसीत्।

- कर्णः अर्जुनेन कृतं युद्धपाटवम् अनायासेन कर्तुं तत्परः इति कथितवान्।
- भीमः कर्णं परिहसितवान्।
- दुर्योधनः कर्णम् अङ्गराज्ये अभिषेकं कृतवान्।

## वस्तुनिष्ठप्रश्नाः(Objective type questions)

1. भीमस्य मातामहस्य मातामहः कः?
2. पाण्डवेषु धनुर्वेदे नितरां प्रसिद्धः कः?
3. कर्णस्य बाल्यकाले वर्तमानं नामं किम्?
4. कथमराज्ञस्तव राजपुत्रेण सह सङ्घर्षः - कस्येदं वचनम्?
5. कः परशुरामात् अधिगतनिखिलास्त्रशास्त्रकलापः?
6. कः नक्रात् द्रोणं ररक्ष?
7. कुरुपाण्डवान् धनुर्विद्यां कः अध्यापितवान्?
8. पाण्डवानां कौरवाणां च वेदगुरुःकः?
9. पाण्डवेषु गदायुद्धे अद्वितीयःकः?
10. सव्यसाची कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

1. के दुर्योधनस्य दुर्नयस्य बीजहेतवः?
2. दुर्योधनः कर्णम् अङ्गराज्ये अभिषिक्तवान् - कथम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

1. पातालतः भीमस्य प्रत्यागमनम् वर्णयत।
2. कर्णस्य जन्मवृत्तान्तः।

## निर्दिष्टाभ्यासः (Assignments)

द्रोणाचर्यमधिकृत्य लिखत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. वासुकिः।
2. अर्जुनः।
3. वसुषेणः।
4. भीमसेनस्य।
5. द्रोणाचार्यः।
6. अर्जुनः।
7. द्रोणाचार्यः।
8. कृपाचार्यः।
9. भीमसेनः।
10. अर्जुनः।

## सूचनाग्रन्थौ (References)


1. लक्ष्मणसूरिः, भातरसंग्रहः, व्याख्या-शङ्कररामशास्त्री, श्रीबालमनोरमा प्रस्, १९६१।
2. लक्ष्मणसूरिः, भारतसंग्रहः, श्रीचैतन्या अकादमी, कृष्ण, आन्ध्राप्रदेशः।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. लक्ष्मणसूरिः, भारतसंग्रहः, आदिपर्वः, कुप्पुस्वामि शास्त्रि रिसर्च इन्स्टिट्यूट्ट, चेन्नै, २०१७।
2. Lakshmanasuri. Bharata Sangraha-Adi parva, C Sankararama sastri, Kuppuswami Sastri Research Institute, Chennai 2017

# Unit - 3
# खण्डिकाः 16 - 27

## उद्देश्यानि (Learning Outcomes)

- लक्ष्मणसूरेः वर्णनापाटवं अवगच्छति।
- इतिहासादिनां अवगमनम्।
- नूतनपदावलीं जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

लक्ष्मणसूरिणा रचितं भारतसंग्रहे पञ्च पाण्डवानाम् एकोत्तरशतं कौरवाणां च उत्पत्तिः तथा भीमं प्रति दुर्योधनादीनां विरोधश्च वर्णितम्। अतः सुयोधनः भीमवधाय यतते। पातालतः भीमः अतीव बलशाली भूत्वा स्वभवनं प्राप। कुरुपाण्डवान् द्रोणाचार्यः धनुर्विद्याम् अध्यापितवान्। अर्जुनभीमौआयुधविद्यायां नितरां प्रवीणौ बभूवतुः। दुर्योधनः कर्णम् अङ्गराज्ये अभिषिक्तवान्। तदनन्तरं किं संभूतमिति पश्यामः।

## मुख्यपदानि (Keywords)

अहमहमिकया - अवङ्मुखं - जिष्णुः - जलस्थलरमणीयकविशिष्टं - ससान्त्वं - मशकाक्रान्तं - क्षत्रा - सुरङ्गां-तद्गृहमग्निसात्कृतं दृष्ट्वा - पुष्पमालाधारिण - पशुमारं मारितः - ब्राह्मणब्रह्मचारिवेषेण - दौभाग्यविलसित श्रवणेन - परस्वभूतां - याजयाजकः - इन्दीवरसवर्णवर्णं - आग्नेयास्त्रेण - स्कन्धावारे

## Discussion

**कुरुपाण्डववैरं, पुरोचननिर्मितस्य जतुगृहदाहः, पाण्डवाः प्रच्छन्नवेषधारिणःभूत्वा द्रुपदराजधानीवासः।**

**गद्यम् - १६**

**द्रोणाचार्यस्य गुरुदक्षिणा।**

अथ प्राप्तेऽवसरे भरताचार्यः सर्वानेव शिष्यांचोदयामास - वत्साः साङ्गे सरहस्ये धनुर्वेदमधीतिनां भवतां गुर्वर्थकाल उपस्थितः। स च पाञ्चालानां राज्ञो जीवग्राहं गृहीत्वात्रानयनेन भवति इति। तच्छ्रुत्वा तथेत्यहमहमिकया संप्रस्थिताः धार्तराष्ट्राः पथि विलम्बितान् पाण्डवान् कर्णावष्टम्भेनानादृत्य महता बलेन

द्रुपदपुरीं रुन्धन्तस्तस्य पार्षतस्य प्रभुत्वं सोढुमशक्ताः सर्वतः कान्दिशीकतां गुरुदक्षिणयामासुः। भग्नेषु च तेषु, भीमेन सहार्जुनः शत्रोः सैन्यं प्रमथ्य, तं च संयम्य गुरोः सकाशं निनाय।

**व्याख्या - अथेति ।**

भारताचार्यः द्रोणाचार्यः। चोदयामास प्रेरयामास। तथेत्यहमहमिकया तथा + इति + अहमहमिकया। अहमहमिकया अहं पूर्वः अहं पूर्वः इति भावेन। विलम्बितान् मन्दगत्या आगतान्। अवष्टम्भः गर्वः। अनादृत्य अनादरं कृत्वा (परिहस्य)। संयम्य सम्यक् बन्धनं कृत्वा ।

**संक्षिप्तः आशयः** - धनुर्विद्याम् अभ्यस्तानां कुरुपाण्डकुमाराणां पुरतः योग्ये अवसरे द्रोणः एवं प्रचोदितवान्। "हे वत्साः, युष्माभिः धनुर्विद्या सुष्ठु पठिता। इदानीं गुरुदक्षिणां दीयन्ताम्। पाञ्चालराजां द्रुपदं सजीवं बद्ध्वा अत्रानयन्तु इति। तद् श्रुत्वा दुर्योदनादयः कौरवाः अहमहमिकया द्रुपदपुरी प्राप्य द्रुपदस्य प्रतापं सोढुमशक्ताः भूत्वा जीवरक्षार्थ पलायिताः। अर्जुनः, भीमेन सह द्रुपदसैन्यं जित्वा, राजानं बद्ध्वा गुरोः पुरतः गुरुदक्षिणां समर्पितवान् ।

**गद्यम् - १७**

**सुहृद्वत्सलः द्रोणः उत्तरपाञ्चालदेशेन द्रुपदं मोचयामास।**

सुहृद्वत्सलः सोऽपि तथाविधमवाङ्मुखं तं विलोक्याह - ननु राजन् यज्ञसेन, सहाध्यायिनाप्यराज्ञा मया तव सख्यं नाभिरुचितं किल। तदविच्छेदकामेनैव मयैवं यतितं न तु राज्यलोभेन। अत उत्तराः पाञ्चालाः मया पर्याप्ताः। दक्षिणांस्तु त्वमेव प्रतिपद्यस्व। अभ्युपपद्यस्वाधुनापि मम मैत्रीम् इत्युक्त्वा तमर्धराज्येन मोचयामास। ततः प्रभृति पार्थः विजयः जिष्णुः इति च प्रख्यातः।

**व्याख्या - सुहृदिति।**

अवाङ्मुखं किमपि अभाषन् अधोमुखः वर्तमानम्। सहाध्यायिना सहपाठिना। सहाध्यायिनाप्यराज्ञा सहाध्यायिना + अपि + अराज्ञा। नाभिरुचितं नाभिलषितम्। तदविच्छेदकामेन तत्सौहार्दं विघटयितुं तात्पर्यरहितेन। उत्तराः पाञ्चालाः पाञ्चालदेशस्योत्तरभागाः। प्रतिपद्यस्व स्वीक्रियस्व।

**संक्षिप्तः आशयः** - सुहृद्वत्सलः द्रोणः अधोमुखं द्रुपदमेवमवदत्। हे राजन्, आवां सहपाठिनौ किल? राजा त्वं अराज्ञा सह मैत्री न वाञ्छति इत्यतः तव मैत्रीमभिलषन् एव एतादृशं कर्म कृतवान्। न तु राज्यलोभेन। अतः उत्तराः पाञ्चालाः मम पर्याप्ताः। दक्षिणाः पाञ्चालाः भवता स्वीक्रियताम् इति। ततः प्रभृति अर्जुनः विजयः जिष्णुः इति नामद्वयमपि प्राप्तवान्।

**गद्यम् - १८**

**वारणावतं गन्तुं धृतराष्ट्रः अजातशत्रुमुपदिदेश।**

अनन्तरं यौवराज्याभिषिक्ते युधिष्ठिरे, तस्मिन्प्रजानामनुरागेण भीमार्जुनयोर्विक्रमेण चोद्विग्नो दुरात्मा दुर्योधनस्तेषां वधोपायं रहसि मन्त्रयित्वा, तदर्थं पितरं चोदयामास। पूर्वमेव कणिकोपदेशेन बहिरिवान्तरप्यन्धीभूतः सोऽन्धो राजा युवराजमजातशत्रुमुपदिदेश "वत्स, वारणावताख्यं स्थानं जलस्थलरमणीयकविशिष्टं श्रूयते। तत्राथ पशुपतेरुत्सवो वर्तते। तत्रैव सुहृद्भिः सह किञ्चित्कालं विहृत्य पश्चादिहागच्छ" इति। निपुणमतिः स युधिष्ठिरः तस्य हृदयमवगत्यापि गुरुप्रतिपत्या तथेत्यभ्युपैति स्म।

**व्याख्या - अनन्तरमिति।**

उद्विग्नः व्याकुलः। कणिकोपदेशेन कणिकस्य उपदेशेन। अनन्धम् अन्धं सम्पद्यमानं भूय अनन्धीभूय। जलस्थलरमणीयकविशिष्टं जलेन स्थलेन च मनोहरं विशिष्टं च। उत्सवः महः। सुहृद्भिः सह मित्रैः साकम्। सुहृद्भिः सह इत्यत्र सह इत्यस्य योगे तृतीया। विहृत्य विहारं कृत्वा। अवगत्य ज्ञात्वा।

**संक्षिप्तः आशयः** - अजातशत्रुः युवराजः बभूव। प्रजाः तं नितरां स्निह्यन्ति स्म। भीमार्जुनौ पराक्रमशालिनौ। युधिष्ठिरस्य जनप्रीतिं भीमार्जुनयोः पराक्रमत्वं च दुर्योधनः नेच्छति। पाण्डवानां रहसि वधोपायं चिन्तयन् दुर्योधनः स्वपितरं धृतराष्ट्रं प्रेरित्तवान्। जन्मना अन्धः धृतराष्ट्रः पुत्रस्य दुरुपदेशेन कणिकस्योपदेशेन च मनसाप्यन्धः बभूव। सः वारणावताख्यं नगरं गन्तुं सुहृद्भिः सह किञ्चित्कालं वासाय अजातशत्रुमुपदिदेश। निपुणमतिः युधिष्ठिरः तस्याज्ञां ज्ञात्वापि तथेति अङ्गीचकार।

**गद्यम् - १९**

**दुर्योधनस्य पुरोचनेन सह आलोचना।**

तेन तुष्टः स दुष्टो धार्तराष्ट्रः कञ्चित्पुरुषं रहसि ससान्त्वमिदमभाषत 'सखे पुरोचन, यथा बहवो भ्रमराः संहत्यैके क्षौद्रपटलं निर्वर्तयन्ति, यथाकालमनुभवन्ति च, यथा तद्राजस्तु नाममात्रेण विशिष्टः, एवं प्रणिधानचतुरैर्बहुभिः प्रणिधिभिर्नियन्त्रितं हि राज्यम्। राज्ञस्तु परिच्छद एव विशेषः। तस्मान्मम यद्वसु तद्भवतामेवेति तु पुनरुक्तिरियम्। किन्तु सपत्नसङ्कुलमिदं मशकाक्रान्तं शयनमिव न मां सुखयति। अतस्तनिःसरणे भवता साहाय्येन भाव्यम्। इत्युक्त्वा कर्तव्यं चोपदिश्य सबहुमानं विससर्ज। स च खलस्तथेति वारणावतं गत्वा यथावत्सर्वमनुष्ठाय पाण्डवागमनं प्रतिपालयति स्म।

**व्याख्या - तेनेति ।**

धार्तराष्ट्रः धृतराष्ट्रपुत्रः दुर्योधनः। ससान्त्वम् अनुनयपूर्वम्। संहत्यैकम् संहत्य + एकम्। संहत्य एकीभूय। क्षौद्रपटलं भ्रमरभवनम्। निर्वर्तयन्ति कुर्वन्ति। तद्राजस्तु तद्राजः + तु। प्रणिधानचतुरैः गूढवृत्तौ (चारवृत्तौ) समर्थैः। प्रणिधिभिः चारैः। परिच्छदः परिवारः। पुनरुक्तिः पुनरपि कथनम् (अनावश्यकथनम्)। सपत्नसङ्कुलं शत्रुव्याप्तम्। निःसरणे दूरीकरणे। बहुमानेन सह वर्तते इति सबहुमानम्। खलः दुष्टः। यथावत् यथोचितम्। प्रतिपालयति स्म प्रत्यपालयत्। प्रतिपालयति स्म इत्यत्र स्म इत्यस्य योगे लट्।

**संक्षिप्तः आशयः -** पाण्डवाः वारणावतं गमिष्यन्ति इति विचार्य दुर्योधनः पुरोचनमाहूय रहसि एवमवदत्। हे मित्र, भ्रमराः संहत्य स्वभवनं निर्मीय, तत्र ससुखं जीवन्ति। राज्यं चतुरैः चारैः नियन्त्रितम्। यद्वसु ममास्ति तद्वसु भवतामेवेति कथनस्यावश्यकता नास्ति। राज्ञः केवलं परिच्छेदः अधिकतया अस्ति इति विशेषमेव, नान्यत्। किन्तु इदं राज्यं मशकाक्रान्तं शयनमिव शत्रुसङ्कुलमेव इति। अतः किं करणीयमित्युपदिदेश। सः पुरोचनः वारणावतं गत्वा दुर्योधनोक्तवत् कृत्वा पाण्डवानामागमनं प्रतीक्ष्य अवर्तत।

**गद्यम् - २०**

**पाण्डवानां जतुगृहे ईषत्कालं वासः, जतुगृहदाहश्च।**

युधिष्ठिरस्तु तथेत्यात्मना षष्ठः प्रतिष्ठमानः सूक्ष्मज्ञेन क्षत्रा महत्यां जनतायां म्लेच्छभाषया बोधितस्तमर्थं बाढमित्युक्त्वा गच्छन्विविक्ते मात्रे व्याचचक्षे 'अम्ब, तत्र युष्मद्वासगृहं शत्रुप्रयुक्तेन पुरुषेण धक्ष्यते, तदर्थं वर्मान्तरं विधस्व। मृगयाव्याजेन बाहीकान् प्रदेशांश्च नित्यं परिचिनु। दाहकाले तेन पथा निष्क्रम्य पालायस्वेति विदुरेणोक्तम्' इति वदन्नेव वारणावतं गतवान्। गच्छंश्च स तेनाभिगम्याप्तवत्स्वजनवत् भृत्यवच्चोपचरता भवदर्थं महाराजेन निर्मितमिदम् अभिनवं निवेशनं, तदत्रैव सुखं वसत। अहं भवतां साह्याय नियुक्तः इति वदता पुरोचनहतकेन दर्शितं जातुषमाग्नेयैर्द्रव्यैरन्तराचितं च गृहं प्रविश्य, सर्वं यथावन्निश्चिन्वन् धर्मपुत्रो भीमादिभ्यस्सर्वमुपपाद्य, साशङ्कोऽपि बहिरतिविस्रम्भवानिव भावयन्नवर्तत। विदुरस्तु स्वभृत्येन गूढप्रयुक्तेनान्यैरविदितमेव सुरङ्गां निर्मापयामास। तथा तत्र किञ्चित्कालमुषितैस्तैर्जातुचित्केनचिदपदेशेन ब्राह्मणादिषु भोजितेषु पञ्चपुत्रा कापि निषादी सुरां पीत्वा तत्रैव पुत्रैः सह सुष्वाप। अथ निशीथसमये तं पापं पुरोचनं गाढप्रसुप्तमाज्ञाय ते तज्जतुगृहं सर्वतोऽग्निनोद्दीप्य तेन बिलमार्गेणापसृत्य भागीरथ्यास्तीरमासाद्य, तत्र विदुरसज्जीकृतया नावा तामुत्तीर्य सुदूरमपसरन्ति स्म।

**व्याख्या - युधिष्ठिर इति।**

आत्मना षष्ठः आहत्य षट्जनाः। प्रतिष्ठमानः प्रस्थानं कुर्वतः। क्षत्रा क्षमाशीलेन विदुरेण म्लेच्छभाषया अपभ्रंशभाषया। बाढं साधु। विविक्ते एकान्ते। धक्ष्यते दाहयिष्यते। विधस्व निर्मायस्व। बाहिकान् बहिर्भवान्। परिचिनु परिचयं प्राप्नोतु। पथा मार्गेण। विदुरेणोक्तम् कर्मणिप्रयोगः। विदुरः उवाच कर्तरिप्रयोगः। गच्छन् सः तेनाभिगम्य यात्रां कुर्वन् सः (युधिष्ठिरः) तेन (पुरोचनेन) प्राप्य। आप्तवत् मित्रमिव। उपचरता आचरता। अभिनवं नूतनम्। वसत यूयं वसत। साह्याय सहायार्थम्। पुरोचनहतकेन वञ्चकेन पुरोचनेन। जातुषं जतुनिर्मितम्। आरचितं निर्मितम्। निश्चिन्वन् चिन्तयन्। उपपाद्य विशदीकृत्य। अतिविखम्भवान् अतिविश्वस्तः। गूढप्रयुक्तेन गूढतया नियुक्तेन। सुरङ्गा बहिर्गमनमार्गः। उषितैः वासं कृतैः। जातुचित् एकदा। अपदेशेन केनापि कारणेन। निषादी निषादस्त्री। गाढप्रसुप्तं गाढतया तीव्रतया स्वापं कृतम्। तज्जतुगृहं तत् + जतुगृहम्। उद्दीप्य उद्दीपनं कृत्वा। अपसृत्य अपसरणं कृत्वा। आसाद्य प्राप्य। नावा नौकया। अपसरन्ति स्म अपासरन्।

**संक्षिप्तः आशयः -** धृतराष्ट्रस्य इच्छानुसारं धर्मपुत्रः सौदरैः मात्रा च सह वारणावतगमनवेलायां म्लेच्छभाषया विदुरः उपदिदेश। एकान्ते धर्मपुत्रः तत्कार्यम् एवं प्रकाशितवान्। यत् शत्रुप्रयुक्तेन पुरुषेण निर्मितं वासगृहं दाहयिष्यति। अतः मार्गान्तरं रचय। मृगयाव्याजेन बाह्यान् प्रदेशान् परिचिनु। दाहकाले तेन मार्गेण रक्षां प्रापयतु इति। वारणावतं प्राप्तान् तान् पुरोचनः मित्रवत् बन्धुवत् भृत्यवत् च स्वीकृतवान्। किन्तु पाण्डवाः इदं जातुगृहं आग्नेयैः द्रव्यैः रचितमिति मत्वा आशङ्काकुलाः सन्त्यपि बहिः विश्वस्तवन्तः इवावर्तन्त। विदुरः स्वभृत्येन गूढं काञ्चन सुरङ्गां निर्मापयामास। एकदा पञ्चपुत्रा कापि निषादी सुरां पीत्वा अस्मिन् जतुगृहे सुष्वाप। पुरोचनोऽपि गाढनिद्रायां यदा अवर्तत तदा पाण्डवाः जातुगृहं अग्निना उद्दीप्य बिलमार्गेण रक्षां प्रापुः। ते गङ्गायाः तीरं प्राप्य विदुरेण सज्जीकृतां नौकामारूह्य सुदूरमपासरन्।

**गद्यम् - २१**

**पाण्डवाः मात्रा सह व्यापादिताः इति विचार्य दुर्योधनः जहर्ष।**

नागरास्तु तद्गृहमग्निसात्कृतं दृष्ट्वा तत्र पुरोचनेन सह षडपरान् दग्धान् उपलभ्य, पाण्डवान्मात्रा सह व्यापादितान्मत्वा चुक्रुशुः। मन्दात्मा दुर्योधनस्तत्तथ्यं मन्वानो मनोरथस्य परां काष्ठामारूढः इव जहर्ष।

**व्याख्या - नागरा इति।**

अग्निसात्कृतम् अग्निना दग्धम्। व्यापादिताः मृताः। चक्रुशुः विललापुः। तथ्यं याथार्थ्यम्। काष्ठाम् अवस्थाम्। जहर्ष सन्तोषयामास।

**संक्षिप्तः आशयः** नगरवासिनः तद् गृहम् अग्निना दग्धं दृष्ट्वा पाण्डवाः मात्रा च पुरोचनेन साकं मृता इति मत्वा विललापुः। मन्दबुद्धिः दुर्योधनः पाण्डवाः मृताः इति विचार्य सन्तोषितवान्।

**गद्यम् - २२**

**भीमः इतरान् बहुदूरं नीत्वा तान् शाययन् ररक्ष।**

अथ वृकोदरः निद्रया श्रान्त्या चावसन्नगतीन्पञ्चापि स्वगात्रेणादाय पुष्पमालाधारीवाविश्रान्त एवातिदूरमध्वानं शीघ्रं प्रधाव्य, कस्यचिद्वटवृक्षस्य तले तान्सुखं शाययन् स्वयं जागरां बभूव।

**व्याख्या अथ इति।**

श्रान्त्या क्षीणेन। अवसन्नगतीन् चलितुमप्यशक्तान् पुष्पमालाधारी पुष्पमालां धरन् इव। प्रधाव्य प्रकर्षेण धावनं कृत्वा। जागराम्बभूव जाग्रतया अवर्तत।

**संक्षिप्तः आशयः -** निद्रया क्षीणेन च चलितुमप्यशक्तान् धर्मपुत्रादीन् भीमः निस्सारतया शरीरे धारयन् सुदूरं प्रधाव्य कस्यचिद् वटवृक्षस्य तले सुखं शाययित्वा संरक्षकरूपेण स्वापं विना अवर्तत।

**गद्यम् - २३**

**हिडिम्बायाःआगमनं, घटोत्कचोत्पत्तिश्च।**

अत्रान्तरे हिडिम्बा नाम राक्षसी सनाम्ना भ्रात्रा तत्प्रमापणाय प्रेषिता भीमस्य रूपेण तस्मिन् कामुकी सती सौम्येन वेषेणैत्य तस्मिन् स्वाशयं प्रकटयामास। तावत्स निशाचरः स्वयमेव द्रुतमभिपत्य भीमेन सह युद्ध्वा तेन पशुमारं मारितः। सा तु तच्छब्देन प्रबुद्धान् युधिष्ठिरादीन् प्रणिपातपूर्वमभ्यर्थ्य तदनुमत्या वृकोदरं पतिं लब्ध्वा सद्य एव घटोत्कचाख्यं पुत्रमलभत। जातमात्रः सः प्राप्तयौवनो हैडिम्बेयः पितॄन् प्रणम्य कृत्योपस्थानीयतसंविदा मात्रा सह प्रयातवान्।

**व्याख्या -** अत्रेति ।

सनाम्ना भ्रात्रा हिडिम्बनामधेयेन सोदरेण। तत्प्रमापणाय तेषां वधाय। एत्य प्राप्य। पशुमारं पशुतुल्यम् । प्रणिपातपूर्वं सबहुमानम्। अभ्यर्थ्य अभ्यर्थनां कृत्वा। जातमात्रः जननसमये एव। कृत्योपस्थानीयत्वसंविदा कृत्यकरणाय योग्यसमये अत्र आगमिष्यामीति प्रतिज्ञया।

**संक्षिप्तः आशयः -** अस्यां वेलायां हिडिम्बेन राक्षसेन प्रेरिता स्वसोदरी हिडिम्बा पाण्डववधाय आगता। सा भीमे आकृष्टा सती सौम्यवेषेण तस्याः प्रेम भीमाय न्यवेदयत्। तदा सः राक्षसः हिडिम्बः कुपितः सन् भीमेन युयुधे। युद्धे भीमः तं पशुमारं जघान। शब्दकोलाहलेन इतरे प्रबुद्धाः। तेषां पुरतः हिडिम्बा तान् सबहुमानं नमस्कृत्य भीमं वरं ययाचे। तेषामनुवादेन वृकोदरः हिडिम्बां पाणिग्रहणम् अकरोत्। तयोः घटोत्कचः नाम पुत्रः जातः। जातमात्रः सः युवा भूत्वा पितॄन् यथावसरम् आगमिष्यामीति प्रतिज्ञां कृत्वा मात्रा सह गतवान्।

**गद्यम् - २४**

**पाण्डवानाम् एकचक्रनगरे वासः।**

ततः प्रस्थितास्ते पथि समागतेन भगवता बादरायणेन कृताश्वासा ब्राह्मणब्रह्मचारिवेषेणैकचक्राख्यं नगरं प्रविश्य, तत्र कस्यचिद्विप्रस्य गृहे कृतनिवेशना भैक्षेण वृत्तिं कुर्वाणः कश्चित्कालं गमयामासुः।

**व्याख्या - तत इति।**

बादरायणः व्यासः। विप्रस्य ब्राह्मणस्य। कृतनिवेशनाः वासं कुर्वन्तः। भैक्षेण भिक्षावृत्या ।

**संक्षिप्तः आशयः -** पुनरपि यात्रां कुर्वन्तः पाण्डवाः मार्गमध्ये भगवन्तं व्यासम् अपश्यन्। व्यासः तान् आश्वासितवान्। ते ब्राह्मणब्रह्मचारिरूपैः एकचक्राख्यं नगरं प्रापुः। तत्र एकस्य विप्रस्य भवने वसन्तः भैक्षेण जीवितवृत्तिं चक्रुः।

**गद्यम् - २५**

**बकवधः।**

एकदा पूर्वरात्रेऽन्तगृहे जायापत्योः परिदेवितमाकर्ण्य सम्भ्रान्ता कुन्ती सरभसमेत्य तस्य निदानमपृच्छत्। सः द्विजः प्राह 'अयि किमनेन मम दौर्भाग्यविलसितश्रमणेन। न ह्यशक्यप्रतीकारेऽत्र अत्र भवत्या अन्तरमुपपद्यते। तदलमाग्रहेण। अथ यदि मन्यसे स्त्रीचपलाच्छ्रोतव्यमेव, तर्हि सज्जा भव कुलिशप्रहारं कुसुमाञ्जलिना धर्तुम्। अस्य पुरस्य नातिदूरे बकनामा कश्चिन्मृत्युः प्रतिवसति। सर्वोच्छेदोद्यतं तं पौराः समयेनानुनीय प्रतिदिनमेकैकपुरुषबलिना महतान्नराशिना च नियमेनाराधयन्ति। श्वस्तावत्स वारो मम गृहे प्रत्युपस्थितः। तस्मै कथमिमां परस्वभूतां दारिकां शारिकामिव क्रव्यादायार्पयन्न्यासावलोपेनात्मानं मोचयेयम्। कथं वेमं पित्र्यमंशं कुमारं परिहाप्य अनिर्यातितर्ण इवाधर्मणः पुनरप्यात्मानं निरयमहार्णवे निमज्जयेयम्। कथं वा त्रिवर्गसाम्राज्यलक्ष्मीमिमां जायामुपहारयन्कृतघ्नः स्याम्। आत्मापहारे च निरालम्बस्यास्य जनस्य कर्णधारध्वंस इव नावाश्रयस्य, का गतिरिति मुहुर्मुहुश्चिन्तयतोऽपि मम न प्रतिपत्तिर्जायते इत्युक्त्वा विललाप। सा पुनस्तदाकर्ण्य दयार्द्रभावा तत्र चिरनिवासाय निष्कृतिं चिकीर्षुर्हिडिम्बे दृष्टवीर्येण सुनुना तद्दुःखमपाकरिष्यन्ती तमिदमभिदधे 'भोः ब्रह्मन्, अलं सन्तापेन। अहं हि मम पुत्रेष्वन्यतमेन तवार्थं साधयितुमिच्छामि। न च तवैव स्वभूतोऽयमर्थः। सामुदायिके ह्यर्थे सर्वेऽप्यंशिनः। मा च ते पुत्रस्य तेन पापमाशिङ्किष्ठाः। सर्वं हीदमधुना मृत्युभयान्मोक्ष्यसे। तद्विस्रब्धो भव' इति समाश्वास्य ज्येष्ठपुत्रानुमत्या कल्यमेव वृकोदरं बकवनाय प्राहिणोत्। स च महतोत्साहेन गत्वा द्वन्द्वयुद्धे तमिक्षुकाण्डभञ्जं भङ्क्त्वा गोपुरद्वारि प्रास्य, जनैरलक्षित एवागत्य, सर्वं यथावृत्तं मात्रे न्यवेदयत्। ततः प्रभृति स देशो निरातङ्को बभूव।

**व्याख्या - एकदेति।**

परिदेवितं दीनरोदनम्। सरभसं सहसा। द्विजः ब्राह्मणः। दौर्भाग्यविलसितश्रवणेन दौर्भाग्याधिकस्य श्रवणेन। अन्तरं भेदः। आग्रहेण अलम् - अत्याग्रहेण प्रयोजनं न। निषेधार्थकस्य अलम् इत्यस्य योगे तृतीया। स्त्रीचापलाच्छ्रोतव्यमेव स्त्रीचापलात् + श्रोतव्यमेव। श्रोतुं योग्यं श्रोतव्यम्। कुलिशं वज्रायुधम्। धतुं धारयितुम्। कश्चिन्मृत्युः कश्चित् + मृत्युः। मृत्युः कालः । सर्वोच्छेदोद्यते - सर्वानपि विनाशयितुम् उद्युक्ते तस्मिन् । समयेन निर्देशानुसारेण। नियमेन क्रमानुसारम्। प्रत्युपस्थितः सम्प्राप्तः। परस्वं अन्यस्य स्वम्। स्वं धनम्। दारिका पुत्री। शारिका शुका। क्रव्यादः राक्षसः। क्रव्यादायादर्पन्न्यासावलेपे - क्रव्यादाय + अर्पयन् + न्यासावलेपे। न्यासः गृहीतस्य धनस्य परिरक्षणम्। अवलेपः दूषणम्। परिहाय्य त्यक्त्वा। अनियांतितर्णः गृहीतमृणं प्रत्यर्पयितुमसाध्यः पुरुषः। अधर्मणः ऋणस्वीकर्ता। निरयमहार्णवे नरकसमुद्रे। त्रिवर्गसाम्राज्यलक्ष्मी धर्मार्थकामरूपत्रिवर्गस्य साम्राज्यस्य ऐश्वर्यवती। उपहारयन् उपहाररूपेण अर्पयन्। कृतघ्नः नृशंसः। कर्णधारः नाविकः। प्रतिपत्तिः प्रतिविधिः। चिरवासाय चिरमवसत् इत्यतः। निष्कृतिं प्रत्युपकारम्। अभिदधे उवाच। सन्तापेन दुःखेन। साधयितुं कारयितुम्। अंशिनः भागभाजः। मा आशङ्किष्ठाः आशङ्का न कार्या। विस्रब्धः समाधानचित्तेन भव। कल्यं समर्थम्। इक्षुकाण्डभञ्जम् इक्षुकाण्डस्य भञ्जनमिव। भङ्क्त्वा भञ्जनं कृत्वा। प्रास्य लम्बमानेन कृत्वा। निरातङ्कः दुःखविमुक्तः ।

**संक्षिप्तः आशयः -** एकदा सन्ध्यानन्तरं गृहात् दम्पत्योः दीनरोदनं कुन्ती शुश्राव। कारणं किमिति पृच्छन्तीं कुन्तीं सः ब्राह्मणः एवमवदत् 'अयि मम दौर्भाग्यश्रवणेन किं प्रयोजनम्? तथापि श्रोतुं तत्परा चेत् वदामि इत्युक्त्वा बकवृत्तान्तं सूचितवान्। अस्य पुरस्य नातिदूरे बकः वसति। सर्वान् नाशयितुमुद्युक्तं तं पौराः समयेनानुनीय प्रतिदिनम् एकैकपुरुषबलिना महतान्नराशिना च आराधयन्ति। श्वः मम भवनादेकः गन्तव्यः। कथं पुत्री नेष्यति? कथं पुत्रं नेष्यति? कथं वा जायां नेष्यति? आत्मत्यागे नाविकरहितः नौरिव गतिः भविष्यति। कि कर्तव्यं मया?' इति। एतदाकर्ण्य कुन्ती अवदत् भो ब्रह्मन्, अलं सन्तापेन। अहं पुत्रेषु अन्यतमेन तव कार्यं साधयितुमिच्छामि। तवैव अयं कार्यः ममापि। सामूहिके कार्ये सर्वे भागभाजः भवन्तु। मम पुत्रः तं दुष्टं हनिष्यति। मा तत्र भयाशङ्का इत्युक्त्वा तं समाश्वासितवती। धर्मपुत्रस्यानुवादेन कुन्ती भीमसेनं परेद्युः बकवधाय प्रेषितवती। भीमस्तु महता उत्साहेन गत्वा द्वन्द्वयुद्धे तं हत्वा गोपुरद्वारे निक्षिप्य जनैरलक्षितः सन् मात्रे सर्व वृत्तान्तं न्यवेदयत्। ततः प्रभृति स देशः भयमुक्तः बभूव ।

**गद्यम् - २६**

**ब्राह्मणः पाण्डवानां पुरतः द्रौपदीमधिकृत्य सूचयति।**

अथ कतिपयेऽवसरे यदृच्छयागतः कश्चिद्विप्रः पाण्डवैः सह नानाकथाः संकथयन्प्रसङ्गादिदमुवाच 'द्रुपदो नाम पाञ्चालः कस्मिंश्चिन्निमित्ते भारताचार्यादवज्ञामवाप्य तत्प्रतिचिकीर्षुर्याजयाजकः सन्नाभिचारिकीमिष्टीं

चकार। तत्र निरुप्ते चरौ तस्माद्वैतानिकाद्वेदिमध्यान्मिथुनमुदपद्यत। प्रतिपद्यत च सद्य एव यौवनम्। तत्र या पुमान् स धृष्टद्युम्नो नाम तं भारद्वाजमेव विद्यार्थमुपससाद। विद्वानपि तत्सम्भवं स तत्र भवान्द्रोणः दैवमपरिहार्यं मन्वानस्तं द्रौपदं साङ्गं धनुर्वेदमध्यापयामास। अथ या कन्या सा कृष्णा नाम वरवर्णिनी। तस्याः शरीरमिन्दीवरसवर्णवर्णमुत्पलसगन्धगन्धमाहार्यशोभानपेक्षिलावण्यमनभ्यन्तरं च यौवनप्रतियोगिनोऽवस्थान्तरस्य। किं बहुना ? यस्य सा गृहिणी स उर्वशीमपि तृणाय मन्येत। सम्प्रति तस्याः स्वयंवर इति द्रुपदेनाहूताः सर्वेऽपि क्षत्रिया अहंपूर्विकया तत्पुरीमावृण्वन्ति। विवृण्वन्ति चाशयं तां स्वहस्तगतमिव तत्पणस्तु पार्थादन्येनानिर्वाह्य इति मे वितर्कः इत्युपरराम।

**व्याख्या - अथेति।**

प्रसङ्गात् सन्दर्भात्। भारताचार्यात् द्रोणाचार्यात्। याजयाजकः याजेन यागमाचरितः। आभिचारिकीमिष्टिम् आभिचारयागम्। निरुप्ते चरौ सति सप्तमीप्रयोगः। यदा हव्यपाकः होमाग्नौ समर्पितं तदा। वैतानिकात् होमात्। प्रतिपद्यत संप्राप्तम्। भारद्वाजं द्रोणम्। उपससाद समीपं प्राप। अपरिहार्यं परिहर्तुमसाध्यम्। दैवनियोगमिति। अध्यापयामास पाठयामास। वरवर्णिनी उत्तमस्त्री। लावण्यं सौन्दर्यम्। अनभ्यन्तरम् अनितरसाधारणम्। यौवनप्रतियोगी अवस्थान्तरेऽपि नित्ययौवनम्। तृणाय मन्येत तृणवत् गणयति। तृणाय मन्यते इत्यत्र मन् धातोः योगे चतुर्थी। क्षत्रियाः राजानः। अहं पूर्विकया अहमहमिकया। आवृण्वन्ति आवरणं कुर्वन्ति। विवृण्वन्ति विशदीकुर्वन्ति। पणः ग्लहः। पन्तयमिति भाषायाम्। अनिर्वाह्यः निर्वोदुम् असाध्यम्। वितर्कः संशयः। उपरराम इत्यत्र उपपूर्व रम् धातोः परस्मैपदित्वं लभते।

**संक्षिप्तः आशयः -** एकस्मिन् दिने यदृच्छया कश्चन ब्राह्मणः पाण्डवानां पुरतः आगत्य विविधान् विशेषान् कथितवान्। तन्मध्ये स एवमवदत् 'पाञ्चालराजः द्रुपदः द्रोणाचार्याय प्रतिकारेच्छया एकं यागं चकार। यागाग्नेः कश्चन बालः काचन बालिका च उद्भूताम्। सद्य एव तौ यौवनं प्रापतुः। पुमान् धृष्टद्युम्नः भारद्वाजात् धनुर्विद्यां पठितवान्। या स्त्री सा कृष्णा नाम उत्तमस्त्री। सा त्रिलोकसुन्दरी भवति। उर्वशीमपि सौन्दर्येण अतिक्रामति। इदानीं तस्याः स्वयंवरं कर्तुं द्रुपदः निश्चिकाय। तस्याः स्वयंवराय अनेके राजानः अहमहमिकया तत्पुर्यामागताः। सा स्वहस्तगता इति ते विचारयन्ति च। किन्तु अर्जुनादन्यं कमपि सा कृष्णा न वरिष्यतीत्यत्र नास्ति संशयः' इति।

**गद्यम् - २७**

**पाण्डवानां ब्राह्मणरूपेण द्रुपदसभायां स्थितिः।**

तेनोत्कण्ठितास्ते मात्रा सह तदर्थं प्रस्थिता अहोरात्रैर्यान्तः सोमाख्यं गङ्गयास्तोर्थं रजन्यां यावत्पश्यन्ति, तावत्तत्र स्त्रीभिः सह जलक्रीडामाचरंश्चित्ररथो नाम गन्धर्वस्तत्समागमेन कुपितोऽभिदुद्राव। अर्जुनस्तु तद्रथमाग्नेयास्त्रेण भस्मसात्कृत्य, तं च निगृह्णन् शरणापन्नायास्तद्भार्यायाः कृते स्त्रीनाथोऽयमिति मोचयामास। एवं युद्धे बीभत्सकर्मवर्जनात् बीभत्सुरिति प्रथामवाप। अथ प्रीतात्तस्माद्गन्धर्वाच्चाक्षुषीं नाम

विद्यामाग्नेयास्त्रविनिमयेन लब्ध्वा, पुनश्च पारितोषिकतया दत्तानश्वांस्तस्मिन्नेव न्यासीकृत्य तद्वाक्येन धौम्यं नाम ब्राह्मणमाचार्य विधाय तेन स्वैश्च द्रुपदराजधानीमियाय। तस्याः स्कन्धावार एव कस्यचित्कुलालस्य गृहे कृतप्रतिश्रयास्ते सर्वैरपि क्षत्रियैः सङ्कुलां स्वयंवरसभां प्राप्य ब्राह्मणमण्डलमध्यमध्यासामासुः।

**व्याख्या - तेनेति ।**

तेनोत्कण्ठितास्ते तेन + उत्कण्ठिताः + ते। कृष्णायाः स्वयंवरं द्रुपदसभायां चलिष्यति ततः प्राप्तुं प्रयासः वर्तते इत्यनेन उत्कण्ठिताः पाण्डवाः। रजन्यां रात्रौ। अभिदुद्राव अभिमुखमाक्रमितुम् आगतवान्। अभिदुद्राव - अभि पूर्व द्रु गतौ-पर-लिट्-प्र पु-ए व। अभिदुद्राव - अभिदुद्रुवतुः - अभिदुद्रुवुः।

**संक्षिप्तः आशयः -** द्रौपद्याः स्वयंवरवार्तामाकर्ण्य द्रुपदपुरीगमने उत्कण्ठाकुलाः पाण्डवाः अहोरात्रैः यान्तः रात्रौ गङ्गायाः सोमतीर्थं प्रापुः। तत्र गन्धर्वः चित्ररथः स्त्रीभिः सह जलक्रीडामाचरन्नासीत्। तेषाम् आगमनेन कुपितः सः अर्जुनमाक्रमितुमागतवान्। अर्जुनः आग्नेयास्त्रेण तस्य रथं भस्मीचकार। तं बबन्ध। किन्तु चित्ररथस्य भार्यायाः प्रार्थनया तं मोचितवान्। बीभत्सकर्मवर्जनात् अर्जुनः बीभत्सुः बभूव। सन्तुष्टात् गन्धर्वात् चाक्षुषीं नाम विद्यां आग्नेयास्त्रविनिमयेन अर्जुनः स्वीकृतवान्। अपि च पारितोषिकेण लब्धानश्वान् तस्मिन्नेव न्यासीकृतवान् । पुनरपि यात्रां कुर्वन्तः पाण्डवाः द्रुपदराजधानीं प्राप्य कस्यचन कुलालस्य गृहे अभयं प्रापुः। पुनः क्षत्रियैः सङ्कुलां स्वयंवरसभां प्राप्य ब्राह्मणमध्ये स्थितिं चक्रुः।

### संक्षिप्तीकरणम्

कुरुपाण्डवकुमाराणां धनुर्विद्याभ्यसनानन्तरं द्रोणाचार्यः गुरुदक्षिणां सूचितवान्। गुरुदक्षिणारूपेण द्रुपदं जीवग्राहं गृहीत्वा आनयनम् इति। सद्य प्रस्थिताः दुर्योधनादयः द्रुपदसैन्येन पराजिताः भूत्वा पलायिताः। अर्जुनः भीमेन सह द्रुपदसैन्यं प्रमथ्य जीवग्राहं द्रुपदं बद्ध्वा गुरवे गुरुदक्षिणामर्पितवान्। सुहृद्बन्धं त्यक्तुं नेच्छामि, अराज्ञा सह सख्यमेव तवेष्टं किल इत्येवं द्रुपदं पृच्छन् द्रोणः दक्षिणपाञ्चालाः भवते अस्तु इत्युक्त्वा द्रुपदं मोचितवान्। युधिष्ठिरस्य यौवराजाभिषेकः सञ्जातः। जनाः युधिष्ठिरे अनुरागिणः। एतद् ज्ञात्वा भीमार्जुनयोः विक्रमं च विदित्वा दुर्योधनः पाण्डवान् हन्तुमुपायं चिन्तितवान्। दुर्योधनस्य प्रेरणया कणिकस्योपदेशेन च अन्धस्य धृतराष्ट्रस्य मनसि अपि अन्धत्वं सञ्जातम्। धृतराष्ट्रः एकदा अजातशत्रुं वारणावते पशुपतेरुत्सवाय सुहृद्भिः सह गमनाय प्रेरितवान्। धर्मपुत्रः तदङ्गीचकार। दुर्योधनः स्वसेवकं पुरोचनं प्रलोभ्य वारणावते जतुगृहनिर्माणाय प्रेरितवान्। युधिष्ठिरः सोदरैः मात्रा च वारणावतं प्रस्थातुमारेभे तदा विदुरः दुर्योधनस्य कुटिलतन्त्रमधिकृत्य म्लेच्छभाषायां सूचितं कार्यम् एकान्ते मात्रे न्यवेदयत्। जतुगृहदाहकाले पाण्डवेभ्यः बहिर्गन्तुं विदुरः स्वभृत्येन अन्यैरविदिताम् एकां सुरङ्गां निर्मापयामास। एकदा पञ्चपुत्रा काचन निषादी सुरां पीत्वा तस्मिन् गृहे पुत्रैः सह सुष्वाप। पुरोचनोऽपि गाढसुषुप्तौ अवर्तत। तदा तद्गृहं सर्वतो अग्निनोद्दीप्य पूर्वरचितेन बिलमार्गेण पाण्डवाः मात्रा सह भगीरथीं प्रापुः।विदुरेण सज्जीकृतेन नावा बहुदूरं पाण्डवाः प्राप्ताः।

वारणावतगृहं अग्निसात्कृतं दृष्ट्वा पुरोचनेन साकं सर्वे पाण्डवाः मृताः इति जनाः विचार्य विललापुः। दुर्योधनस्तु परमानन्दं प्राप। वृकोदरः निद्रया क्षीणेन चावशान् भ्रातॄन् मातरं च शरीरेण वहन् सुदूरं प्रधाव्य कस्यचित् वटवृक्षस्य तले तान् शाययन् स्वयं जाग्रतः अवर्तत। अत्रान्तरे हिडिम्बा नाम राक्षसी सोदरेण हिडिम्बेन प्रेरिता तत्रागता। हिडिम्बः पाण्डवान् हन्तुं हिडिम्बां प्रेरितवान्। किन्तु भीमे आकृष्टा सा सौम्यवेषेण तं प्राप्य विवाहाभ्यर्थनां चकार। तदा भीममाक्रान्तुमागतं हिडिम्बं भीमः जघान। तत्समये स्वापात् उत्थितानां पाण्डवानां पुरतः हिडिम्बा तस्याः अभिलाषं सबहुमानं सूचितवती। पाण्डवानामनुमत्या भीमः हिडिम्बां स्वीचकार। भीमस्य हिडिम्बायां घटोत्कचः नाम पुत्रः जातः। जातमात्रे सः युवा भूत्वा पितॄन् प्रणम्य यथासमयमागमिष्यामि इत्युक्त्वा मात्रा सहागच्छत्।

पुनरपि गच्छन्तः पाण्डवाः मार्गे भगवन्तं व्यासमपश्यन्। व्यासेन आश्वासिताः ते एकचक्राख्यं नगरं प्रविश्य कस्यचित् ब्राह्मणस्य गृहे भैक्षेण वृत्तिं चक्रुः। एकदा तस्य ब्राह्मणस्य विलापमाकर्ण्य कुन्ती कारणमपृच्छत् । विप्रः बकवृत्तान्तं सूचितवान्। अपि च आगामिनि दिने महता अन्नराशिना सह कंचन जनं बकाय दातव्यम्। कं कां वा दास्यतीति विचिन्त्य विललाप। कुन्ती तमाश्वास्य मम पुत्रेषु अन्यतमः तदर्थं गमिष्यति, नूनं सः बकं हनिष्यति सामूहिके कार्ये सर्वे अंशिनः एव। अलं सन्तापेन इत्यादिकम् उक्त्वा सान्त्वयामास। धर्मपुत्रस्यानुमत्या कुन्ती भीमं बकवधाय प्राहिणोत्। द्वन्द्वयुद्धे भीमः बकं हत्वा, गोपुरद्वारि प्रास्य, जनैरलक्षितः सन् प्रत्याजगाम।

एकदा कश्चिद्विप्रः आगत्य पाण्डवैः सह सम्भाषणावसरे द्रुपदराजं परामृशत्। द्रुपदः याजयाजकः सन् यागं चकार। वेदिमध्यात् कश्चन पुमान् काचन स्त्री च उद्भूताम्। सद्य एव यौवनं च प्रापतुः। पुमान् धृष्टद्युम्नः द्रोणाचार्यमुपेत्य धनुर्विद्यां जग्राह। या स्त्री सा कृष्णा वरवर्णिनी, त्रिलोकलक्ष्मी च। सा सौन्दर्ये उर्वशीमप्यतिक्रामति। तस्याः स्वयंवरं कर्तुं राजा द्रुपदःनिश्चिकाय। द्रुपदेनाहूताः सर्वे राजानः अहंपूर्विकया द्रुपदपुरीं प्रापुः। किन्तु कृष्णा अर्जुनादन्यं न वरिष्यतीति अवदत्। द्रौपदीवार्तामाकर्ण्य उत्कण्ठिताः पाण्डवाः द्रुपददेशं प्रति यात्रामकुर्वन्। एवं यात्रामध्ये गङ्गां प्राप्ताः चित्ररथं गन्धर्वमपश्यन्। सः स्त्रीभिः सह जलक्रीडां कुर्वन्नवर्तत। अर्जुनमाक्रमितुमागतस्य तस्य रथम् अर्जुनः आग्नेयास्त्रेण भस्मीचकार। बद्धं चित्ररथं तस्य भार्यायाः अभ्यर्थनया अर्जुनः मुमोच। अर्जुनः आग्नेयास्त्रविनियोगेन गन्धर्वात् चाक्षुषीं विद्यां जग्राह। पुनः द्रुपदपुरीं प्राप्ताः ते पाण्डवाः क्षत्रियैः सङ्कुलां स्वयंवरसभायां ब्राह्मणमध्ये स्थितिं चक्रुः।

## पुनरावृत्तिः (Recap)

- कुरुपाण्डवकुमाराणां धनुर्विद्याभ्यासानन्तरं द्रोणाचार्यः गुरुदक्षिणारूपेण द्रुपदं सजीवं बद्ध्वा आनयितुं सूचितवान्।
- अर्जुनः भीमेन सह द्रुपदं बद्ध्वा गुरोः पुरतः गुरुदक्षिणां समर्पितवान्
- सुहृद्वत्सलः द्रोणः उत्तरपाञ्चालदेशेन द्रुपदं मोचयामास।
- युधिष्ठिरस्य यौवराजाभिषेकः सञ्जातः।
- दुर्योधनः पाण्डवान् हन्तुमुपायं चिन्तितवान्।
- वारणावतं गन्तुं धृतराष्ट्रः आजातशत्रुमपदिदेश।
- दुर्योधनः स्वसेवकं पुरोचनं प्रलोभ्य वारणावते जातुगृहनिर्माणाय प्रेरितवान्।
- युधिष्ठिरः सोदरैः मात्रा च वारणावतं प्रस्थातुमारेभे।
- विदुरः दुर्योधनस्य कुटिलतन्त्रमधिकृत्य म्लेच्छभाषायां सूचितवान्।
- जतुगृहदाहकाले पाण्डवेभ्यः बहिर्गन्तुं विदुरः स्वभृत्येन अन्यैरविदिताम् एकां सुरङ्गां निर्मापयामास।
- जातुगृहं सर्वतो अग्निनोद्दीप्य पूर्वरचितेन बिलमार्गेण पाण्डवाः मात्रा सह भगीरथीं प्रापुः।
- विदुरेण सज्जीकृतेन नावा बहुदूरं पाण्डवाः प्राप्ताः।
- डिडिम्बायाः आगमनं, घटोत्कचस्य जननम्।
- पाण्डवानाम् एकचक्रनगरे वासः।
- धर्मपुत्रस्यानुमत्या कुन्ती भीमं बकवधाय प्रहिणोत्।
- ब्राह्मणः पाणडवानां पुरतः द्रौपदीमधिकृत्य सूचयति।
- पुनः द्रुपदपुरीं प्राप्ताः ते पाण्डवाः क्षत्रियैः सङ्कुलां स्वयंवरसभायां ब्राह्मणमध्ये स्थितिं चक्रुः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. उत्तरपाञ्चालदेशेन द्रुपदं मोचयामास - कः ?
2. कः जातुगृहं निर्मितवान्?
3. निषेधार्थकस्य अलम् इत्यस्य योगे का विभक्तिः ?
4. द्रुपदराजधानीं प्राप्ताः पाण्डवाः कुत्र अभयं प्रापुः ?
5. कुत्र किञ्चित्कालं वासाय धृतराष्ट्रः अजातशत्रुमुपदिदेश?
6. पाण्डवानां एकचक्रवासकाले कथं ते जीवितमनयन् ?
7. भीमसेनस्य हिडिम्बायां जातः पुत्रः कः ?
8. अम्ब, तत्र युष्मद्वासगृहं शत्रुप्रयुक्तेन पुरुषेण धक्ष्यते - कं पुरुषमत्र उद्दिशति ?

9. यस्य सा गृहिणी स उर्वशीमपि तृणाय मन्येत - सा का?
10. द्रुपदेन कृते यागे वेदीतः उत्थितस्य पुरुषस्य नाम किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. पाण्डवानां वारणावते वासः कीदृशः आसीत्? कः वारणवासाय उपदिदेश?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. जतुगृहात् पाण्डवाः कथं रक्षां प्रापुः ?
2. द्रौपद्याः उत्पत्तिः सौन्दर्यं चाधिकृत्य एकां खण्डिकां लिखत।
3. कुरुपाण्डववैरमधिकृत्य लघुखण्डिकां लिखत ।

## निर्दिष्टाभ्यासः (Assignments)

पाण्डवाः प्रच्छन्नवेषधारिणः भूत्वा द्रुपदराजधानी वासः- वर्णयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. द्रोणः।
2. पुरोचनः ।
3. तृतीया।
4. कस्यचन कुलालस्य भवने।
5. वारणावते।
6. कस्यचन विप्रस्य भवने भैक्षेण जीवितमनयन्।
7. घटोत्कचः।
8. पुरोचनेन निर्मितं भवति जातुगृहम्।
9. द्रौपदीं।
10. धृष्टद्युम्नः।

## सूचनाग्रन्थौ (References)

1. लक्ष्मणसूरिः, भातरसंग्रहः, व्याख्या-शङ्कररामशास्त्री, श्रीबालमनोरमा प्रस्, १९६१।
2. लक्ष्मणसूरिः, भारतसंग्रहः, श्रीचैतन्या अकादमी, कृष्ण, आन्ध्राप्रदेशः।

## अधिकवाचनाग्रन्थौ (Suggested readings)

1. लक्ष्मणसूरिः, भारतसंग्रहः, आदिपर्वः, कुप्पुस्वामि शास्त्रि रिसर्च इन्स्टिट्यूट्ट, चेन्नै, २०१७।
2. Lakshmanasuri. Bharata Sangraha-Adi parva, C Sankararama sastri, Kuppuswami Sastri Research Institute, Chennai 2017

# Unit - 4
# खण्डिकाः 28 - 31

## उद्देश्यानि (Learning Outcomes)

- भारतसङ्ग्रहस्य सविशेषतां जानाति।
- महाभारतस्य मूल्यानि अवगच्छति।
- आशयावगमनम्।

## प्राग्व्यपेक्षाः (Prerequisites)

लक्ष्मणसूरिणा रचितं भारतसंग्रहे तृतीये एकके कुरुपाण्डववैरं , पुरोचननिर्मितस्य , पाण्डवाः प्रच्छन्नवेषधारिणः भूत्वा द्रुपदराजधानीवासः इत्यादि विषयानधिकृत्य विस्तरेण चर्चं अकरोत्। तदनन्तरं चतुर्थे एकके किं संभूतमिति पश्यामः।

## मुख्यपदानि (Keywords)

पतिवरां - अधिकण्ठं सोत्कण्ठं - निश्चिततदभिजात्यः - संजातमन्युः - सर्वेश्वरमन्यः शतमन्यः - अन्तःकलुषी - बहिः प्रसन्नः

## Discussion

**अर्जुनस्य द्रौपदीस्वयंवरः; पाण्डवानाम् इन्द्रप्रस्थवासःच ।**

**गद्यम्- २८**

**धृष्टद्युम्नस्य द्रौपदीस्वयंवरसभायांप्रख्यापनम्।**

तदानीं धृष्टद्युम्नः सर्वलोकसमक्षमतिगम्भीरमिदमाचचक्षे 'श्रृणुत समवेताः सर्वे पार्थिवाः, यः कश्चन युष्माकमिमां पतिवरां मे स्वसारमात्मनः पाणिगहीतीमिच्छति, सोऽनेन धनुषास्य भेदनं पणीकृत्यैनां प्रतीच्छतु' इति।

**व्याख्या - तदानीमिति।**

आचचक्षे अवदत्। समवेताः समागताः। स्वसारं सोदरीम्। पणः ग्लहः। पन्तयमिति भाषायाम्। पणीकृत्य ग्लहं कृत्वा।

**संक्षिप्तः आशयः -** धृष्टद्युम्नः (द्रौपद्याः सोदरः) स्वयंवरसभायां वर्तमानान् भूपतीन् अवलोक्यैवमवदत्- हे राजानः, यः मम सोदरीं पाणिग्रहणं कर्तुम् इच्छति सः नूनम् अनेन धनुषा अस्य लक्ष्यस्य भेदनं करणीयम् इति।

**गद्यम् - २९**

**स्वयंवरमण्डपे द्रौपद्या अर्जुनवरणम्, भ्रातृभिः भुङ्क्ष्व इति मातुरुपदेशः, कृष्णबलरामयोः समाश्वासनं च।**

तदनु युगपदुत्थितान्बहून्वीरान्निवार्य स्वयमग्रेसरे गिरिराजसारस्य तस्य शरासनस्य दर्शनेनैव मुकुलितानुरागे तुरगब्रह्मचर्यधुरन्धरे गान्धारे, तद्दण्डगौरवेणैव कृतशासने दुश्शासने, तद्वेगाक्षिप्तात्मन्यवहसिते च मानधने दुर्योधने, अजात्यतया दूषिते सूतसुते, श्लथमनोरथे बार्हद्रथे, विगलितधैर्यमुद्रे मद्रराजे, अवद्योद्यमे चैद्ये, भावितार्थतया तूष्णीके वृष्णिकेतौ, मूकीभूते चान्यस्मिन् राजन्यके, ब्राह्मणसमाजादुत्थाय पार्थः सपदि तद्धनुरारोप्य यन्त्रच्छिद्रेण तल्लक्ष्यं परेषां मानेन सह सहसा पातयामास। तत्क्षणं कृष्णा मन्दंमन्दमुपकण्ठमुपगम्य जिष्णोरधिकण्ठं सोत्कण्ठं वरणस्रजमर्पयामास। तदक्षममाणाः सुयोधनादयः क्षितिपतयो यशसो विनिमयेन विजयशरप्रहारमादाय पलायाञ्चक्रिरे। अथ तया वीर्यशुल्कया सह स्वावासं प्रविशता पार्थेन अम्ब, भिक्षेयमाहृता इत्युक्ते भ्रातृभिर्भुङ्क्ष्व इति ब्रुवत्येवागता माता तां स्वयंवरवार्तां निशम्य साध्वसादवचनातिष्ठत्। युधिष्ठिरस्तु जनन्या अनृताद्भयं भ्रातॄणां भावं चाज्ञाय एषा पार्षती योषितां रत्नम्, यद्यद्रत्नमस्माभिर्लभ्यते तत्सर्वैरप्यस्माभिरविभज्यानुभोक्तव्यम्। अन्यथा कदाचिदस्मास्वपि कलिरन्तः लभेत। तदियं पञ्चानामपि योग्यास्तु इति समयं कृतवान्। तथेति सर्वैरपि प्रतिपन्ने, तेषां मातुलेयो भगवान्कृष्णः संकर्षणेन सहोपगम्य शुभोदकैर्वाक्यैस्तान्समाश्वासयामास।

**व्याख्या - तदनु इति।**

युगपदुत्थितान् युगपत् + उत्थितान्। बहून् अनेकान् वीरान् निवार्य प्रथमं भवितुमिच्छन्। गिरिराजसारस्य पर्वतराजस्य बलयुक्तस्य। शरासनस्य धनुषः। मुकुलितं सङ्कुचितम्। तुरगब्रह्मचर्यधुरन्धरः निर्बन्धरूपेण ब्रह्मचर्यस्वीकरणे श्रेष्ठः। गान्धारः गान्धारराजः। तद्दण्डगौरवं तस्य धनुषः भारम्। कृतशासने सम्प्राप्तशासने। कृतशासने दुःशासने दुःशासनाय शासनं यदा लब्धं तदा। धनुषः भारमधिकमिति ज्ञात्वा दुःशासनः पराङ्-मुखो बभूव। मानधनः मानम् (अभिमानम्) एव धनं यस्य सः मानधनः। तद्वेगात्क्षिप्तात्मनि धनुषः वेगेन

दूरतः पतित्वा आत्मनि अवहसितः परिहास्यतां प्राप्तः। अजात्यतया हीनजातित्वात्। सूतसुतः कर्णः। श्लथमनोरथः नष्टाग्रहः (विनष्टाभिलाषः)। बार्हद्रथः बृहद्रथस्य अपत्यं पुमान् (जरासन्धः)। धैर्येण मुद्रा (चिह्नं) यस्य सः धैर्यमुद्रः। विगलितधैर्यमुद्रः विनष्टधैर्यमुद्रः। अतीव धैर्यं वर्तमानस्य तस्य सम्पूर्णं धैर्यमपि विनष्टम्। चैद्यः चेदिराजः शिशुपालः। अवद्योद्यमः निन्दनीयप्रयत्नः। भावितार्थतया यथार्थज्ञानेन। तूष्णीकः मौनभावः (निश्शब्दः)। राजन्यकः राज्ञां समूहः। यन्त्रच्छिद्रेण यन्त्रद्वारेण।तल्लक्ष्यम् तत् + लक्ष्यम्। परेषाम् अन्येषाम्। उपकण्ठं कण्ठस्य समीपम्। समीपमेत्य। अधिकण्ठं गले। वरणस्रजं वरणमालाम्। अक्षममाणाः असहमानाः। यशसो विनिमयेन विजयशरप्रहारं यशसं दत्वा विजयरूपस्य शरस्य प्रहारेण ताडनेन। यशोनष्टं शरप्रहारं च लब्धम्। वीर्यशुल्कया वीर्येण क्रीतया। भिक्षेयमाहृता भिक्षा + इयम् + आहृता। आहृता सम्पाद्यानीता। भुङ्क्ष्व भोज्यध्वम् (अनुभूयध्वम्)। साध्वसात् ससम्भ्रमम्। अवचना किमपि नोक्ता। अनृताद्भयम् असत्यवचनाद्भयम्। मातुः वचनं वृथा भवेत् चेत् जायमानं भयम्। पार्षती द्रौपदी। यद्यद्रत्नम् यत् + यत् + रत्नम्। अविभज्य विभागमकृत्वा। कदाचिदस्मास्वपि कदाचित् + अस्मासु + अपि। भोग्या भोक्तुं योग्या। प्रतिपन्ने अङ्गीकृते। मातुलेयः मातुलस्य पुत्रः। संकर्षणेन बलरामेण।

**संक्षिप्तः आशयः -** द्रौपदीपरिणयेच्छया बहवः राजानः युगपद् धनुरुद्धरणाय उद्युक्ताः अभवन्। तान् सर्वानपि निवार्य गान्धारराजः अयतत। पर्वततुल्यस्य शरासनस्य दर्शनेनैव स तस्याभिलाषं तत्याज। दुःशासनोऽपि धनुरुद्धारणे सन्नद्धे सति दण्डगौरवं ज्ञात्वा तस्य श्रममुपेक्षितवान्। मानधनः दुर्योधनः धनुश्शक्त्या बहुदूरे पपात, परिहास्यतां च प्राप। जातिहीनतया कर्णः दूषितोऽभवत्। जरासन्धः भग्नमनोरथः बभूव। मद्रराजस्य सर्वमपि धैर्यं विनष्टमभूत्। चैद्यस्य शिशुपालस्य श्रमोऽपि विफलमभूत्। यथार्थज्ञानेन वृष्णिकेतुः मूकः बभूव। अन्ये राजानः अपि निश्शब्दाः अभवन्। तदा अर्जुनः ब्राह्मणमध्यात् उत्थाय धनुरारोप्य यन्त्रच्छिद्रेण लक्ष्यं साधितवान्। सर्वेषां क्षत्रियाणां अभिमानगर्वं च पातयामास। तदा कृष्णा अर्जुनसमीपं प्राप्य तस्य कण्ठे वरणमालां समर्पितवती। तदक्षममाणाः दुर्योधनादयः अर्जुनेन सह युद्ध्वा पराजिताः भूत्वा पलायिताः। वीर्येण क्रीतया कृष्णया सह गृहं प्राप्य मातरम् अर्जुनः एवमवदत् अम्ब, भिक्षेयमाहृता इति। भ्रातृभिः सह भुङ्क्ष्व इत्युत्तरं माता अवदत्। किन्तु स्वयंवरवधूं दृष्ट्वा माता ससम्भ्रममतिष्ठत्। जनन्याः वाचं कदापि मिथ्या न भवेत्, भ्रातॄणां भावं च ज्ञात्वा युधिष्ठिरः एवमवदत् इयं स्त्रीरत्नमेव। यत् यत् रत्नमस्माभिः लभ्यते तत्सर्वमस्माभिः अविभज्य अनुभोक्तव्यम्। अन्यथा अस्मासु वैरं जायेत इति। तस्मिन्नवसरे पाण्डवानां मातुलपुत्रः श्रीकृष्णः बलरामेण सह तत्रागत्य शुभवाक्यैः सर्वान् समाश्वासयामास।

**गद्यम् - ३०**

**द्रौपद्याः पूर्वजन्मवृत्तान्तः।**

द्रुपदस्तु बहुभिर्लिङ्गैर्निश्चिततदाभिजात्यः प्रमनास्तान् गृहमानीय यथावत्पूजयित्वा युधिष्ठिरमुखेन सविशेषं विदन् सुतरां निर्विवार। ववार च सुतापाणिग्रहणाय पार्थम्। तदनु श्रुततत्संश्रवे विषममिदं यदेका बहूनां

भार्या इति संशयाने यज्ञसेने, भगवान्बादरायणस्तां सभामवततार। वितेतार च कृतसपर्याय तस्मै राज्ञे दिव्यं चक्षुः। तेन तानमानुषान्वीक्ष्य विस्मिताकारं कन्यापितरं पाराशर्यो रहसीदमबोधयत् पुरा किल स्वर्गलक्ष्मीरतिशयितरूपा कस्यचिदृषेः कन्या सती अनुरूपवरालाभेन महेश्वरं तपसा तोषयामास। प्रसन्ने तु तस्मिन्नुन्मनीभूता सा 'पति देहि' इति पञ्चकृत्वोऽयाचत। अनन्तरे जन्मनि तव पञ्च पतयो भविष्यन्तीति वरं दत्वा तस्मिंस्तिरोहिते, विष्णुपद्याः स्रोतसि रुदती सा सुदती यदृच्छयागता शक्रेण पृष्टा, तमादाय, गिरेः शिखरे क्रीडतस्तस्य महादेवस्यान्तिकं जगाम। तद्दर्शनेन संजातमन्युः सर्वेश्वरमन्यः शतमन्युः स्तम्भितोऽभूत्। तत्र दरीशयानात्मनः सरूपांश्चतुरोऽन्यान् दर्शयित्वा, तैः सहान्तः प्रवेष्टुं तेन देवेनादिष्टो मरुत्वानश्वत्थदलवन्मुहुर्मुहुरुद्विविजे। ततः कृपालुः सः महेश्वरः केनचिदपदेशेन तेषामिन्द्राणां मनुष्यरूपेऽवतरणं, तां च तेषां भार्यां कल्पयामास। सैवेयं कृष्णा, ते चेमे पाण्डवाः सञ्जाताः। एषामस्याश्चायमागमः तदलं विचार्य इति विमर्शच्छेदिना मुनेर्वचनेन प्रत्ययितो राजा तेभ्यो पञ्चभ्योऽपि स्वां दुहितरं कृष्णां प्रतिपादयामास। निवृत्ते तु पाणिग्रहणे स्वाहयेव तया वेदिसम्भवया सहधर्मिण्यालङ्कृतैः अग्निभिरिव तैः पञ्चभिर्भातृभिर्भाजमानां सभां महता वसुनिधानेनोपयान्तौ रामकृष्णौ इमं लोकं तैजसं विधातुमवतरन्तौ पुष्पवन्ताविव चकासामासतुः।

**व्याख्या - द्रुपद इति।**

लिङ्गैः प्रमाणैः। निश्चिततदाभिजात्यः अर्जुनस्याभिजात्यं निर्णीतः। प्रमनाः प्रहृष्टः। विदन् जानन्। निर्विवार निर्वृतिं प्राप। ववार स्वीचकार। श्रुततत्संश्रवे पाण्डवाः सर्वे पुत्र्याः भर्तरि भविष्यन्तीति वार्ताश्रवणे। संशयाने यज्ञसेने यदा यज्ञसेनः (द्रुपदः) संशयालुः बभूव तदा। सपर्या पूजा। विस्मिताकारं विस्मयान्वितम्। पारशर्यः पराशरस्यापत्यं पुमान् (व्यासः)। कस्यचिदृषेः - कस्यचित् + ऋषेः। तपसा तपश्चरणेन। तस्मिन्नुन्मनीभूता - तस्मिन् +उन्मनीभूता। उन्मनीभूता सन्तुष्टा। पञ्चकृत्वः पञ्चवारम्। पतयः भर्तारः। विष्णुपद्याः गङ्गायाः। सुदती शोभनाः दन्ताः यस्याः सा सुदती (सुन्दरी)। संजातमन्युः कोपिष्ठः। मन्युः कोपः। सर्वेश्वरमन्यः सर्वेषां ईश्वरः आत्मानमिति मन्यमानः। यथार्थतः सर्वेश्वरः न भवति। स्वयं चिन्तयति सर्वेश्वर इति। शतमन्युः इन्द्रः। दरी कृत्रिमा गुहा। दरीशयान् दर्या शयनं कुर्वतः। आदिष्टः आज्ञप्तः। मरुत्वान् इन्द्रः। अश्वत्थः पिप्पलः। अरयाल् इति कैरल्याम्। उद्विविजे भयेन कम्पयामास। अपदेशेन व्याजेन। चेमे च + इमे। विमर्शच्छेदिना संशयदूरीकरणसमर्थेन। प्रत्यायितः प्राप्तविश्वासः। प्रतिपादयामास समार्पयत्। स्वाहा अग्नेः भार्या। वेदिसंभवया वेदिसंभूतया। भ्राज्यमाना शोभमाना। वसुनिधानं धनराशिः। तैजसं तेजोमयम्। विधातुं कर्तुम्। पुष्पवन्तौ सूर्यचन्द्रौ। चकासयामासतुः शुशुभाते।

**संक्षिप्तः आशयः** - द्रुपदः अनेकप्रमाणैः अर्जुनस्याभिजात्यं ज्ञात्वा सन्तुष्टो बभूव। सः पाण्डवान् गृहमानीय पूजयामास। सः युधिष्ठिराद् सर्वं वृत्तान्तं ज्ञातवान्। सुताविवाहाय अर्जुनमङ्गीचकार। किन्तु एका बहूनां भार्या कथं भवेत् इति संशयापूर्वं तिष्ठतः तस्य सभायां व्यासः अवततार। व्यासः दिव्यं चक्षुः द्रुपदाय अदात्।

तेन दिव्यचक्षुषा अमानुषान् पाण्डवान् दृष्ट्वा द्रुपदः विस्मितः बभूव। व्यासः द्रुपदं कृष्णायाः पूर्वजन्मवृत्तान्तं कथितवान्। पुरा स्वर्गलक्ष्मीः कस्यचित् ऋषेः कन्या आसीत्। सा अनुरूपवरालाभेन शिवं तपसा तोषयामास। प्रसन्नं शिवं सा पतिं देहि इति पञ्चवारमयाचत। 'अनन्तरे जन्मनि तव पञ्च भर्तारः भविष्यति' इत्युक्त्वा शिवः अप्रत्यक्षो बभूव। गङ्गायाः तीरे विलपन्तीं सुन्दरीं इन्द्रः अपश्यत्। इन्द्रेण पृष्टा सा तमादाय गिरेः शिखरे क्रीडतः शिवस्य समीपं प्राप। शिवं दृष्ट्वा इन्द्रः स्तम्भितो बभूव। अपि च गुहायां अन्तः वर्तमानान् सरूपान् चतुरः अन्यान् दर्शयित्वा गुहायां प्रवेष्टुम् इन्द्रमादिदेश। पुनः कृपालुः शिवः केनापि व्याजेन ते पञ्च इन्द्राः भूमौ अवतर्तु, तां च तेषां भार्यां कर्तुं कल्पयामास। सैवेयं कृष्णा, ते चेमे पाण्डवाः। द्रुपदस्य सन्देहः दूरीकृतः। सः पाण्डवेभ्यो स्वदुहितारम् अदात्। विवाहानन्तरं स्वाहयेव सा प्रशोभमाना बभूव। तदा श्रीकृष्णबलरामौ आगत्य धनराशिना कृष्णां पाण्डवान् च अनुगृहीतवन्तौ ।

**गद्यम् - ३१**

**पाण्डवानां हस्तिनपुरप्राप्तिः खाण्डवप्रस्थे वासश्च।**

धृतराष्ट्रस्तु श्रुतवृत्तान्तः पङ्किल इव जलाशयेऽन्तःकलुषो बहिः प्रसन्नश्च सन् भ्रातृपुत्रान् वध्वा सहानेतुं क्षत्तारं प्रेषयामास। द्रुपदस्तु तं कुरुराजसन्देशं मानयन्, दुहितृवात्सल्यस्य, वरेण्यवरसम्पदः, श्लाघ्यसम्बन्धस्य, पुरुषोत्तमसमागमस्य, आधिराजस्य, मनस्वितायाश्चानुरूपेण यौतकेन सदारान् जामातॄन् स्वावासया प्रस्थापयामास। तेऽपि भगवता सहाभिजनं स्थानं प्राप्य, अतिमनोरथेन स्वोदयेन प्रहृष्यद्भिर्नागरैरभिगम्यमानाः पित्रादिभिश्च सादरं लालिताः, विस्मृतपुरावृत्ताः परां प्रीतिमभजन्त। पुनश्च स्वपुत्रेभ्यः शङ्कितेन तेन राज्ञा वितीर्णं खाण्डवप्रस्थं स्वांशतया लब्ध्वा ते कृष्णसाहाय्येन तद्वने निर्मितायाममरावतीमप्यतिशयानायां राजधान्यां सुखमूषुः। ततः प्रभृति स प्रदेश इन्द्रप्रस्थ इत्यभिधायि।

**व्याख्या - धृतराष्ट्र इति।**

पङ्किलः पङ्कयुक्तः। क्षत्ता शूद्रस्त्रियां जातः (विदुरः)। वरेण्यवरसम्पदः श्रेष्ठानां वराणां सम्पदः। आधिराजस्य सर्वाधिपत्यस्य। मनस्वितायाः महामनस्कतायाः। यौतकेन स्त्रीधनेन। जामाता पुत्र्याः भर्ता। प्रस्थापयामास प्रेषयामास। प्रहृष्यद्भिः सन्तुष्टैः। विस्मृतपुरावृत्ताः अतीतकार्याणि स्मृतिमण्डलाद्विस्मरन्तः। वितीर्णं दत्तम्। स्वांशतया स्वभागांशतया। ऊषुः अवसन्। अभिधायि प्रसिद्धिमलभत।

**संक्षिप्तः आशयः -** पाण्डवानां वृत्तान्तं ज्ञात्वा धृतराष्ट्रः पङ्किलः जलाशयः इव अन्तःकलुषः बहिः प्रसन्नः च बभूव। पाणडवान् आनेतुं विदुरं प्रेषयामास। द्रुपदस्तु कुरुराजसन्देशं मानयन् यौतकेन सदारान् जामातॄन् हस्तिनपुर्यर्थं प्रेषयामास। नागरिकाः पाण्डवागमनेन नितरां तुष्टाः। स्वपुत्रेभ्यः द्रोहं शङ्कितः धृतराष्ट्रः पाण्डवेभ्यः खाण्डवप्रस्थं पाण्डवांशतया अदात्। तत्र पाण्डवाः कृष्णसाहाय्येन अमरावतीमप्यतिशयानरूपां राजधानीं निर्मीय सुखमवसन्। स प्रदेशः इन्द्रप्रस्थः इति नाम्ना विख्यातो बभूव।

## संक्षिप्तीकरणम्

द्रौपदीस्वयंवरमण्डपे प्राप्तः द्रुपदपुत्रः धृष्टद्युम्नः राज्ञां सकाशम् एवमवदत्। भोः राजानः, यः अनेन धनुषा अस्य लक्ष्यस्य भेदनं करोति तेन मम स्वसारं पाणिग्रहणं कर्तुं शक्यते। प्रायेण सर्वे राजानः धनुरारोपणाय यत्नमकुर्वन्। पर्वततुल्यं शरासनं दृष्ट्वा गान्धारराजः प्रतिनिवर्तयामास। धनुषः भारगौरवमधिकृत्य ज्ञातः दुःशासनः प्रतिनिवर्तयामास। दुर्योधनः परिहास्यावस्थां प्राप। अजात्यतया कर्णः दूषितः बभूव। जयद्रथः भग्नमनोरथः अजायत। मद्रराजस्य धैर्य विनष्टमभवत्। शिशुपालः, वृष्णिकेतुः, इतरे राजानः तत्कर्मणि असमर्थाः अभवन्। ब्राह्मणसमूहात् उत्थितः अर्जुनः धनुरारोप्य यन्त्रच्छिद्रेण लक्ष्यं साधितवान्। द्रौपदी मन्दं मन्दमुपगम्य वरणमालां अर्जुनस्य कण्ठे समर्पयामास। अर्जुनस्वीकार्यम् असहमानाः दुर्योधनादयः अर्जुनेन सह युद्ध्वा पराजिताः अभूवन्। अर्जुनः द्रौपद्या सह मातुः समीपं गत्वा 'अम्ब, भिक्षेयमाहृता' इत्यवदत्। 'भ्रातृभिः भुङ्क्ष्व' इति ब्रुवत्येवागता माता याथार्थ्यं ज्ञात्वा आश्चर्यचकिता बभूव। जनन्याः वाणी अनृतं मा भवेत् इति चिन्तया भ्रातृणां भावं च ज्ञात्वा युधिष्ठिरः एवमवदत् - 'इयं स्त्रीरत्नमेव, यत् यत् रत्नमस्माभिः लभ्यते तत्सर्वैः अविभज्यानुभोक्तव्यम्' इति। तदानीमागतौ कृष्णबलरामौ तान् समाश्वासयामासतुः। द्रुपदः अनेकैः प्रमाणैः अर्जुनस्य आभिजात्यं ज्ञात्वा सन्तुतोष। किन्तु विषममिदं यदेका बहूनां भार्या इति यदा संशयालुः अभवत् तदा भगवान् वेदव्यासः अविर्भूय रहसि द्रौपद्याः पूर्वजन्मवृत्तान्तम् अबोधयत्। पुरा स्वर्गलक्ष्मीः कस्यचित् ऋषेः कन्या सती अनुरूपवरस्य अलाभेन तपसा शिवं तोषयामास। प्रसन्नं शिवं पतिं देहि इति सा पञ्चकृत्वः अयाचत। आगामिनि जन्मनि तव पञ्च पतयो भविष्यन्तीति वरं तस्यै अदात्। गङ्गायाः स्रोतसि रुदतीं तां इन्द्रः यदृच्छया अपश्यत्। कारणं किम्? इति अन्वेषन्तम् इन्द्रमादाय सा गिरेः शिखरे वर्तमानस्य शिवस्यान्तिकं प्राप।शिवदर्शनेन संजातकोपः इन्द्रः स्तम्भितोऽभूत्। गुहायाम् इन्द्रसदृशान् चतुरोऽन्यान् दर्शयित्वा गुहां प्रवेष्टुं शिवः आज्ञाप्तवान्। भयाकुले इन्द्रे दयालुः भूत्वा शिवः केनचित् अपदेशेन तेषां पञ्चानाम् इन्द्राणां मनुष्यलोके अवतरणं तां कन्यां तेषां भार्यां च कल्पयामास । सा एव इयं कृष्णा, ते च इमे पाण्डवाः। व्यासवचनेन सन्तुष्टः द्रुपदः पञ्चभ्योऽपि स्वां दुहितारं पाणिग्रहणमकारयत्। तदा लोकं तैजसं कर्तुं घनराशिना आगतौ कृष्णबलरामौ सूर्यचन्द्रौ इव शुशुभाते। श्रुतवृत्तान्तः धृतराष्ट्रः मनसा कलुषोऽपि बहिः प्रसन्नः सन् पाण्डवान् वध्वा सहानेतुं विदुरं प्रेषयामास। कुरुराजसन्देशं मानयन् द्रुपदः सदारान् जामातॄन्हस्तिनपुरगमनाय अनुमेने। स्वपुत्रेभ्यः अक्रमं शङ्कयन् धृतराष्ट्रः खाण्डवप्रस्थं स्वांशतया पाण्डवेभ्यः अदात्। कृष्णसाहाय्येन पाण्डवाः खाण्डवप्रस्थम् अमरावतीमप्यतिशयानां राजधानीं कृत्वा सुखमवसन्।

## पुनरावृत्तिः (Recap)

- प्रायेण सर्वे राजानः धनुरारोपणाय यत्नमकुर्वन्।
- परन्तु अर्जुनः धनुरारोप्य लक्ष्यं साधितवान्।
- तदा कृष्णा अर्जुनसमीपं प्राप्य तस्य कण्ठे वरणमालां समर्पितवती।
- अर्जुनः द्रौपद्या सह मातुः समीपं गत्वा 'अम्ब, भिक्षेयमाहृता' इत्यवदत्।
- 'भ्रातृभिः भुङ्क्ष्व' इति ब्रुवत्येवागता माता याथार्थ्यं ज्ञात्वा आश्चर्यचकिता बभूव।
- जनन्याः वाणी अनृतं मा भवेत् इति चिन्तया भ्रातॄणां भावं च ज्ञात्वा युधिष्ठिरः एवमवदत् - 'इयं स्त्रीरत्नमेव, यत् यत् रत्नमस्माभिः लभ्यते तत्सर्वैः अविभज्यानुभोक्तव्यम्' इति।
- तदानीमागतौ कृष्णबलरामौ तान् समाश्वासयामासतुः।
- पुरा स्वर्गलक्ष्मीः कस्यचित् ऋषेः कन्या सती अनुरूपवरस्य अलाभेन तपसा शिवं तोषयामास ।
- प्रसन्नं शिवं पतिं देहि इति सा पञ्चकृत्वः अयाचत।
- आगामिनि जन्मनि तव पञ्च पतयो भविष्यन्तीति वरं तस्यै अदात्।
- सा एवं इयं कृष्णा, ते च इमे पाण्डवाः।
- व्यासवचनेन सन्तुष्टः द्रुपदः पञ्चभ्योऽपि स्वां दुहितारं पाणिग्रहणमकारयत्।
- श्रुतवृत्तान्तः धृतराष्ट्रः मनसा कलुषोऽपि बहिः प्रसन्नः सन् पाण्डवान् वध्वा सहानेतुं विदुरं प्रेषयामास।
- स्वपुत्रेभ्यः अक्रमं शङ्कयन् धृतराष्ट्रः खाण्डवप्रस्थं स्वांशतया पाण्डवेभ्यः अदात्।
- कृष्णसाहाय्येन पाण्डवाः खाण्डवप्रस्थम् अमरावतीमप्यतिशयानां राजधानी कृत्वा सुखमवसन् ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अतीते जन्मनि कृष्णा का आसीत्?
2. कः द्रौपदीं विवाहं कृतवान्?
3. धृष्टद्युम्नः कः?
4. धनुरारोपणाय दुःशासनः कुतः न यतितवान्?
5. इन्द्रप्रस्थनगरी पूर्वं केन नाम्ना विख्याता आसीत्?
6. अनन्तरे जन्मनि तव पञ्च पतयो भविष्यन्ति - कस्येदं वरम् ?
7. अजात्यतया दुषितः कः?
8. पङ्किल इव जलाशयेऽन्तः कलुषो बहिः प्रसन्नश्च सन् - कः?
9. 'अम्ब, भिक्षेयमाहृता' - कः अवदत्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

1. तदियं पञ्चानामपि भोग्यास्तु - कस्येदं वचनम् ? पञ्चानां भोग्या का?
2. द्रौपद्याः स्वयंवरसभायाम् आगतानां राज्ञाम् अवस्थाः काः ?
3. द्रौपदीस्वयंवरसमायां धृष्टद्युम्नः किम् आचचक्षे?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

1. द्रौपद्याः पूर्वजन्मवृत्तान्तं संक्षिप्य लिखत।
2. इन्द्रप्रस्थमधिकृत्य एकां खण्डिकां लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1. भारतसंग्रहस्य आदिपर्वणः कथासारं संक्षिप्य लिखत।
2. द्रौपदीपरिणयं वर्णयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. कस्यचन ऋषेः कन्या।
2. अर्जुनः।
3. द्रौपद्याः सोदरः।
4. धनुषः भारगौरवं विचिन्त्य।
5. खाण्डवप्रस्थम् इति नाम्ना।
6. महेश्वरस्य।
7. कर्णः।
8. धृतराष्ट्रः।
9. अर्जुनः।

## सूचनाग्रन्थौ (References)


1. लक्ष्मणसूरिः, भातरसंग्रहः, व्याख्या-शङ्कररामशास्त्री, श्रीबालमनोरमा प्रस्, १९६१।
2. लक्ष्मणसूरिः, भारतसंग्रहः, श्रीचैतन्या अकादमी, कृष्ण, आन्ध्राप्रदेशः।


## अधिकवाचनाग्रन्थौ (Suggested readings)


1. लक्ष्मणसूरिः, भारतसंग्रहः, आदिपर्वः, कुप्पुस्वामि शास्त्रि रिसर्च इन्स्टिट्यूट्ट, चेन्नै, २०१७।
2. Lakshmanasuri. Bharata Sangraha-Adi parva, C Sankararama sastri, Kuppuswami Sastri Research Institute, Chennai 2017

## Model Question Paper

## Set – 01

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ………...............
Name : ………………...

FOURTH SEMESTER B.A. SANSKRIT EXAMINATION
LANGUAGE CORE- B21SN02LC- MAHAKAVYAM GADYAKAVYAM CHA
(CBCS - UG)
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः। संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या।**

**SECTION A**
**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**
**(Answer any ten Questions in a word or Sentence)**

1. के पार्वतीं अपर्णा इति वदन्ति?
2. पिशाचभाषायां रचितः कथाग्रन्थः कः?
3. शिवः इति पदस्य अर्थः कः?
4. रामायणे वर्णितः मुख्यः रसः कः?
5. महाभारतमवलम्ब्य कालिदासेन रचितः ग्रन्थः कः?
6. केन वञ्चितं तव प्रियम्?
7. 'स्त्रीव्यतिकरनिमित्त एव तवापि मृत्युरस्तु' – कस्येदं शापः?
8. सव्यसाचि कः?
9. कस्य शिलीमुखः पार्वतीं हृदि व्यायातपातं अक्षिणोत्?
10. कः नक्रात् द्रोणं ररक्ष?
11. विचित्रवीर्यस्य माता का ?
12. इन्द्रप्रसादात् जातः कुन्तीपुत्रः कः?

13. कालिदासः प्रकृतिं काम् इव मन्यते?

14. हिमवता प्राप्तानुदेश गौरी कुत्र जगाम?

15. काव्यं कतिविधम् ?

**SECTION -B**
**(द्वितीयो भागः)**

**II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**
**(Answer any five Questions in one or two sentences)**

16. केरलीय संस्कृतपञ्चमहाकाव्यानि लिखत।

17. 'मनीषिताः देवताः गृहोषु सन्ति' – कस्य वचनमिदम्? कं प्रति?

18. महाभारते कति पर्वाणि सन्ति? तानि कानि?

19. आदिपुराणमिति प्रख्यातं पुराणं किम्?

20. सरागमस्याः रशनागुणस्पदं कस्याः? कुतः?

21. त्रयः दण्डिप्रबन्धाः के?

22. माद्री कदा ममार?

23. दुश्शलां प्रति लघुटिप्पणिं लिखत।

24. 'विवेश कश्चिज्जटिलः' अयं जटिलः कः? सः कुत्र विवेश?

25. कः पापभाक् भवेत्?

**SECTION - C**
**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**
**(Answer any six Questions)**

26. पञ्चतन्त्रं - टिप्पणिं लिखत।

27. 'शरीरमाद्यं खलु धर्मसाधनम्' सन्दर्भं आशयञ्च विशदयत।

28. 'प्रियेषु सौभाग्यफला हि चारुता'- आशयं विशदयत।

29. पार्वत्याः पारणाविधिः कथमासीत्?

30. 'एवं पञ्च पाण्डवाः अजायन्त' – विशदयत।

31. 'न धर्मवृद्धेषु वयः समीक्ष्यते' - आशयं विशदयत।

32. किन्दममहर्षेः शापवृत्तान्तं लिखत।

33. 'न रत्नमन्विष्यति मृग्यते हि तत्' - सन्दर्भं आशयञ्च विशदयत।

34. हिडिम्बायाः कथां संगृह्य लिखत।

35. रामायणस्य काण्डविषये याकोबी प्रभृतीनां मतम् लिखत।

36. जातुगृहात् पाण्डवाः कथं रक्षां प्रापुः?

37. तिलकमञ्जरीं अधिकृत्य टिप्पणिं लिखत।

## SECTION– D

## (चतुर्थो भागः)

IV. **केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. संस्कृतपञ्चमहाकाव्यानि अधिकृत्य विशदयत।

39. पार्वतीब्रह्मचारिणोः मिथः संभाणम्।

40. भारतीयसाहित्ये महाभारतस्य प्राधान्यम्।

41. पाणडवाः प्रच्छन्नवेषधारिणः भूत्वा द्रुपदराजधानी वासः - वर्णयत।

SGOU

## Model Question Paper

## Set – 02

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ……….............

Name : ………………...

FOURTH SEMESTER B.A. SANSKRIT EXAMINATION
LANGUAGE CORE- B21SN02LC- MAHAKAVYAM GADYAKAVYAM CHA
( CBCS - UG )
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।**

**SECTION A**
**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**
**(Answer any ten Questions in a word or Sentence)**

1. कुमारसम्भवे हिमालयपर्वतादि वर्णना कस्मिन् सर्गे अन्तर्भवति?
2. लक्ष्मणसूरेः काव्यशैली कीदृशी?
3. इन्द्रप्रस्थनगरी पूर्वं केन नाम्ना विख्यात आसीत्?
4. मेना कां मुनिव्रतात् अनिवारयत्?
5. महाभारतस्य अङ्गीरसः कः?
6. ............ खलु धर्मसाधनम्। (रिक्तं पूरयत)
7. मृदुप्रकृत्या ससारमेव च। किम्?
8. वसुषेणः कः?
9. भारतसङ्ग्रहस्य कर्ता कः?
10. धृतराष्ट्रस्य पुत्री का?
11. सतां सङ्गतं काभिः साप्तपदीनमुच्यते?
12. के महात्मनां चरितं दूषयन्ति?
13. पाण्डवेषु गदायुद्धे अद्वितीयः कः?



SGOU

14. आख्यायिकायाः एकमुदाहरणं लिखत।

15. भीमसेनस्य हिडिम्बायाः जातः पुत्रः कः?

## SECTION -B
## (द्वितीयो भागः)

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5x2=10)**
**(Answer any five Questions in one or two sentences)**

16. मूषिकवंशमहाकाव्यस्य प्रतिपाद्यविषयः कः?

17. 'वदन्त्यपर्णेति तां पुराविदः'। कुतः ?

18. पुराणे मद्वयं इत्यनेन विवक्षितः आशयः कः?

19. 'एषः महीधरः सान्वयः पावितः'।कथम्?

20. लक्ष्मणसूरिणा रचिताः ग्रन्थाः के?

21. 'तपस्विनां दुरमधश्चकार सा' । किम्?

22. दशकुमारचरितस्य टीकाः काः?

23. 'त्वया महाजनः स्मेरमुखो भविष्यति'।कथम्?

24. 'भो कुमारः पश्य मे कौशलं'- इति कः कं अवदत्?

25. 'कथमराज्ञस्तव राजपुत्रेण सह सङ्घर्षः' – कः कं अवदत्?

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** **(6x5=30)**
**(Answer any six Questions)**

26. देवव्रतः कथं भीष्मः अभवत्?

27. द्रौपद्याः पूर्वजन्मवृत्तान्तं संक्षिप्य लिखत।

28. ' पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः' - सन्दर्भं आशयञ्च विशदयत।

29. 'न केवलं यो महतोपभाषते श्रृणोति तस्मादपि यः स पापभाक्' - सन्दर्भं आशयञ्च विशदयत ।

30. रामायणस्य प्राधान्यं विशदयत?

31. ' न कामवृत्तिर्वचनीयमीक्षते' -आशयं विशदयत।

32. 'क्लेशः फलेन हि पुनर्नवतां विधत्ते - आशयं विशदयत।

33. ' महातप साक्ष्ये इव स्थिताः क्षपाः' - आशयं विशदयत।

34. कुरुपाण्डववैरमधिकृत्य एकां खण्डिकां लिखत ।

35. इन्द्रप्रस्थमधिकृत्य टिप्पणिं लिखत ।

36. अश्वघोषस्य महाकाव्ये के? विवृणुत।

37. दशकुमारचरितं – टिप्पणिं लिखत ।

**SECTION– D**

**(चतुर्थो भागः)**

IV. **केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. महाकाव्यलक्षणं निरूपयत।

39. ब्रह्मचारिणं प्रति सख्याः प्रतिवचनं किमिति विशदयत।

40 लक्ष्मणसूरेः भाषाप्रयोगवैदग्ध्यं शैलीं योगदानञ्च लिखत।

41. गद्यसाहित्ये भारतसङ्ग्रहस्य स्थानं निरूपयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

महाकाव्यं गद्यकाव्यं च

COURSE CODE: B21SN02LC

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-970303-3-8
9 788197 030338